प्राच्यविद्यासंशोधनालयसंस्कृतग्रन्थमाला स०. १०१

प्रधानसम्पादकः

हेच्. देवीरप्पः, एम्.ए.,

प्राच्यविद्यासंशोधनालयाध्यक्षः

श्री चोक्कनाथविरचितम्

सेवन्तिकापरिणयनाटकम्

सम्पादकः

विद्वान् सु. नारायणस्वामिशास्त्री

015,21CH,1
J8

मैसूरु विश्वविद्यानिलयः

१९५९

Price: Rs. 2-25.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,2LCH,1 · 1204
J8
Chokkanatha.
Sevantikaparinaya-
m.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,2LCH,1
J8

1204

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADI MATH, VARANASI.

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ORIENTAL RESEARCH INSTITUTE PUBLICATIONS

SANSKRIT SERIES No. 101

GENERAL EDITOR:

SRI H. DEVEERAPPA, M.A.,

Director, Oriental Research Institute, Mysore

SEVANTIKĀPARIṆAYANĀṬAKAM

OF

SRI CHOKKANĀTHA

EDITED BY:

VIDWAN S. NARAYANASWAMY SASTRI

Senior Pandit, Oriental Research Institute, Mysore

UNIVERSITY OF MYSORE

1958

Price: Rs. 2-25

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,2LCH,1
J8

ALL RIGHTS RESERVED

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI
Acc No. ~~[illegible]~~ 1204

PRINTED BY THE DEPUTY DIRECTOR, GOVT. BRANCH PRESS, MYSORE

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

PREFACE

IT gives me immense pleasure to bring to light the "Sevantikā Pariṇayam" written by Cokkanātha which was hitherto unpublished. The dramatist hails from a well-known family of scholars who flourished under the royal patronage of the Nayaks of Tanjore.[1]

Very little information is available about the author either in his works or from other sources. The author was the fifth son in order among the six sons of Tippādhvarīndra of Bhāradwāja Gotra. All the six brothers were profound scholars with good reputation. Cokkanātha must have lived at least for a few years in the court of the King Shahaji (A. D. 1684-1710) who was a great lover of Arts and literature. During that period, the historical play "Kāntimatī Pariṇayam" might have been written which deals with the marriage of Shahaji with Kāntimati.

This play was written in the Court of Basavabhūpāla—a scholar prince of Keladi, the author of Śivatattvaratnākara—a magnificent encyclopædia in Sanskrit verse, dealing with a large

[1] Patañjali carita of Rāmabhadradīksita.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

variety of subjects touching upon all departments of Oriental culture for which the author was richly awarded and honoured.

It may not be out of place to mention about the patronage received by many learned men from all over South India in the court of the Kings of Keladi (otherwise known as the Kings of Ikkeri or Bidanur). Many of the Kings were themselves great scholars and writers. They have practised and propagated Vīraśaivism. As true Vīraśaivas who 'wish good to all breathing things', they have encouraged the scholars of all communities.

But, Dr. P. K. Gode writes thus: "the Keladi rulers (Venkatappa Nāyaka I) must have entertained great respect for these brothers (Bhattoji Dīkṣita and Rangoli Bhatta) who were followers of the Adwaita doctrine which appears to have been followed by Venkatappa in view of his being devotee of the Adwaita maṭh of Śṛngeri like other rulers in the Keladi line of rulers.[1]" This inference is not tenable in view of the fact that Venkaṭa-bhūpāla and other kings of the same lineage have definitely stated in their records and works that they were devout Vīraśaivas.

The play Sevantikā Pariṇayam is in five acts dealing with the marriage of Sevantikā, the princess of Kerala with Basavabhūpāla. The author possesses good command over Sanskrit and Prākṛt. He has achieved success in writing the drama in a classical

---

[1] Journal of the Oriental Institute, Baroda, IV, 1.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

style. Another feature of the drama, though it closely resembles Mālatīmādhava of Bhavabhūti, Mālavikāgnimitra of Kālidāsa and some of the ancient dramas, is that it differs in several respects having the originality of its own. Some of the episodes which have been profusely quoted by the learned editor in his introduction speak of the merit and inborn gift of the dramatist. Almost all the Sanskrit dramatists have selected materials from Rāmāyaṇa, Bhārata and Bṛhatkathā, but Cokkanātha selected for both the dramas contemporary historical incidents and personages. "Rasavilāsa", a bhāṇa of amorous nature, is another work written by the same author.

Another special feature of the drama is that it was duly enacted on the occasion of the Subrahmanya festival at Subrahmanya Nagara in the presence of the hero as well as the heroine and the congregation of scholars and pilgrims who had come from every nook and corner of India. Other striking feature of the drama is that it gives us an insight into the Sanskrit of the 17th and 18th Centuries indicating undiminished influence of Sanskrit in the courts of Indian rulers of the period. This rare and unpublished drama, therefore, was selected for publication under the auspices of this Institute.

Vidwan S. Nārāyaṇaswāmy Śāstri, senior pandit of the Institute has edited the drama critically on the basis of three manuscripts (Sp. 1636, Sp. 1661, Sp. 381) of our Institute, and he has rendered the

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Prākṛt passages of the drama into Sanskrit from the second act onwards.

My thanks are due to the Deputy Director and his assistants, Government Branch Press, Mysore, for printing the work in time in an efficient manner.

H. DEVEERAPPA, M.A.,
Director,
Oriental Research Institute,
Mysore.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीः

शिरस्स्थशशिलक्षणं त्रिपुरदैत्यसंतक्षणं
दुरन्तविषमेक्षणं सुरनिकायसंरक्षणम्।
नरीनरविलक्षणं रविकृशानुचन्द्रेक्षणं
स्मरार्दनविचक्षणं परशिवं भजेऽनुक्षणम्॥

ग्रन्थावतरणिका तत्परिचयश्च

इह खलु नानाविधसांसारिकदुःखपरिक्लिष्टस्य मनसो निर्वृतये सुकविकृतकाव्यरसास्वादं विना नान्यत्तत्सदृशं वस्तूपलभ्यते। तस्मिन् हि रसास्वादे सत्यचिरादेव दूरीभवति मानसो विकारः, प्रादुर्भवति च निरतिशय आनन्दः।

पठ्यमाने च यस्मिन् जायते निकामं बुद्धिविकासः, अधिगम्यते च सम्यग्व्यावहारिकं प्रामाण्यम्, तत्काव्यं श्राव्यदृश्यभेदेन द्विविधम्। तत्र महाकविकालिदासादिप्रणीतानि रघुवंशादीनि श्राव्याणि। शृङ्गारादिनानारसभावभास्वराणि तदानीमेव चक्षुः-श्रवणयोर्निरङ्कुशं प्रीतिजनकानि विविधकलानिपुणपटुतरनटनटी-भिरभिनेयार्थानि शाकुन्तलादीनि श्राव्यकाव्येभ्योऽप्यभ्यधिक-रमणीयानि दृश्यानि।

तादृशेषु दृश्यकाव्येषु शृङ्गाररसवर्णनाभूयिष्ठं भावगर्भित-सुललितपदजालग्रथितं विविधघटनाचित्रितं,

यस्यौदार्यममर्त्यभूरुहयशोज्योत्स्नाप्योदागमः
सौन्दर्यं कुसुमास्त्रकीर्तिनिविडाहङ्काररुद्रेक्षणम्।
शौर्यं मध्यमपार्थकीर्तिनिगमाम्नायस्य दर्शोदयः
तस्य श्रीबसवेन्द्रभूपतिमणेर्गृह्णीत को भूमिकाम्॥
(से. १-११)

वितरणमुखा गुणगणा
यस्मिन्निवसन्ति कृतसमयबन्धाः। (से. १-१२)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यादिना ग्रन्थकृद्वर्ण्यमानधीरोदात्तत्वाद्युत्तमगुणगणालङ्कृत श्रीबसवेन्द्रनायकं, श्रीचोक्कनाथमखिना विरचितं 'सेवन्तिकापरिणयं' नाम पञ्चाङ्कं रूपकमिदमिदंप्रथमतया मुद्राप्य प्रकाश्यते। इदं रूपकं नवसालपुर्यां विद्याशालामुख्याधिकारिणा श्री शङ्करकामेश्वर अय्यर् महाशयेन प्रायः चत्वारिंशद्वत्सरात्पूर्वं कस्यांचिन्मासिकपत्रिकायां मुद्रितं, अवलोकितानि च मया पञ्चषपुटानि, परं तु तत्कथं जातमिति न ज्ञायते इदानीं नोपलभ्यते च। अर्वाचीनकविकृतस्याप्यस्य रूपकस्य सकृत्पठनमात्रेण 'कर्णौ निष्करुणं दहन्ति कवयोऽकस्मादिदानींतनाः' इति श्रीनीलकण्ठदीक्षितेनोद्भावितमर्वाचीनकृतिष्वसौष्ठवरूपमयशोऽलग्नं भवतीत्यत्र नास्ति सन्देहलेशोऽपि।

यद्यप्येतन्नाटकीयकथा शाकुन्तलादिकथावत्पुराणेषु न प्रसिद्धा दृश्यते, अथापि सुप्रसिद्धकेलदिमहीपालं श्रीबसवेन्द्रं नायकं कृत्वा सामाजिकमनोहारिभिर्विविधै रसैर्यथाभूतविविधवर्णनाचातुर्येण, तिरस्करिणीमूलिकाप्रयोगः, सेवन्तिकायाः करतले प्रेक्षणिकाकृताञ्जनलेपनेन तदीयभूतभविष्यद्वृत्तान्तसाक्षात्करणं, सेवन्तिकासारङ्गिकयोराभरणमञ्जूषायामन्तर्भूय बसवेन्द्रमहीपालसमीपगमनम्, इत्याद्यनितरसाधारणघटनावैदग्ध्येन चित्रितमिति भाति। पुराणेतिहासादिष्वितिवृत्तस्यास्य प्रसिद्धयभावादयं ग्रन्थः

'सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम्।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम्॥'

इत्युक्तलक्षणस्त्रोटकाख्यो [1]रूपकभेदः।

कर्तृपरिचयस्तत्कृतग्रन्थाश्च

एतत्कविकृतस्य कान्तिमतीपरिणयनाटकस्योपक्रमस्थपारिपार्श्वकसूत्रधारवाक्यपर्यालोचनया कविरयं चोक्कनाथमखी शाह-

---

[1] दिव्यसंश्रयं मानुषसंश्रयं वेत्यर्थमाश्रित्येयमुक्तिः.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महाराजपुरवासी (अयं ग्रामः कुम्भकोणसमीपस्थितः 'तिरुविशलूरु' इति नाम्ना प्रसिद्धः) तद्ग्रामप्रतिग्रहीतृष्वेकतमस्य तिप्पाध्वरीन्द्रस्य

ज्येष्ठः कुप्पाध्वरीन्द्रस्तदनु तिरुमलः प्राज्ञवर्योऽतिवाग्मी
पश्चाद्ग्रन्थप्रचारप्रकटितधिषणावैभवः स्वामिशास्त्री।
श्रीसीतारामशास्त्री तदनु तदनुजश्चोक्कनाथः सुधीन्द्रः
पश्चाद्यज्ञेश्वराख्यो जितविबुधगुरोस्तस्य पुत्राः षडेते ॥

(से. १-१४)

इत्युक्तेषु षट्सु तनयेषु पञ्चमः। अस्य माता नरसाम्बानाम्नी। तथाहि कान्तिमतीपरिणयनाटके—

नेता शाहमहीन्द्रो नाटकमतिचित्रसंविधानमिदम्।
एषा सभा रसज्ञा कविरपि चास्यैष चोक्कनाथसुधीः ॥

पारिपार्श्वकः—जानाम्येतं रसविलासाख्यस्य बाणस्य कवयितेति।

सूत्रधारः—

सकलकलास्वपि निपुणो
नरसाम्बाविमलगर्भसंभूतः।
तिप्पाध्वरीन्द्रतनयः
शाहमहाराजपुरकृतावासः ॥

पारिपार्श्वकः—तर्हि सकलकलावल्लभस्य कुप्पाध्वरिणो वादिकेसरिणस्तिरुमलशास्त्रिणश्च कनीयानिति वक्तव्यम्।

सूत्रधारः - शैशवाभ्यस्तसकलशास्त्रयोः स्वामिशास्त्रिसीतारामशास्त्रिणोरपीति।

कवेरस्य जीवितकालः सेवन्तिकापरिणयनाटकनायकस्य केलदिवसवभूपालस्य शाहमहीभर्तुश्च राज्यपालनकालपर्यालोचनया क्रि. श. सप्तदशशताब्द्या अन्तिमः अष्टादशशताब्द्या आदिमश्च भागः स्यात्। अयं कविरेतत्कथानायकस्य वसवनरेन्द्रस्य सभायामेत-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्रूपकमभिनीय दर्शयित्वा तस्मात्पारितोषिकं गृहीत्वा स्वपुरं प्रयात इति (से. १-७) तमे श्लोके वर्णनात्, शाहमहीभर्तुश्च तत्कालीनत्वस्यैव कविचरित्रकारैर्वर्णनाच्च।

अनेन कविना प्रथमं रसविलासबाणः अनन्तरं कान्तिमतीपरिणयनाटकमित्युपरिनिर्दिष्टकान्तिमतीपरिणयनाटकस्थपारिपार्श्वकवाक्यादवगम्यते। तत्र च सेवन्तिकापरिणयनाटकनाम्नोऽग्रहणादयं ग्रन्थोऽनन्तरं कृत इत्याहत्य ग्रन्थत्रयं कृतमिति ज्ञायते।

अयं चोक्कनाथमखी षड्दर्शनीसारसङ्ग्रहाद्यनेकग्रन्थकर्तुः श्रीरामभद्रदीक्षितस्य गुरोः शब्दकौमुद्यादिग्रन्थकर्तुश्चोक्कनाथमखीन्द्रादन्यस्ततोऽर्वाचीनश्च।

कथानायकवसवभूपालपरिचयस्तत्कृतग्रन्थाश्च

नाटकीयकथानायको वसवभूपालः केलदिराज्याधिपतिः 'हिरियवसवप्पनायकः' इति नाम्ना प्रसिद्धः। अयं शालिवाहनशके १४२२-१६८५ तमवत्सरपर्यन्तं तद्राज्यं शासितवतां चौडप्पनायकप्रभृतीनां सोमशेखरनायकपर्यन्तानां राज्ञां मध्ये हिरियसोमशेखरनायकस्य (अस्य राज्यपालनकालः १५७६-१५९४ तमशकवत्सरपर्यन्तः) भार्यायाः चन्नमाम्बा (चन्नम्माजी) नाम्न्याः (अस्या राज्यपालनकालः १५९४-१६२० तमशकवत्सरपर्यन्तः) दत्तः पुत्रः (अस्य राज्यपालनकालः १६२०-१६३७ तमशकवत्सरपर्यन्तः)। एतद्वंशपरंपरागताः सर्वेऽपि राजानः सकलकलानिपुणाः शिवालयप्रतिष्ठापनादिसद्धर्मनिरताः सदाचारवन्तः विशेषतः स्वाश्रितविद्वज्जनकल्पतरव इति च प्रकृतवसवभूपतिकृत 'शिवतत्त्वरत्नाकर' ग्रन्थपर्यालोचनादवगम्यते। अनेन 'सूरिनिकरकल्पद्रुमः' इति बिरुदभूषितेन संस्कृतभाषामयः शिवतत्त्वरत्नाकरः (१) सुभाषितसुरद्रुमः (२) संस्कृतकन्नडोभयभाषामयः सूक्तिसुधाकरः (३) इति त्रयो ग्रन्था रचिता दृश्यन्ते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाटकान्तरसंवादः

दुष्यन्तः प्रथमं कण्वाश्रमे शकुन्तलां दृष्ट्वा इयमात्मनः परिग्रहार्हा न वेति सन्दिह्य 'असंशयं क्षत्रपरिग्रहक्षमा' (शा. १-१९) इत्यादिना यतोऽस्यां सत्पुरुषस्य मम चेतः प्रवर्तते अत इयं मत्परिग्रहक्षमेति निश्चिनोति। तथात्रापि 'अणण्णपुव्वा एव्व कण्णआ एसा' (से. २०तमे पुटे) इत्यादि विदूषकवचनम्।

कण्वाश्रमे दुष्यन्ताभिमुख्यं परिहृत्यान्यत्र गच्छन्त्याः शकुन्तलायाः अङ्गचेष्टया तदीयाभिप्रायवर्णनं कृतं दुष्यन्तेन 'दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे' (शा. २ १२) इत्यादिना। तथात्रापि राजसमीपस्थितायाः सेवन्तिकायाः प्रभावतीमुखेन स्वमात्राऽऽहूतायाः गृहं प्रति गमनसमये तां दृष्ट्वा राजा वर्णयति—'मन्दं गच्छति तिष्ठति क्षणमथ व्यावर्तयत्याननम्' (से. २-१७) इति।

मध्याह्नातपवेलायां शकुन्तलाविरहासहिष्णुस्वमनोविनोदनाय शकुन्तलावासस्थानं जिगमिषुणा दुष्यन्तेन मालिनीनदीतीरवर्तिनो लतामण्डपस्य द्वारदेशे कस्याश्चित्स्त्रियः पादविन्यासं दृष्ट्वा अयं शकुन्तलाया एव स्यादिति 'अभ्युन्नता पुरस्तात्' (शा. ३-५) इत्यादिना तर्कितम्। एवमत्रापि स्वाचरितव्रतपरिसमाप्तिदिने ब्राह्मणाशीर्वादसमये सेवन्तिका समागच्छतीति श्रुतवता, अवश्यं सेवन्तिकया सन्निहितया भवितव्यमिति तामन्विष्य तत्र गच्छता बसवेन्द्रेण क्वचित्सिकतिलप्रदेशे स्त्रीचरणविन्यासं दृष्ट्वैवं तर्कितम्—'नितम्बभारातिशयेन गाढम्' (से. ३-१०) इत्यादिना।

माधवे नितान्तमनुरक्तायाः, नन्दनाय मालतीं प्रतिश्रुतवतः स्वपितुरभिप्रायं कामन्दकीमुखेन ज्ञातवत्याश्च मालत्या इयमुक्तिः 'राआराहणं खु तादस्स गुरुअं ण उण मालदी' (माल. पुटम् ६३) इति। अत्र बसवेन्द्रे अनुरक्तायाः, राज्यप्रतिष्ठापकाय चित्रवर्मणे सेवन्तिका देयेति कृतनिश्चयं स्वपितरं मन्दारिकामुखेन जानन्त्याश्च सेवन्तिकाया इयमुक्तिः 'रज्जाहिगमो खु तादस्स समीहिदो ण उण सेवंदिआ (से. १०८ पुटे) इति।

मालतीविरहदुःखपीडितस्तां मनसि विभाव्येत्थं प्रलपति माधवः 'तामिन्दुसुन्दरमुखीम्' (माल. १-२१) इत्यादिना। एवमत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बसवेन्द्रः पुरतः सौधाग्रे स्थितां सेवन्तिकां विलोक्यैवं प्रलपति— 'हारोल्लसत्कुचभराम्' (से. १-३८) इत्यादिना। मालतीमाधवे मालतीं स्मृत्वा प्रलपनम्, अत्र पुरतः सेवन्तिकां दृष्ट्वेति विशेषः।

पूर्वं सरसविलासदृष्टिं माधवे पातयित्वा अनन्तरं गजवधूमारुह्य नगराभिगामिना पथा गच्छन्तीं मालतीं दृष्ट्वा तद्विरहमसहिष्णोर्माधवस्योक्तिः—'यान्त्या मुहुर्वलितकंधरमाननं तत्' (माल. १-३२) इत्यादिः। अत्र पूर्वं निरतिशयानन्दजनकत्वादिदानीं दुर्विषहविप्रयोगवेदनाहेतुत्वाच्च कटाक्षे अमृतविषदिग्धत्वारोपः। एवमेवात्र 'अमृतविषविमिश्रितैरमुष्याः' (से. १-५५) इति बसवेन्द्रस्योक्तिः। अत्र महोत्सवदर्शनार्थं तन्नगरस्थितराजभवनस्य सौधाग्रमधिवसति बसवेन्द्रे पातितस्य सेवन्तिकायाः कटाक्षस्य तदानीमानन्दहेतुत्वादमृतविमिश्रितत्वम्, स्वमहिष्यास्तत्रागमनानन्तरं तस्यैव कटाक्षस्य विषमिश्रितत्वं च।

उपसंहारः

इत्थं महाकविकृतशाकुन्तलमालतीमाधवादिग्रन्थान्तरेभ्यो रचनाविशेषं अभिप्रायविशेषं घटनाविशेषं च समादाय स्वप्रतिभामहिम्ना सन्दर्भानुसारेण संयोज्य 'रूपविलोकनसफले' (से. २-११), 'घ्राणं जिघ्रति सौरभम्' (से. ३-४१), 'वञ्चयित्वा त्वगादीनि' (से. ३-४२), 'शीतो न मन्दपवनः' (से. ४-२) इत्यादिस्वीयपाण्डित्यसमुल्लसितवर्णना (रचना) वैचित्र्येण निर्मितमिदं नाटकं सहृदयहृदयाह्लादनायालमिति विश्वस्य, अस्मत्संशोधनालयस्थिताभिस्तिसृभिर्मातृकाभिः संशोध्य मुद्रयित्वा प्रकटीकृतमित्यावेद्यते।

एतद्ग्रन्थमुद्रणायादृतेषु त्रिषु तालपत्रकोशेषु—

(१) १६३६तमः कोश आन्ध्राक्षरः-क संज्ञकः,
(२) १६६१तमः कोशः नागराक्षरः-ख संज्ञकः,
(३) ३८१तमः कोशः नागराक्षरः-ग संज्ञकः.

इति विद्वदनुचरः

सु. नारायणस्वामिशास्त्री,

राजकीयप्राच्यसंशोधनालयप्रधानपण्डितः.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथासङ्ग्रहः

श्रीसुब्रह्मण्यस्य महोत्सवदर्शनाय समागतैर्वैदेशिकैरादिष्टः,
पञ्चषदिवसैरेतद्रूपकमभ्यस्य सानुबन्धिजनः।
अभिनीय भरतदेशिक नन्दय नानाकवीन्द्रसन्दोहम्॥

इति श्रीमहाराजेन बसवभूपालेनादिष्टश्च सूत्रधारः स्वकीयैर्नटादिभिः सहार्वाचीनकविभिः कृतेषु नाटकेषु प्रकृतसामाजिकमनोविनोदनक्षमं पञ्चाङ्कं सेवन्तिकापरिणयं नाम नाटकं सम्यगभिनीय दर्शयति स्म।

(प्रथमोऽङ्कः)

केरलदेशाधिपतौ मित्रवर्मणि गोदवर्मणा समरे पराजित्य जीवग्राहं गृहीते सति तदीयैः कुलपुत्रैरपत्यकलत्रप्रमुखः स्वजनः सर्वोऽपि केलदिदेशस्य नातिदूरवर्तिनि मूकाम्बिकानगरे सुरक्षितं न्यवेशि। वृत्तान्तमिमं श्रुत्वा केलदिनृपो नूतनभवनप्रदानादिभिरुपचारैस्तं जनं बहुप्रकारमुपचचार। एवं स्थिते एकदा बसवभूपालः सपरिवारो मूकाम्बिकाया रथोत्सवदर्शनार्थं तन्नगरमागत्य, तत्र च कादाचित्कनिवासाय कल्पिते भवने वसन्, अमात्येन स्वमन्दिराभिमुखीभूतं "इदमेव मित्रवर्मणः कलत्रापत्यनिवासार्थं प्रत्यग्रतया निर्मितं भवनम्" इति निर्दिश्यमानं भवनं प्रेक्षते। अथ तद्भवनस्य प्रासादे निषण्णां द्रष्टृजनमनोहारिसर्वावयवसौन्दर्यां तरुणीं समीक्ष्य तस्यां दृढतरसमासक्तचित्तो राजा मुह्यति। ततो मूकाम्बिकारथोत्सवदर्शनानन्तरं अमात्यादीन्विसृज्य प्रियवयस्येन कौषीतकेन सह स्वभवनसौधाग्रमारुह्य वयस्यमुखात् तां तरुणीं केरलदेशाधिपतेर्मित्रवर्मणः पुत्रीं सेवन्तिकानाम्नीमनन्यपूर्वां स्वपरिणेयां च जानाति। अनन्तरं तामुद्दिश्य नामग्रहणपूर्वकं नैकप्रकारेण प्रलपति तस्मिन् राजनि, तस्य महिषी स्ववयस्यया सह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रागत्य तथाविधं राजानं दृष्ट्वा सन्दिहाना सेवन्तिकामधिकृत्य राजानं पृच्छति। तदा कौषीतकस्तां शब्दच्छलेन प्रतारयति। विदूषक-वञ्चनां ज्ञातवत्या लीलावत्या प्रियसख्या प्रेरिता राज्ञी सशपथं विदूषकं पृच्छति, तदापि प्रकारान्तरेण राजप्रलापमन्यथयति। ततो मध्याह्न-समये सम्प्राप्ते मज्जनशालां प्रविष्टौ राजदम्पती।

(द्वितीयोऽङ्कः)

मूकाम्बिकानगरे स्वनिवासार्थं निर्मिते भवने निवसन्ती सेवन्तिका कदाचित् गजेन्द्रकन्धराधिरूढं बसवनरेन्द्रं दृष्ट्वा तमेव पतिं प्राप्तुकामा ततो नातिदूरे वनमध्ये कृताविर्भावां भक्ताभीष्टप्रदायिनीं कालिकाभगवतीं प्रतिदिनं पादचारिण्येव गत्वा समभ्यर्च्य वरं प्रार्थया-मास। एवं स्थिते कस्मिंश्चिद्दिने कालिकापूजां कृत्वा सारङ्गिका-मन्दारिकाभ्यां सह गृहं प्रतिनिवर्तमाना सेवन्तिका तादात्विकेनाकाण्ड-वृष्टिरूपेण प्रत्यूहेन पतिबद्धा सती देवालय एवावातिष्ठत। तादृश-मन्तरमेव प्रतीक्षमाणो [1] गोदवर्मप्रेरितः ससैन्यो निषादेशः सेवन्तिका-मपजहार। ततो देवलकमुखादिमं वृत्तान्तं श्रुत्वा बसवभूपालः खड्ग-पाणिर्बहिर्निर्गत्य सेवन्तिकापहर्तॄन् निषादान् जित्वा तां प्रत्यानयति। महाराजश्च सेवन्तिकाकृतदेवीपूजां सेवन्तिकां च यथावद्वर्णयति। पूजानन्तरं सारङ्गिकया सह सेवन्तिका गृहं गच्छति। राजा च तद्विरहवेदनामसहमानो मनोविनोदनार्थं विदूषकेन सहोपवनं प्रविशति। तत्र मूलिकामहिम्ना अदृश्यतां गतं निषादाधिपतिं रज्ज्वा

---

[1] पूर्वं मित्रवर्मतनयां सेवन्तिकां तदीयरूपलावण्यमोहितः, अत एव तां कामयमानो मित्रवर्मणा अवमानितश्च यथाकथंचित्सा अपहरणीयेति निश्चित्यार्थ-प्रदानादिना ससैन्यं निषादेशं प्रोत्साह्यैवं सेवन्तिकां ग्राहयामासेत्युत्तरत्र कथासन्दर्भेण ज्ञायते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बध्वा सेनापतिरानयति। राजा अदर्शनकारिणीं मूलिकां गृहीत्वा, तन्मुखात् गोदवर्ममित्रवर्मणोर्विरोधकारणं सम्यक् श्रुत्वा तं विसर्जयति। ततो मौहूर्तिको महामतिरागत्य मूकाम्बिकाप्रसादेन राज्ञो निजमहिष्यानुकूल्यं सन्तुष्टेन मित्रवर्मणा स्वयमेवागत्य सेवन्तिकाप्रदानं च प्रतिज्ञाय तथैव पत्रं च विलिख्य राज्ञे प्रयच्छति।

(तृतीयोऽङ्कः)

सेवन्तिकासक्तचित्तो राजा स्वमनोविनोदनाय मृगयां मिषीकृत्य कालिकोपवने परिभ्रमन् भगवतीमुद्दिश्य सेवन्तिकायाः पुनर्दर्शनं प्रार्थयते। तदा विदूषको मन्दारिकामुखाच्छ्रुतं [1] सेवन्तिकास्वप्नवृत्तान्तं कथयति। तच्छ्रुत्वा राजा नूनमत्र सेवन्तिका सन्निहिता स्यादिति तत्र तत्र पर्यटन् तदालापश्रवणादिना तत्सान्निध्यं निश्चिनोति। तत्र सारङ्गिकाया उत्सङ्गे शिरो निधाय शयानायाः सेवन्तिकायाः सारङ्गिकया सह संलापं लतान्तरितः श्रुणोति, तथावस्थां तां वर्णयति च। अनन्तरं गृहं जिगमिषन्तीं सेवन्तिकां सारङ्गिका समाकृष्योपवेशयति। सवयस्यो राजा तदभिमुखो भूत्वा कुशलं पृच्छति। सेवन्तिका स्वमनसि राजानं वर्णयति। राजा सारङ्गिकायै स्वीयामवस्थां निवेदयति। तदा सारङ्गिकाविदूषकौ केनचिदपदेशेनान्यत्र गच्छतः। सेवन्तिकाबसवेन्द्रयोः सरससंलापादिकमुद्वेलं प्रावर्तत। अत्रान्तरे केरलदेशाधिपतिर्मित्रवर्मा स्वमित्रेण चित्रवर्मणा राज्ये

---

[1] सेवन्तिकायाः स्वप्ने कालिकाभगवती समागत्य "श्वः सहस्रब्राह्मणभोजनपुरःसरं व्रतसमाप्तिं कुरु, मासमात्रेण तव मनोरथसिद्धिर्भविष्यति" इत्याज्ञापयामास। सेवन्तिका च काल्युद्याने सर्वं सज्जीकृत्य "अहमाशीर्वचनसमये आगच्छामि, त्वं पूर्वं तत्र गत्वा सर्वं समीक्षस्व" इत्यादिदेश। इति.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतिष्ठापितः सन् स्वापत्यकलत्रादि प्रेष्यतामिति पत्रं विलिख्य प्राहिणोत् । तद् दृष्ट्वा राजा अनन्यगतिकः ससत्कारं प्रेषयित्वा सेवन्तिकाविरहदुःखमनुभवति ।

(चतुर्थोऽङ्कः)

केरलदेशस्था सेवन्तिका गृहोपवनं प्रविश्य कथावत्या स्वचित्र-फलकविनिमयेनानीतं राज्ञश्चित्रफलकं दृष्ट्वा मदनपरवशा सती राजानं वर्णयति । तदा मन्दारिका समागत्य आस्थानीमण्डपवृत्तान्तं कथयति । स च वृत्तान्त एवम्—गोदवर्मपराजितं मित्रवर्माणं चित्रवर्मा गोदवर्माणं पराजित्य मित्रवर्माणं स्वराज्ये प्रतिष्ठाप्य तत्प्रत्युपकारार्थं तत्कन्यां सेवन्तिकां प्रार्थयते । मित्रवर्मा च तत्प्रार्थनानिराकरणमनुचितमित्या-लोच्य तथैवेत्यभ्युपगम्य देवीं च अभ्युपगमय्य मौहूर्तिकानाहूय श्वः प्रभात एव पाणिग्रहणमहोत्सवः समापनीय इति निश्चयमकार्षीदिति । श्रुत्वा च निश्चितमिमं वृत्तान्तं येन केन वा प्रकारेण मर्तुकामा बसवेन्द्रमहीपालाय दातव्यमिति पत्रं विलिख्य कथावतीहस्ते दत्त्वा, सारङ्गिकामालिङ्ग्य, आत्मना संवर्द्धितं कीरशिशुं मन्दारिकाहस्ते निक्षिप्य, राज्ञश्चित्रफलके स्वपश्चिमसन्देशं समर्प्य, वेण्युद्बन्धनं कर्तुमुद्युञ्जाना सेवन्तिका मध्ये शुभसूचिन्या श्रुत्या वामाक्षिस्पन्दनेन च तस्माद्व्यापाराद्विरमति । अनन्तरं सारङ्गिका मन्दारिकामुखेन प्रेक्षावतीनाम्नीमीक्षणिकामाहूय तां निश्चितं भाविकार्यं पृच्छति । सा चाञ्जनमहिम्ना सेवन्तिकाया मूकाम्बिकानगरगमनप्रभृत्येतावत्पर्यन्तं यद्यद्वृत्तं रहस्यं प्रकाशं वा तत्सर्वं यथावन्निदर्श्य, राजानं प्रति सेवन्तिकया प्रेषितस्य चित्रफलकस्य वीथीमध्ये मत्तगजभीतकौषीतक-हस्ताच्च्यवनं, तस्य च शुण्डया गृहीत्वा क्षिप्तस्य कथंचिद्देवीहस्तगमनं, तस्मात् भृशं कुपितया देव्या निर्भत्सनेन कृशविशदशरीरं राजानं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिकादर्शननिराशचित्तं च दर्शयित्वा, अन्ते कालिकाभगवतीमहिम्ना सर्वं समीचीनं भविष्यतीति समाश्वासयामास। सेवन्तिका सारङ्गिकां प्रति श्वोभविष्यद्विवाहोत्सवरूपसङ्कटात्स्वरक्षणोपायं पृच्छति। सा च पञ्चमाङ्कप्रदर्शितरूपमुपायं कर्णे कथयति।

(पञ्चमोऽङ्कः)

चित्रवर्मसेवन्तिकयोः परिणयोत्सवे निश्चिते मित्रवर्मा बसवमहीपालमनुनेतुमपूर्वभूषणवसनादिभिरापूर्य मञ्जूषाः दिनद्वयाभ्यन्तर एव बसवमहीपालसमीपं प्रेषणीया इत्यमात्यनन्दनं शुभमतिमादिदेश। तदन्तर एव सेवन्तिका सारङ्गिकया सह वैवाहिकभूषणग्रहणव्याजेन कोशगृहं गत्वा, तत्र प्रेषणाय सज्जीकृते मञ्जूषायुगले मन्दारिकया आत्मानं सारङ्गिकां च बन्धयित्वा निगूढं मञ्जूषान्तर्गतैव बसवेन्द्रसमीपमगात्। इमं वृत्तान्तं परम्परया श्रुत्वा चित्रवर्मा लज्जितः स्वपुरं प्रतिययौ। मित्रवर्मा च पञ्चषदिवसेषु तत्रागत्य सेवन्तिकां भवते दास्यामीति पत्रं विलिख्य बसवेन्द्रमहीपालसमीपं प्रेषयामास।

मूकाम्बिकानगरे कामयमानावस्थो राजा विजने निष्कुटे विदूषकं निरीक्षमाणस्तिष्ठति। तन्महिषी च लीलावत्या सह "कौषीतको देव्या अङ्गुलीयकमुद्रां प्रदर्श्य अन्तःपुरात्सेवन्तिकायाश्चित्रफलकमपहृत्य गतः" इति तारावलीमुखाच्छ्रुत्वा कुपिता सती लतागृहमागत्य तत्रत्यवृत्तान्तं ज्ञातुकामा लतान्तर्हिता तिष्ठति। कौषीतकः समागत्य राज्ञे चित्रफलकं दर्शयति। तल्लाभप्रकारं च सर्वं यथावत्कथयति। चित्रफलकं दृष्ट्वा बहुधा प्रलपन्तं राजानं कौषीतकः पूर्वं मौहूर्तिकमहामतिना कृतां "अवश्यं सेवन्तिकायाः परिणयो भविता" इति प्रतिज्ञां श्रावयित्वा सान्त्वयति। राजा चित्रफलकं गृहीत्वा सेवन्तिकां वर्णयति। ततः केरलदेशान्मित्रवर्मप्रेरितः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभमतिर्मञ्जूषाधारिभिः सह प्रविश्य कुशलानुयोगपुरःसरमेकैकां मञ्जूषामुद्घाट्य वसनभूषणादीनि दर्शयति । अन्ते मञ्जूषायुगलोद्घाटने कृते ततः सेवन्तिका सारङ्गिका च निर्गच्छतः । तदैव पत्रवाही च समागत्य मित्रवर्मप्रहितां पत्रिकां यच्छति । तद्वाचनानन्तरं लीलावत्या सह बसवेन्द्रमहिषी पुरत आगत्य राजानं बहुधा निर्भर्त्स्य सेवन्तिकां सारङ्गिकां च गृहीत्वा अन्तःपुरं गच्छति । अनन्तरं मित्रवर्मा स्वयं समागत्य " मौहूर्तिकमुखान्मुहूर्तं निर्धार्य पाणिग्रहणमहोत्सवः प्रचलतु । अहं पुनर्वैवाहिकभूषणभूषितया सेवन्तिकया सह कल्याणवेदिमलंकुर्वन्तं भवन्तं कन्याप्रदानसमये द्रष्टुमिच्छामि " इतीमं वृत्तान्तं राजपुरुषमुखेन राजानं श्रावयामास । अत्रान्तरे राजमहिषी सख्या लीलावत्याः स्वप्ने कालिकाभगवत्या समागत्य " सेवन्तिकानरेन्द्रयोः पाणिग्रहण-महोत्सवं निर्वर्तयस्व " इति समादिष्टा समलंकृतया सेवन्तिकया सह समागत्य महोत्सवाय राजानं त्वरयामास । राजा चातीव सन्तुष्टः मौहूर्तिकेन निर्णीते शुभे मुहूर्ते सेवन्तिकायाः पाणिं जग्राह । ततः श्रीबसवमहीपालः स्वमहिष्या सेवन्तिकया च सह निरतिशयं सुखमनुभवन् यथानीति राज्यं पर्यपालयत् ।

कविं सर्वे चैनं सततमनुगृह्णन्तु सुधियः
दयालुस्तानेतानवतु बसवक्ष्मापतिरसौ ।
तमेनं सर्वस्याः परिवृढमवन्या भगवती
विधत्तामश्रान्तं वसतु कृतिरेषा हृदि सताम् ॥

———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नान्द्यादिपदार्थविवरणम्

नान्दी—सभ्यादीन् नन्दयतीति नान्दी आशीर्नमस्क्रियादिरूपो मङ्गलश्लोकः। इयं नान्दी प्रत्याहारमार्जनालेपनादीनां पूर्वरङ्गाङ्गानां मध्ये मुख्यतया विघ्नोपशान्तये सूत्रधारेण पूर्वमवश्यं पठनीया। नान्दीलक्षणं तु—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥

माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥ इति।

रङ्गः—सभ्यादयो यत्र परस्परमनुरज्य मोदन्ते स रङ्ग इत्युच्यते। तस्यैव पूर्वं प्रकल्प्यमानत्वात्पूर्वरङ्ग इति च नाम। तदुक्तम्—

सभापतिः सभा सभ्याः गायका वादका अपि।
नटी नटश्च मोदन्ते यत्रान्योन्यानुरञ्जनात्॥

अतो रङ्ग इति ज्ञेयं पूर्वं यस्मात्प्रकल्प्यते।
तस्मादयं पूर्वरङ्ग इति विद्वद्भिरुच्यते ॥ इति।

सूत्रधारः—सूत्रं भरतशास्त्रं ग्रन्थतोऽर्थतः प्रयोगतश्च धारयतीति सूत्रधारः। अथ वा प्रधाननटे नान्दीं पठित्वा निर्गते सति ततस्तद्वदपरो नटः प्रविश्य प्रस्तावानां करोति, नाटकीयकथावस्तुसूचकवाक्यं सूत्रं धारयति यः स इत्यर्थः। तदुक्तम्—

नाट्योपकरणादीनि सूत्रमित्यभिधीयते।
सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः ॥ इति।

नाटकीयकथा सूत्रं प्रथमं येन सूच्यते।
रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥ इति च।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नेपथ्यम्—रङ्गस्थलस्य पश्चाद्यवनिकान्तरितः वर्णग्रहणादियोग्य-
कुशीलवकुटुम्बावस्थानदेशो नेपथ्यम्। तदुक्तम्—
कुशीलवकुटुम्बस्य स्थलं नेपथ्य इष्यते ॥ इति।

प्रस्तावना- प्रयोज्यस्य प्रकर्षेण स्तावनात्प्रस्तावना। तदुक्तम्—
नटी विदूषको वापि पारिपार्श्वक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनेति च ॥ इति।

प्रस्तावनाङ्गभूतप्ररोचनाऽमुखलक्षणम्—
निवेदनं प्रयोज्यस्य निर्देशो देशकालयोः।
काव्यार्थसूचकैः शब्दैः सभायाश्चित्तरञ्जनम्॥
कविकाव्यनटादीनां प्रशंसा च प्ररोचना ॥ इति।
सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम्।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्तया यत्तदामुखम् ॥ इति।

विदूषकः—
कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः।
हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः॥
इत्युक्तलक्षणः।

पारिपार्श्वकः—प्रस्तावनायां सूत्रधारेण सह संलापकारी नट-
विशेषः। स परिपार्श्वकः सूत्रधारं 'भाव' इति वदेत्।
सूत्रधारः पारिपार्श्वकं 'मारिष' इति ब्रूयात्।

विष्कम्भः—
वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः।
शुद्धः स्यात्स तु संकीर्णो नीचमध्यप्रयोजितः॥
इत्युक्तलक्षणः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रवेशकः—परिजनकृतानुबन्धः प्रवेशको नाम विज्ञेयः। इत्युक्तरीत्या चेट्यादिनीचपात्रैः प्रवर्तितं वृत्तवर्तिष्यमाण-कथांशस्य सूचनं प्रवेशकः।

दश स्मरदशाः—

नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः॥
उन्मादो मूर्च्छा मृतिरित्यंताः स्मरदशा दशैव स्युः॥ इति।

———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पात्रपरिचयः

(1) सूत्रधारः—नान्दीपाठकः, तत्सदृशो नटविशेषः स्थापकः.

(2) पारिपार्श्वकः (मारिषः)—प्रस्तावनायां सूत्रधारेण सह संलापकारी.

(3) बसवेन्द्रः—केलदिनृपः, कथानायकः.

(4) कौषीतकः—विदूषकः, राज्ञः प्रियवयस्यः.

(5) मित्रवर्मा—केरलदेशाधिपतिः सेवन्तिकायाः पिता.

(6) चित्रवर्मा—मित्रवर्मणो राज्यप्रतिष्ठापकः सामन्तराजः.

(7) गोदवर्मा—मित्रवर्मणो विजेता.

(8) शुभमतिः—मित्रवर्मणोऽमात्यनन्दनः.

(9) महामतिः—ज्यौतिषिकः.

(10) सेवन्तिका—नायिका (मित्रवर्मणः पुत्री)

(11) सारङ्गिका—सेवन्तिकायाः सखी.

(12) कथावती—बसवेन्द्रमहिष्या भक्ष्यकरङ्कवाहिनी.

(13) लीलावती—बसवेन्द्रमहिषाः सखी.

(14) तारावली—कोशगृहाधिकारिणी (बसवेन्द्रमहिष्याः).

(15) मन्दारिका—मित्रवर्ममहिष्याः कोशगृहाधिकारिणी.

(16) मञ्जरिका
(17) चम्पकलता } —मित्रवर्मणश्चेष्टयौ.

(18) प्रेक्षावती—योगिनी.

(19) निषादेशः—गोदवर्मप्रेरणया सेवन्तिकाया अपहर्ता.

———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुद्धपत्रिका

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
1	11	श्वःश्रेयसास्तु	श्वःश्रेयसायास्तु
5	5	शतांशन	शतांशेन
6	6	मौहर्तिका	मौहूर्तिक
6	14	मौतूर्तिक	मौहूर्तिक
13	4	लता	लत्ता ?
15	20	सङ्गीभूय	सङ्गीभूय
19	1	अभिहिदं	(स्वगतम्) अभिहिदं
26	6	चित्रगतस्य	चित्तगतस्य
29	19	कुलिस्तिष्ठति	कुलितस्तिष्ठति
31	16	सेवन्तिके	सारङ्गिके
46	17	णिहब्भव्वव	णिहब्भव
47	3	कृप्स्यति	कोपिष्यति
56	9	हसस्रं	सहस्रं
105	14	जलैर्मलिनं	दलैरार्द्रीकृतं मलिनं
130	18	कान्याया	कन्याया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीः

सेवन्तिकापरिणयनाटकम्

चोक्कनाथविरचितम् ।

पत्या केलिगृहं चिराय बहुभिः सान्त्वोक्तिभिः प्रापिता
भाषस्वेत्यनुयाचिता शुकवचः श्रुत्वा तदुक्तिभ्रमात् ।
किं किं व्यक्तमुदीरयेति जनितोत्कण्ठेन तेनार्थिता
साचीकृत्य मुखाम्बुजं दिशतु वो गौरी हसन्ती मुदम् ॥

अपि च—

शय्योत्थायमगात्मजा विदधती भूयोऽङ्गभङ्गं तदा
नाभीमूलमुरश्च नाथमसकृत्पश्यन्तमुद्वीक्ष्य सा ।
लज्जानम्रमुखी करेण कुचयोरेकेन कूर्पासकं
संनह्यन्त्यपरेण नीविमपि च श्वःश्रेयसास्तु वः ॥ २ ॥

(नान्द्यन्ते)

सूत्रधारः—मारिष ! इतस्तावत् ।

(प्रविश्य)

पारिपार्श्वकः—भाव ! अयमस्मि ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत्रधारः—इह खलु शतमखपवनसखमुखमखभोजिसमाजसभाजित-चरणसरोजस्य भगवतो विचित्रचरित्रस्य वल्लीकलत्रस्य सुराग्रगण्यस्य सुब्रह्मण्यस्य महोत्सवदर्शनार्थं अङ्गवङ्गकलिङ्ग-बङ्गालनेपालगौलचोल[1]द्रमिड[1]केरलकुरुकुकुरुसिन्धुगान्धारकर्नाट-लाटकरहाटपाण्ड्यपाञ्चालमगधानिषधकरूशकाश्मीरादिनानादेश-समागतनरनारीजनानिवहानिबिडितरथ्यं पृथ्वीतलनेपथ्यं [2]सुब्र-ह्मण्यं नाम [2]नगरम् ।

अत्र च—

चित्रं निर्भरमर्भका विषधरैः खेलन्त्यमी निर्भयाः
स्पष्टोच्छिष्टविशिष्टपत्रपटले शिष्टो जनो वेष्टते ।
कुष्ठापस्मृतिमुख्यरोगहरणा वल्मीकभूरेणवो
वन्ध्या षष्ठ्युपवासपुण्यविभवादाशु प्रसूते सुतान् ॥ ३ ॥

इतः पश्य—

तत्तत्पार्थिवदत्तरत्नरुचिरग्रैवे[3]यहारद्युति[3]-
प्राग्भारप्रकटीकृतात्मविभवाः शिष्यप्रशिष्योज्ज्वलाः ।
गुल्फप्रान्तविलम्बिधौतवसना गण्डस्फुरत्कुण्डलाः
रथ्यासीमनि सञ्चरन्ति बहवो वैदेशिका देशिकाः ।

एतैरहमाहूय समादिष्टोऽस्मि ।

---

[1] द्रविडद्राविड–(ख, ग). [2] सुब्रह्मण्यपुरं नाम–(क). [3] यकादिद्युति–(क, ख).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नानारूपकलाकलापनिपुणो यस्य प्रबन्धा सुधीः
नेता यत्र समस्तभूपमुकुटीसंमानिताज्ञाक्षरः ।
यत्रात्यद्भुतसंविधानमधुरः प्रौढश्च वाचां क्रमः
तेन त्वं नवरूपकेण बहुधा विस्मापयास्मादृशान् ॥ ५ ॥

पारिपार्श्वकः—नवरूपकेणेति विस्मापयेति च व्याहतमेव व्याहृतं वैदेशिकैः, यतः—

पञ्चषाणि विरचय्य पदानि क्वाहमेष भवभूतिकविः क्व ।
कालिदासकविरीतिरभव्येत्यामनन्ति कवयो हि नवीनाः ॥

अत एव कण्ठरवेणाभिहितं नीलकण्ठमखिनापि—"कर्णौ निष्करुणं दहन्ति [1]कवयोऽकस्मादि[1]दानींतनाः" इति ।

सूत्रधारः—मारिष ! मा मैवम्, अचिरानुभूतमपि वृत्तान्तं कथं विस्मृतवानसि ।

तिप्पाध्वरीन्द्रतनयो ननु चोक्कनाथ-
नामा विपश्चिदयमद्भुतनाटकेन ।
सन्तोष्य सद्गुणनिधिं [2]बसवक्षितीन्द्रं[2]
लब्ध्वाधिकां बहुमतिं स्वपुरं प्रयातः ॥ ७ ॥

किंच तदानीमेव तत्सन्निधौ मामाहूय महाराज इत्थमवादीत् ।

पञ्चषदिवसैरेतद्रूपकमभ्यस्य सानुबन्धिजनः ।
अभिनीय भरतदेशिक नन्दय नानाकवीन्द्रसन्दोहम् ॥ ८ ॥

---

[1] कवयस्तस्मादि-(क). [2] मलयक्षितीन्द्रं-(क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पारिपार्श्वकः—(सानुस्मरणम्) व्यासक्तचित्तेन मया विस्मृत्यैवमुदीरितमिदानीम् ।

नानादेशसमागतसुमनोविततेर्मनो विनोदयितुम् ।
तस्यैव तु प्रयोगः प्रभवति सेवन्तिकापरिणयस्य ॥ ९ ॥

भवतु पात्रक्लृप्तिं कथं मन्यते भावः ।

सूत्रधारः—

गृह्णाति पुत्रो मम नेतृभूमिकां
सेवन्तिकायाश्च पितृव्यनन्दनः ।
तस्याः सखीनां गृहिणीसहोदराः
कौषीतकस्य त्वमहं महामतेः ॥ १० ॥

पारिपार्श्वकः — नायकभूमिकापरिग्रहणे साधु नियोजितस्तनूजो भावेन ।

तथाहि—

यस्यौदार्यममर्त्यभूरुहयशोज्योत्स्नापयोदागमः
सौन्दर्यं कुसुमास्त्रकीर्तिनिबिडाहंकाररुद्रेक्षणम् ।
शौर्यं मध्यमपार्थकीर्तिनिगमाम्नायस्य दर्शोदयः
तस्य[1]श्रीबसवेन्द्रभूपति[1]मणेर्गृह्णीत को भूमिकाम् ॥ ११ ॥

---

[1] श्रीमल्लयक्षमापति–(क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच—

वितरणमुखा गुणगणा यस्मिन्निवसन्ति कृतसमयबन्धाः।
अनुकुर्याद्भुवि कस्तव [1]पुत्रादन्यत्र[1]तं महात्मानम् ॥ १२ ॥

सूत्रधारः—

अन्यो वा तनयो वा नैवानुकरोति तं शतांशेन।
भगवान् पिनाकपाणिः साक्षादनुकर्तुमर्हति प्रायः ॥ १३ ॥

पारिपार्श्वकः—प्रासङ्गिकमिदं पृच्छामि, तस्य महोपाध्यायस्य तिप्पाध्वरीन्दोरात्मजानामयं ज्यायानयं कनीयानिति क्रमः कथ्यताम्।

सूत्रधारः—

ज्येष्ठः कुप्पाध्वरीन्द्रस्तदनु तिरुमलः प्राज्ञवर्योऽतिवाग्मी
पश्चाद्ग्रन्थप्रचारप्रकटितधिषणावैभवः[2]स्वामिशास्त्री[2]।
श्रीसीतारामशास्त्री तदनु तदनुजश्चोक्तनाथः सुधीन्द्रः
पश्चाद्यज्ञेश्वराख्यो जितविबुधगुरोस्तस्य पुत्राः षडेते ॥

पारिपार्श्वकः—"पितॄन् समनुवर्तन्ते नरा मातरमङ्गनाः" इति वल्मीकजन्मनो वचनमप्रच्युतार्थकमत्रैवेति मन्ये।

(आकाशे कर्णं दत्त्वा)

अहो भरताचार्यो[3]भवतः[4]पैतृष्वस्रेयो नेपथ्यान्तरे माङ्गलिकमातोद्यं प्रवर्तयति।

---

[1] तनयादन्यत्र-(क. ख.) [2] स्वामियज्वा-(ख. ग.) [3] भगवतः-(ग)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(नेपथ्ये)

तुहिणद्दवालुएहिं तीरेहिं आवआ विसोहंदि।
भअवं वि चंदमा विअ पेक्खिज्जइ अज्ज उज्जंतो ॥
[तुहिनार्द्रवालुकाभ्यां तीराभ्यामापगा विशोभन्ते।
भगवानपि चन्द्रमा इव प्रेक्ष्यते अद्य उद्यन्] ॥१५॥

सूत्रधारः—(आकर्ण्य) गीतिरपि हेमन्तर्तुमधिकृत्यारब्धा। तदेहि गच्छावः। मौहूर्तिकस्य महामतेर्भूमिका मया परिगृह्यते, त्वया च विदूषककौषीतकस्य परिगृह्यताम्। (इति निष्क्रान्तौ)

(प्रस्तावना)

(ततः प्रविशति विदूषकः)

विदूषकः—एदे खु केरळराअपरिअणा किंत्ति संभंता परिदो वि अदब्भा उरब्भा विअ परिब्भमंदि। होदु णं उवसप्पिअ पुच्छिस्सं मोहुत्तिअं। [एते खलु केरलराजपरिजनाः किमिति संभ्रान्ताः परितोऽपि अद्रभ्रा उरभ्रा इव परिभ्रमन्ति। भवत्वेनमुपसृत्य प्रक्ष्यामि मौहूर्तिकम् ।] (इति परिक्रामति)

(प्रविश्य महामतिः पुरो विलोक्य) किमपि चिन्तयन्नत्र निषीदति कौषीतकः।

विदूषकः—(उपसृत्य) महामदे णमो दे। [महामते नमस्ते।]

महामतिः—आयुष्मान्भव।

विदूषकः—एत्थ केरळराअपरिअणपरिब्भमणे णिमित्तं किं जाणासि। [अत्र केरलराजपरिजनपरिभ्रमणे निमित्तं किं जानासि।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महामतिः—इयन्तं कालमपि तत्रत्यवृत्तान्तो भवतो न किमारूढः कर्णपथम् ।

विदूषकः—गोदवम्ममित्तवम्माणं अदिदाळुणं पविदाळणं चळदित्ति एत्तिअमेत्तं मए सुदं अत्थि। [गोदवर्ममित्रवर्मणोरतिदारुणं प्रविदारणं चलतीत्येतावन्मात्रं मया श्रुतमस्ति ।]

महामतिः—तदनन्तरं गोदवर्मणा मित्रवर्मा समरघरणौ जीवग्राहं गृहीतः । तत्रान्तरे राजभवनरक्षिभिः कुलपुत्रैरपत्यकलत्रप्रमुखः स्वजनः सर्वोऽपि मूकाम्बिकानगरमानीय विवेशितः । अद्य त्वेतं वृत्तान्तमुपश्रुत्य महाराजो नूतनभवनप्रदानादिपुरस्सरं तदीयजनं बहुप्रकारं बहुमन्यते ।

विदूषकः—सव्वण्णो महाराओ एव्वं आअरदि त्ति किं एत्थ अच्चरिअं । होदु, कहिं दाणिं तुमं पत्थिदोसि । [सर्वज्ञो महाराज एवमाचरतीति किमत्राश्चर्यम् । भवतु केदानीं त्वं प्रस्थितोऽसि ।]

महामतिः—मूकाम्बिकामहोत्सवदर्शनाय प्रस्थास्यमानेन महाराजेन मुहूर्तविमर्शनाय समाहूतो राजभवनं गच्छामि ।

विदूषकः—(ऊरुयुगलमास्फालयन्नुत्प्लुत्य) साहु महामदे साहु । [साधु महामते साधु ।]

महामतिः- (स्वगतम्) पुच्छविहीनो वानर इवायमालक्ष्यते । (प्रकाशम्) यात्रानिशमनमात्रेण तव किमित्येतावान् प्रहर्षसमुत्कर्षः ।

विदूषकः—मूअंबिआए णिवेदिदं गोहूममण्डआदिअं पडिदिणं ळंभिस्सदि त्ति । [मूकाम्बिकायै निवेदितं गोधूममण्डकादिकं प्रतिदिनं लप्स्यत इति ।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महामतिः—(स्वगतम्)

एतादृशानामुदरंभराणां
वस्त्रेषु रत्नेषु विभूषणेषु।
प्राप्तेषु हर्षो न हि तादृशोऽस्ति
मृष्टान्नलाभे ननु यादृशः स्यात्॥ १६॥

(प्रकाशम्)

कौषीतक! किंचिदभिधास्यामि, तन्मनस्याधेहि।

विदूषकः—(सोत्कण्ठम्) कहेहि। [कथय।]

महामतिः—

मूकाम्बिकापुरमितोऽधिगतस्य राज्ञः
पाणिग्रहो भवति केरलकन्यकायाः।

(इत्यर्धोक्ते)

विदूषकः—देवी णाणुमण्णेदि, किं कहेसि। [देवी नानुमन्यते, किं कथयसि।]

महामतिः—

देवी स्वयं घटयते नृपतेर्विवाहं
पश्याद्भुतं मम वचो न मृषा कदाचित्॥ १७॥

विदूषकः—तळिहि किंचि कज्जं [1] उद्दिसिअ पुच्छामि [1], कहेहि दाव।
[तर्हि किंचित्कार्यं उद्दिश्य पृच्छामि, कथय तावत्।]

---

[1] मणसि कदुअ पुच्छेमि। (ख.ग.) [मनसि कृत्वा पृच्छामि।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महामतिः—(अङ्गुलीभिर्गणयति ।)

विदूषकः—(स्वगतम्) एदाणं देव्वण्णाणं अंगुळिच्छेअणे जोदिसं एव्व विळुत्तं भविस्सदि त्ति मण्णेमि । [एतेषां दैवज्ञानामङ्गुलिच्छेदने ज्योतिषमेव विलुप्तं भविष्यतीति मन्ये ।] (प्रकाशम्) मोहुत्तिअ केत्तिओ विळंबो । [मौहूर्तिक कियान्विलम्बः ।]

महामतिः—

महाराजकटाक्षेण तस्मिन् परिणयोत्सवे ।
भूयानभ्यवहारो मे भूयात्किमिति पृच्छसि ॥ १८ ॥

भूयादेव, महाराजप्रियसुहृदो भवतः किंनाम परिहीयते ।

विदूषकः—अहं वि महाराअसमीवं गदो तुरङ्गं गृण्हिअ अपादआरी गमिस्सम् । [अहमपि महाराजसमीपं गतस्तुरङ्गं गृहीत्वा अपादचारी गमिष्यामि । [(इति निष्क्रान्तः ।)

महामतिः—कौषीतकवचनजालजाललग्नस्य [1]मम महान्विलम्बो[1] जातः । (परितो विलोक्य) अहो सन्ध्यासमयः संवृत्तः । तथाहि—

कूजन्तो निजकोटरैकसविधे भ्राम्यन्ति नीडोद्भवाः
छायां संप्रति पृष्ठतो विपुलयन्नेति प्रतीचीं रविः ।
लक्ष्यालक्ष्यविकीर्णतारकगणं व्योमेदमालक्ष्यते
प्राचीनाचलकन्दरादपि शनैरुज्जृम्भते चन्द्रमाः ॥

---

[1] महान्मे विलम्बो—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच—

अम्भोजानि निमीलितानि सहसा सन्त्यज्य नीलोत्पला-
न्यन्विष्यन्त इव भ्रमन्ति गगने पुष्पंधयाः संहताः ।
सामि स्वादितमञ्जकन्दमधुना निक्षिप्य चञ्चूपुटे
कोकद्वन्द्वमिदं च पङ्कजसरस्तीरे चिरं ध्यायति ॥ २० ॥

तदिदानीमेव राजभवनमुपगत्य मुहूर्तमावेदयामि । (इति निष्क्रान्तः ।)

(मिश्रविष्कम्भः)

(ततः प्रविशति तुरङ्गारूढो मूकाम्बिकानगरसमीपगतः सामात्यो राजा ।)

राजा—([1]तुरगवेगं निरूप्य[1])

अद्य क्षिप्रप्रधावत्तुरगखरखुरन्यासचूर्णीभवद्भू-
निर्यद्धूलीसमूहस्थगितमिह नभोमण्डलं सान्द्ररागम् ।
प्रातः प्राचीनपृथ्वीधरशिखरसमुद्गच्छदम्भोजबन्धु-
प्रत्यग्रत्विट्समूहप्रविततपयसः स्मारयत्यम्बुराशेः ॥

शुभमतिः—महाराज ! नानाविधमहीधरमहीरुहविलोकनविनोदनवि-
मोहितहृदयैरतिविलङ्घितैव गन्तव्या सरणिः सर्वापि ।

[2]अपिच[2]—विभातप्राया विभाति विभावरी—

ध्यायन् भृशं कमलिनीदलमध्यवासी
सायं गृहीतमुखसक्तमृणालदण्डः ।
काङ्क्षन्विवस्वदुदयं प्रविभाति चक्रः
प्रातर्जपन्वटुरिवाद्दतदण्ड एषः ॥ २२ ॥

---

[1] तुरङ्गं निरूप्य—क, ख. [2] किंच—ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच—

निशि क्रीडन्तीनाममरसुदृशामम्बरतले
परीरम्भारम्भत्रुटितगलिता हारमणयः।
विकीर्णा दृश्यन्ते तरुषु कुसुमानीह विपिने
परागस्तद्वक्षोरुहनिपतितं चन्दनरजः ॥ २३ ॥

महाराज! नगराभ्यन्तरमुपगताः स्मः।

नानामणिद्युतिविचित्रितजालकानि
किंचिद्व्यपेतरुचिदीपकदम्बकानि।
व्योमावलम्बिशिखराणि मनोहराणि
हर्म्याणि सम्प्रति पुरो विशदं विभान्ति ॥ २४ ॥

(राजा तुरगादवरुह्य गजारोहणं नाटयति)

शुभमतिः—महाराज! पुरतः पुरमालोक्यताम्,

गृहद्वारं सर्वं नवकनककुम्भैर्विलसितं
पताकाभिर्व्योमस्थलमिदमभिव्याप्तमखिलम्।
विराजन्ते सौधा बहुविधमणीतोरणगणैः
तदद्य त्वां दृष्ट्वा समधिगतहर्षेव नगरी ॥ २५ ॥

(अन्यतो विलोक्य) नटादीनां महाराजमभ्युद्गच्छतामयं कोलाहलो दशापि दिशो मुखरयतीदानीम्। तथाहि—

एषा मद्दलाधिक्कृतिर्द्रुतविलम्बादिक्रमैर्जृम्भते
लीनस्तामनुसृत्य कर्णमधुरस्तालध्वनिः श्रूयते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नृत्यद्वारविलासिनीपदलसन्मञ्जीरमञ्जुस्वन-
स्निग्धः कङ्कणनिस्स्वनैरुपचितः काञ्चीरवस्त्यायाति ॥२६॥

राजा–(पुरो विलोक्य)

सौन्दर्यसारसदनं दाडिमफलबीजपरिलसद्रदनम् ।
राकेन्दौ कृतकदनं जयतितरां वारसुभ्रुवां वदनम् ॥ २७ ॥

किमिदानीमपि प्रियवयस्यः कौषीतको न समागतः. (नेपथ्ये) अविह अविह, जाव एदं मह सरीरावत्थं पिअवअस्सस्स णिवेदेमि । [अविध अविध, यावदेतां मम शरीरावस्थां प्रियवयस्यस्य निवेदयामि] ।

राजा—(आकर्ण्य) कामप्यवस्थामापद्य वयस्योऽयमित एवाभिवर्तते । सखे! सविधमेह्येहि । (ततः प्रविशति विदूषकः)

विदूषकः—(उपसृत्य) जेदु महाराओ । [जयतु महाराजः]

राजा—(विदूषकमवलोक्य ससम्भ्रमम्) सखे ! किमिदानीम् ।

संजातभङ्गचरणो गाढाघातोपघूर्णितकपोलः ।
अधिकोच्छूनपिचण्डो यष्टिं परिगृह्य विकटमायासि ॥

(विदूषकः स्वाङ्गानि पश्यन् सबाष्पनयनस्तिष्ठति)

शुभमतिः—

कथय वयस्य सकौतुकमुन्नतमधिरुह्य भूरुहस्कन्धम् ।
शाखाभङ्गेन त्वं पतितोऽसि किमद्य मेदिन्याम् ॥ २९ ॥

विदूषकः—तं वि कदा वा भविस्सदित्ति ण जाणीअदि । संपदं वुण [तदपि कदा वा भविष्यतीति न ज्ञायते । साम्प्रतं पुनः]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मग्गे दुट्ठतुरंगो बहुविहसव्वावसव्वभमणेहिम् ।
विणिपादिअ चलणेहिं ळत्तं उदरे वि कदुअ पडिआदो ॥
[मार्गे दुष्टतुरङ्गो बहुविधसव्यापसव्यभ्रमणैः ।
विनिपात्य चरणाभ्यां लतामुदरेऽपि कृत्वा प्रतियातः ॥]

शुभमतिः-----वारविलासिनीजनविरचितानेकविधाभिनयदर्शनविनोदेन परिहर शारीरमायासम् ।

पश्य—

वेल्लच्चामरवेणिकं विवलितग्रीवं सलीलेक्षणं
वक्त्राम्भोरुहशोभिघर्मकणिकं सभ्रूलताविभ्रमम् ।
भावानन्तरधिष्ठितानभिनयैर्विस्पष्टमादर्शय-
त्येषा काचन सुन्दरी नयनयोरानन्दमातन्वती ॥ ३१ ॥

विदूषकः—(विलोक्य) एदस्स वारविळासिणीजणस्स सव्वावसव्व-भमणेहिं तं दुट्ठतुरंगं सुमरिअ वेवइ मे हिअअम् । [एतस्य वारविलासिनीजनस्य सव्यापसव्यभ्रमणैः तं दुष्टतुरङ्गं स्मृत्वा वेपते मे हृदयम्] (सर्वे हसन्ति)

शुभमतिः—राजन्! इतो दीयतां दृष्टिः, इदमेव केरलराजकलत्रापत्य-निवासकृते महाराजभवनप्रतिमुखं प्रत्यग्रनिर्मितं भवनम् ।

राजा—[1] (सविस्मयम्) [1] किमत्रैव ते निवसन्ति ।

शुभमतिः—अथ किम् ।

---

[1] सादरम्—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(सौधाग्रं विलोक्य स्वगतम्)

अलिकुललसदलकान्ता
कुवलयदलनीलमसृणनयनान्ता ।
कैषा कुचभरतान्ता
काञ्चनलतिकेव दृश्यते कान्ता ॥ ३२ ॥

किंच—

अभ्यर्णतः संचरतां घनानां
अभ्यन्तरा निर्गलितेव सन्ध्या ।
समुन्नते सौधतले निषण्णा
सरोरुहाक्षी हरते मनो मे ॥ ३३ ॥

(निपुणं निर्वर्ण्य)

पार्ष्णिप्रान्तविलम्बिवेणिलतिकं पारिप्लवप्रेक्षितं
साभिव्यञ्जितदन्तकान्तिविलसन्मन्दस्मितालङ्कृतम् ।
हेमक्षोणिभृदुच्छ्रितस्तनयुगापर्याप्तवक्षस्स्थलं
भूमीभूषणमद्भुतं विजयते कान्ताकृतिव्याजतः ॥३४॥

(विमृश्य)

प्रतिसौधाग्रमारुह्य प्रत्यङ्गं हरिणीदृशः ।
भूयोभूयः समुद्वीक्ष्य चक्षुष्मत्तां कृतार्थये ॥ ३५ ॥

(प्रकाशम्) अमात्यमणे! किमिदानीमपि रथो रथ्यां न परिष्करोति भगवत्याः। यदेतदुदयशिखरिशिखरादुद्गच्छत्यम्बरमणिबिम्बम्,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथाहि—

[1] श्रियं मुषित्वा सरसीरुहिण्याः
कृत्वा विहारं निशि कैरविण्याः ।
गृहीतरश्मिप्रकरे दिनेशे
स्रस्तांशुको धावति यामिनीशः ॥ ३६ ॥

उदितभूयिष्ठमुष्णांशुमुद्वीक्ष्येत्थं मन्ये—

उडुपस्य तिरोधानात्स्वरश्मिस्पर्शमात्रतः ।
तितीर्षति करैरेव तिग्मांशुर्गगनार्णवम् ॥ ३७ ॥

शुभूमतिः—[2] यदाज्ञापयति देवः (इति निष्क्रान्तः)

राजा—(गजादवरुह्य सवयस्यः सौधारोहणं नाटयित्वा पुरः सौधाग्रं विलोक्य)

हारोल्लसत्कुचभरां तरलायताक्षीं
नासामणिद्युतिविशेभिकपोलभागाम् ।
एनां विलोक्य हृदयं परिहृष्यतीव
संमुह्यतीव सजतीव विषीदतीव ॥ ३८ ॥

---

[1] पद्मिन्या निद्रितायाः श्रियमधिरजनीमध्यमिन्दुर्मुषित्वा
दत्वा नीलोत्पलिन्यै विलसति वियति स्वैरमुद्भूतभूतिः ।
सङ्घीभूयेत्थमुच्चैर्दिशि दिशि विविधं कुक्कुटौघे विघुष्य-
त्यथेत्युद्यत्करोऽर्कः स्फुटमिति सभिया धावति स्रस्तपादः ॥३६॥ ख. ग.

[2] अत्र राजाज्ञाया अभावेऽपि यदाज्ञापयतीत्युक्तिः स्वस्य गमनानुज्ञा-प्रार्थनापरा वेदितव्या.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच—

स्फटिकोपलपरिकलिताः
प्रतिमा हर्म्याग्रविनिहिता निखिलाः ।
अदसीयगात्रकान्त्या
सम्प्रतिविलसन्ति कनकमय्य इव ॥ ३९ ॥

विदूषकः—(राजानं विलोक्य स्वगतम्) सोहग्गगदं पुरोवट्ठिणिं वरवण्णिणिं दट्ठूण पिअवअस्सो अदिमेत्तं उत्तमइत्ति मंणेमि, जदो तं एव्व पेक्खन्तो समीवगदं वि मं ण जाणादि. [सौधाग्रगतां पुरोवर्तीनीं वरवर्णिनीं दृष्ट्वा प्रियवयस्यः अतिमात्रमुत्ताम्यतीति मन्ये। यतस्तामेव पश्यन् समीपगतमपि मां न जानाति।] (प्रकाशम्) एदाओ काओ, विचित्तरूववेसा णारीओ तुमं एव्व पेक्खन्तीओ चिट्ठन्दि। [एताः काः, विचित्ररूपवेषा नार्यस्त्वामेव पश्यन्त्यस्तिष्ठन्ति।]

राजा—

केरलदेशाधिपतेः शत्रुगृहीतस्य समरभूमितले ।
अन्तःपुरवासिन्यः कामिन्यो मित्रवर्मणो राज्ञः ॥ ४० ॥

विदूषकः—मए वि एदं सुदं एव्व, एदाओ ताओ त्ति परं ण जाणामि। [मयाप्येतच्छ्रुतमेव, एतास्ता इति परं न जानामि।]

(नेपथ्ये कलकलः)

राजा—(आकर्ण्य) सविधमभ्येति नयनानन्दनः स्यन्दनो भगवत्याः।

विदूषकः—आअदो एव्व। (आगत एव)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(स्वगतम्)

आच्छादयति शताङ्गो
मेचकमणिशोभितो मुखं तस्याः ।
निकुरुम्बमम्बरतले
हिमकरबिम्बं यथाम्बुवाहानाम् ॥ ४१ ॥

(आमूलाग्रं रथं निर्वर्ण्य)

मुहुर्मुहुः कम्पितमस्तकेन
समेतरस्मिन् व्रजता रथेन ।
मन्दाकिनीवारिकणा विधूताः
पतन्ति भूमौ कुसुमापदेशात् ॥ ४२ ॥

(शिरस्यञ्जलिं बध्वा) इदं पुनरिदानीमहमाशासे—

लोकातिशायिनिजवैभवशोभमाना
राकाशशाङ्कमदहुंकरणोद्धता सा ।
पाकारिमुख्यसुरवन्द्यपदारविन्दा
मूकाम्बिका मम करोतु कुतूहलानि ॥ ४३ ॥

वयस्य ! भवतापि समीहितमाशास्यताम् ।

विदूषकः—

पमदं कं वि विचित्तं घडेदु देवी वअस्स तुह दाणिम् ।
तावअकिवावसादो अब्भवहारो भवे मह वि णिच्चम् ॥
[प्रमदां कामपि विचित्रां घटयतु देवी वयस्य तवेदानीम् ।
तावककृपावशादभ्यवहारो भवेन्ममापि नित्यम् ॥ ४४ ॥]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—स्वप्नदशायामपि न विस्मरस्यभ्यवहारम् ।

विदूषकः—अंहाणं बंहणाणं इदो वि किं अण्णं पत्थणिज्जम् । [अस्माकं ब्राह्मणानामितोऽपि किमन्यत्प्रार्थनीयम् ।]

राजा—(स्वगतम्) (विदूषकवचनं विमृश्य) भगवतीमुखेन विचित्र-प्रमदाघटनं प्रार्थयमानेन [1]महिषीमुखेन विचित्रप्रमदाघटनमप्यर्थात्प्रार्थितमासीत् । सत्यमस्तु ब्राह्मणवचनम् ।

(प्रकाशम्)—

भ्राम्यच्चक्राक्रान्तनिष्पिष्टपृथ्वी-
धूलीपालिच्छादिताभ्रस्थलीकम् ।
गत्वा दूरं सत्वरात्स्यन्दनोऽयं
वीथीकोणं प्राप्य विश्राम्यतीव ॥ ४५ ॥

(पुरः सौधाग्रं विलोक्य स्वगतम्)—

भ्रातश्चेतः ! प्राप्यमेवार्थनीयं,
दुष्प्रापेऽस्मिन् मा कृथास्त्वं दुराशाम् ।
चान्द्रं बिम्बं यो धरित्र्यां निषीदन्
हस्तान्तस्थं लिप्स्यते तस्य किं स्यात् ॥ ४६ ॥

किमस्यामनुरागबन्धो वयस्याय प्रकाश्यतामुत नेति संदिग्धे मे हृदयम् । अथवा बालप्रियसुहृदोऽपि किं नाम गोपनीयमस्ति किंचित् । (प्रकाशम्) सखे ! किंचिदिदमिधास्यामि, न बहिस्तत्प्रकाश्यताम् ।

---

[1] अनेन सेवन्तिकापरिणयविषये देव्या वैमुख्यं, अनन्तरमनुकूलया तयैव विवाहसंघटनं च सूच्यते ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—अभिहिदं एव्व, जदो, [अभिहितमेव, यतः,]

दीहळोअणणिसंगगदेहिं भ्रूसरासणविणिगळिदेहिम् ।
[1] रज्जुहिं विअ रहं तुह एसा माणसं [1] हरइ दिट्ठिसरेहिम् ॥
[दीर्घलोचननिषङ्गगतैः भ्रूशरासनविनिर्गलितैः ।
रज्जुभिरिव रथं तवैषा मानसं हरति दृष्टिशरैः ॥ ४७ ॥]

(प्रकाशम्) देविं अन्तरेण कस्स वि ण कहिस्सम् । [देवीमन्तरेण कस्यापि न कथयिष्यामि ।]

राजा —(स्वगतम्) नूनमभिधास्यमानमनेन परिज्ञातम् । (प्रकाशम्) कृतं परिहासेन ।

विदूषकः—कोसीदए वि किंत्ति संकं करेसि । विस्सद्धो कहेहि । [कौषीतकेऽपि किमिति शङ्कां करोषि, विस्रब्धः कथय ।]

राजा—पुरः सौधाग्रे पश्य—

यदि तनुरियं तारा भारायते जगतः परं
यदि कचभरो भृङ्गीभङ्गी न रोहति मे मनः ।
यदि पुनरिदं मध्यं वृद्धिं गताः परमाणवः
यदि च नयने शङ्के पङ्केरुहस्य न चारुताम् ॥ ४८ ॥

किंच इतस्ततः सौधाग्रे संचरन्ती—

परिजनकृतालम्बा बिम्बाधरा मणिमेखला-
रवमुखरितश्रोणिर्माणिक्यभूषणभूषिता ।

---

[1] मंमणिंमहणकंमचणेहिं माणसं—ख. [मर्मनिर्मथनकर्मचणैः मानसं]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृथुकुचभरा रम्भासम्भावनामिह तन्वती
मम नयनयोरेषा योषा करोति कुतूहलम् ॥ ४९ ॥

अस्याः किल—

वेणीलताविलसितापरभागमङ्गं
हारावलीरुचिविराजितपूर्वभागम् ।
भागीरथीयमुनयोरिव सङ्गमेऽस्मिन्
चेतो मिमङ्क्षति सखे सुखलिप्सया मे ॥ ५० ॥

विदूषकः—(स्वगतम्) दिढं खु ळग्गं हिअअं पिअवअस्सस्स। [दृढं खलु लग्नं हृदयं प्रियवयस्यस्य।] (प्रकाशम्) सिद्धसंकप्पस्स तुह मणोणुगुणं एव्व सव्वं हविस्सदि, किं त्ति चिन्तेसि। [सिद्धसंकल्पस्य तव मनोऽनुगुणमेव सर्वं भविष्यति, किमिति चिन्तयसि।]

राजा—सखे! सर्वं भविष्यतीति भद्रं भाषसे—

राज्ञः परिग्रहो वा किं वा तदपत्यमन्यपूर्वा वा।
किमपि वयस्य न जाने मानसमस्यां दृढं समासक्तम् ॥

विदूषकः—अणण्णपुव्वा एव्व कण्णआ एसा, जदो विसुद्धाहिजणस्स तुह एदाइं मणं पवट्टेइ। अदो एव्व कहिदं पुढमकविणा काळिदासेण—"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इति। [अनन्यपूर्वैव कन्यकैषा, यतो विशुद्धाभिजनस्य तवैतस्यां मनः प्रवर्तते। अत एव कथितं प्रथमकविना कालिदासेन।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(नेपथ्ये)

मूअंबिए मह सुदं तुह चळणप्पंदणिवदिदं एदम् ।
अणुरुव्ववळ्ळहेण खिप्पं घडएहि सव्वभौमेण ॥

[मूकाम्बिके मम सुतां तव चरणप्रान्तनिपतितामेताम् ।
अनुरूपवल्लभेन क्षिप्रं घटयस्व सार्वभौमेन ॥ ५२ ॥

विदूषकः—(आकर्ण्य) एदं कण्णअं गण्हिअ जणणीए अणुरुव्ववळ्ळहळाहपत्थणेन मित्तवम्मणो रण्णो कण्णआ एसत्ति णिधारेहि । [एतां कन्यकां गृहीत्वा जनन्या अनुरूपवल्लभलाभप्रार्थनेन मित्रवर्मणो राज्ञः कन्यकैषेति निर्धारय]

राजा—सखे ! कन्यकेति मित्रवर्मण इति च प्रसन्नं मे हृदयम्, अथवा किमनेन निर्धारणेन ।

न्यासीकृतामितरभूपतिना मृगाक्षी-
[1]मेतां[1] प्रसह्य मम भोक्तुमयुक्तमेव ।
सापि स्वकीयजनकस्य विना निदेशं
नोपैति मामिति मनो भजते विकारम् ॥ ५३ ॥

विदूषकः—कोसीदअजीवणावसरे वि किंत्ति चिंतेसि, सव्वं समीकरेमि । [कौषीतकजीवनावसरेऽपि किमिति चिन्तयसि, सर्वं समीकरोमि]

राजा—(स्वगतम्)

स्वप्नदुर्लभमिदं समीहितं
साधयेयमिति सख्युरुक्तिभिः ।

---

[1] मेनां–ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आभिरद्य कथमाश्वसिम्यहं
हन्त पश्चिमधियः खलु द्विजाः ॥ ५४ ॥

विशेषतोऽपि कौषीतकः (प्रकाशम्) त्वादृशं वयस्यं प्रतिलब्धवतः किं नाम[1]परिक्षीयते[1]। भवतु किमस्या नाम जानासि ?

विदूषकः—(स्मरणमभिनीय) सोहारोहणादो पुव्वं वीहीमज्झम्मि कावि केरळदेशस्था चेटी अम्हाणं भट्टिदारिआ सेवंदिआ भट्टिणीए समं अहिरूढा सोहग्गं त्ति केण वि संळ्ळवंती दिट्ठा। ता तक्केमि सेवंदिए त्ति एदाए णामं त्ति [सौधारोहणात्पूर्वं वीथीमध्ये कापि केरलदेशस्था चेटी अस्माकं भर्तृदारिका सेवन्तिका भट्टिन्या सममधिरूढा सौधाग्रमिति केनापि संलपन्ती दृष्टा। तत्तर्कयामि सेवन्तिकेत्येतस्या नामेति।]

राजा—(साभ्युपगमम्) युक्तिक्षममिदं ते वचनम्। अपि च सेवन्तिकेति व्याहरन् अमृतरससेचनेनेव कर्णपुटमाप्याययसि।

विदूषकः—भअवदिं सेविदुं आरोहेमि सोहग्गं त्ति देवीए भणिदम्, ता ओहिदो होदु भवम्। [भगवतीं सेवितुं आरोहामि सौधाग्रमिति देव्या भणितम्, तदवहितो भवतु भवान्।]

राजा—

अमृतविषविमिश्रितै[2]रमुष्याः[2]
कुवलयदामविलासिभिः कटाक्षैः।
अपहृतहृदयोऽहमस्मि तस्मात्
समवहितो भव सम्प्रति त्वमेव ॥ ५५ ॥

(ततः प्रविशति [3]सौधगता[3] ससखीजना देवी)

---

[1] परिहीयते–ख. ग. [2] र्युवत्याः–क. [3] सौधाग्रगता–ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवी—(पुरो विलोक्य) सहि ळीळावदि अय्यउत्तसमीवं मं उवणेहि ।
[सखि लीलावति! आर्यपुत्रसंमीपं मामुपनय ।]

लीलावती—इदो इदो देवी। [इत इतो देवी।].

देवी—(पुरोऽवलोक्य) अय्यकोसीदएण किं वि संळ्ळवंतो अय्यउत्तो एत्थ चिट्ठइ। ता एदाणं रहस्ससंळ्ळावं थंभंतरिदे आकण्णेमो। [आर्यकौषीतकेन किमपि संलपन्नार्यपुत्रोऽत्र तिष्ठति। तदेतयो रहस्यसंलापं स्तम्भान्तरिते आकर्णयावः]
(इति स्तम्भारिते तिष्ठतः)

राजा—

कुम्भोन्नतस्तनभरा नतमध्यभागा
राकानिशाकरनिराकरणोद्यतास्या।
दृष्टैव मे नयनयोर्मुदमातनोति
सेवन्तिका कुसुमवेष्टितवेणिकेयम् ॥ ५६ ॥

देवी—(आकर्ण्य) सेवंदिआणामहेअं कं वि इत्थिअं दट्ठूण अय्यउत्तो एवं वाहरइ। [सेवन्तिकानामधेयां कामपि स्त्रियं दृष्ट्वा आर्यपुत्र एवं व्याहरति।]

विदूषकः—देवीए समाअमणसमअम्मि ण जुत्तो एआरिसो संळ्ळावो।
[देव्याः समागमनसमये न युक्त एतादृशः संलापः।]

लीलावती—देवि तुए भणिदं सच्चं एव्व, अदो एव्व अय्यकोसीदओ तुह समाअमणणिवेदणेण अय्यउत्तं णिअच्छेदि।
[देवि! त्वया भणितं सत्यमेव, अत एवार्यकौषीतकस्तव समागमननिवेदनेनार्यपुत्रं नियच्छति।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवी—(सरोषमुपसृत्य) पकडिदो खु दाणिं अय्यउत्तस्स मइ सिणेहबंधो। [प्रकटितः खल्विदानीमार्यपुत्रस्य मयि स्नेहबन्धः।]

(राजा संभ्रान्तस्तिष्ठति)

विदूषकः—सध्दि होदीए। [स्वस्ति भवत्यै।]

देवी—अय्यउत्त कं इत्थिअं दट्ठूण दिट्ठा एव्व णअणाणं मुदं करेदि त्ति कहिंदवंतो सि। [आर्यपुत्र! कां स्त्रियं दृष्ट्वा दृष्टैव नयनयोर्मुदं करोतीति कथितवानसि।]

(राजा विदूषकं पश्यति)

विदूषकः—(स्वगतम्) इमादो संकटादो कहं वि परित्तादव्वो पिअवअस्सो। (प्रकाशम्) एदं चित्तगदं तुह पडिकिदिं दट्ठूण अय्यउत्तेण एव्वं भणिदम्, तत्थ तत्तहोदीए कोवआसो कोवस्स। [अस्मात्संकटात्कथमपि परित्रातव्यः प्रियवयस्यः। एतां चित्रगतां तव प्रतिकृतिं दृष्ट्वा आर्यपुत्रेणैवं भणितम्, तत्र तत्रभवत्याः कोऽवकाशः कोपस्य।]

देवी—अज्जप्पहुदि सेवंदिए त्ति किं मह णाम कप्पिदम्। [अद्य प्रभृति सेवन्तिकेति किं मम नाम कल्पितम्।]

विदूषकः—(विमृश्य) अय्यउत्तेण सेवंदिए त्ति ण काचिदवि ळळणा कहिदा। अविदु कुसुमविसेसो। [आर्यपुत्रेण सेवन्तिकेति न काचिदपि ललना कथिता, अपि तु कुसुमविशेषः।]

राजा—(स्वगतम्) व्याससमासभेदमभिप्रयता साधु समर्थितं भवता।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लीलावती—देवीए समाअमणणिवेदणेण किं त्ति अय्यउत्तो णिअमिदो त्ति पुच्छिदव्वम्। [देव्याः समागमनिवेदनेन किमित्यार्यपुत्रो नियमित इति प्रष्टव्यम्।]

[1]राजा—(स्वगतम्) अनर्थवादिन्या लीलावत्या दुष्परिहरस्यानुयोगस्य किमुत्तरं दद्यात्?[1]

विदूषकः—एदं [2]संगडं कहं परिहरेमि। (इति ध्यानं नाटयित्वा प्रकाशम्) रहत्थाए देवीए समाअमणं णिवेदिदम्, तत्थ किं तुमं संकेसि। [इदं संकटं कथं परिहरामि? रथस्थाया देव्याः समागमनं निवेदितम्। तत्र किं त्वं शङ्कसे] (इति सदशनदंशं प्रहर्तुमुद्युङ्क्ते)

राजा—(स्वगतम्) कालानुरोधिप्रतिभानवतो न किंचिदपि न सुलभम्। अपि शक्नोषि पुरःस्थमप्यर्थं शशविषाणीकर्तुम्! (प्रकाशम्) किमिति कोप[3]स्तवास्याम्, मुग्धाः खलु युवतयः।

देवी—(स्वगतम्) सद्दच्छळेण वंचिदम्हि। [शब्दच्छलेन वञ्चितास्मि।]

लीलावती—(अपवार्य) किं वि किं वि कहिअ अय्यकोसीदओ अम्हे वंचेदि। सशवहं तुए पुच्छिदव्वम्। [किमपि किमपि कथयित्वा आर्यकौषीतक आवां वञ्चयति। सशपथं त्वया प्रष्टव्यम्।]

देवी—अय्य कोसीदअ सच्चं भणाहि। [आर्य कौषीतक! सत्यं भण।] (इति तृणं च्छित्वा शिरसि प्रक्षिपति)।

---

[1] कपुस्तके नास्ति, [2] संकच्छं—क, [3] तव तस्याम्—क, ख;

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(स्वगतम्) सोवाअणपत्तं मोदअसहस्सं एक्केन हत्थेण बिब्भंतस्स इमिणा तिणेण ण मे अत्थि भारो। [सोपायनपात्रं मोदकसहस्रमेकेन हस्तेन बिभ्रतोऽमुना तृणेन न मेऽस्ति भारः] (प्रकाशम्) चित्तरूवं दट्ठूण एव्वं अय्यउत्तेण भणिदं त्ति सच्चं एदम्। [चित्ररूपं दृष्ट्वा एवमार्यपुत्रेण भणितमिति सत्यमेतत्।].

राजा—(स्वगतम्) चित्रगतस्य रूपस्य चित्रगतायाश्च तस्याः साधारणशब्दं प्रयुञ्जानो भृशं नन्दनीयोऽसि।

देवी—अय्यउत्त मरिसणिज्जं एदम्। [आर्यपुत्र! मर्षणीयमेतत्।]

राजा—निर्हेतुकेन कोपेन भृशं परवशा जातासि।

विदूषकः—(स्वगतम्) इदो वरं एव्वं भणिदुं समत्थो सि। [इतः परमेवं भणितुं समर्थोऽसि।]

राजा—देवि! मध्याह्नसमयः संवृत्तः, मज्जनशालां प्रविशावः।

तथाहि—

अम्बरमणिरयमधुना सत्वरगमनेन भृशपरिश्रान्तः।
क्षणमात्रविश्रमार्थी [1]गोपुरशिखराग्र[1] मधिवसति नूनम्॥

किं च (स्वगतम्)

स्वप्नेऽपि दुर्लभतरं परिचिन्त्य वस्तु
चेतः कठोरमधुना भजते विकारम्।
आरम्भ एव पुरतोऽजनि विघ्न एषः
यत्नः कथं फलमुखो मम संघटेत॥ ५८॥

(इति निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः

---

[1] मणिमयसौधाग्र—ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(ततः प्रविशतः सेवन्तिकायाः सख्यौ)

एका—अइ भट्टिदारिआ कहिं दाणिं चिट्ठइ । [अयि भर्तृदारिका क्वेदानीं तिष्ठति ।]

अन्या—साअंकाळ एव्व किदसअणा किं वि अणत्थं ण जाणासि ? । [सायंकाल एव कृतशयना किमप्यनर्थं न जानासि ।]

एका—अइ किं जादं, कहेहि कहेहि । [अयि किं जातं, कथय कथय ।]

अन्या—(सोद्वेगम्) इदो दिणपंचआदो पुव्वं सोहग्गगदा भट्टिदारिआ अच्चुण्णदगजेंदकंधराहिरूढं पुण्णचंदवअणं [1]बसवेंदणरेंदं[1] दट्ठूण णिट्ठुरकंदप्पवेअणाए समाकुलिदा अदिमेत्तं उत्तंमदी एदं एव्व णरेंदं वळ्ळहं ळंभिदुकामा इदो कोसदूरे वणमज्झम्मि किदाविब्भावं काळिआदेविं पत्थिदुं पडिदिणं पादआरिणी तत्थ गच्छंदि त्ति किं तुए सुदं एदम् । [इतो दिनपञ्चकात्पूर्वं सौधाग्रगता भर्तृदारिका अत्युन्नतगजेन्द्रकन्धराधिरूढं बसवनरेन्द्रं दृष्ट्वा निष्ठुरकन्दर्पवेदनया समाकुलिता अतिमात्रमुत्ताम्यन्ती एतमेव नरेन्द्रं वल्लभं लब्धुकामा क्रोशदूरे वनमध्ये कृताविर्भावां कालिकादेवीं प्रार्थयितुं प्रतिदिनं पादचारिणी तत्र गच्छन्तीति किं त्वया श्रुतमिदम् ।]

एका—अह इम् । [अथ किम् ।]

अन्या—हिओ किळ केण वि णिमित्तण विळंबिअ काळिआळअं गदाए पूजं कदुअ णिअभवणं [2]आगमिस्संदीए[2] अकंड-

---

[1] मळएंदणरेंदं-क. [मलयेन्द्रनरेन्द्रं] [2] आगंदुकामाए-क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विट्ठिरुव्वो पच्चूहो उवट्ठिदो। [ह्यः किल केनापि निमित्तेन विलम्ब्य कालिकालयं गतायाः पूजां कृत्वा निजभवनमागमिष्यन्त्या[1] अकाण्डवृष्टिरूपः प्रत्यूह उपस्थितः।]

एका—[2](सातङ्कम्)[2] तदो तदो। [ततस्ततः]

अन्या—तदणंतरं सारंगिआमंदारिआहिं सहीहिं भट्टिदारिआ काळिआळए एव्व अवट्ठिदा। [तदनन्तरं सारङ्गिकामन्दारिकाभ्यां सखीभ्यां भर्तृदारिका कालिकालय एवावस्थिता।]

एका—पमादो पमादो [प्रमादः प्रमादः]

अन्या—तदो ळद्धावआसा णिसादा णिसामुहे एव्व समागदुअ विसादसमाकुळिदमाणसं भट्टिदारिअं गण्हिअ पळाइदा। [ततो लब्धावकाशा निषादा निशामुख एव समागत्य विषादसमाकुलितमानसां भर्तृदारिकां गृहीत्वा पलायिताः।]

एका—अच्चाहिदं अच्चाहिदम्। [अत्याहितमत्याहितम्।]

अन्या—तदाणिं एव्व काळिआपूजएण देव्वळएण राअभवणसमीवं समागदुअ अअं उत्तंतो साविदो। तदणंतरं भट्टिदारिअग्गहणउत्तंतणिसमणमेत्तेण सोहग्गसइदो महाराओ करगहिदकरवाळो झत्ति बही णिग्गदुअ अदिजवणतुरंगमसमारूढो काळिआळअसमीवं गदो। [तदानीमेव कालिकापूजकेन देवलकन राजभवनसमीपं समागत्यायं वृत्तान्तः श्रावितः। तदनन्तरं भर्तृदारिकाग्रहणवृत्तान्तश्रवणमात्रेण सौधाग्रशयितो महाराजः करगृहीतकरवालो झटिति बहिर्निर्गत्य अतिजवनतुरङ्गमसमारूढः कालिकालयसमीपं गतः।]

---

[1] आगन्तुकामायाः. [2] साशङ्कम्—क, ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एका—तळिहि दाणिं एव्व भट्टिदारिअं पेक्खिस्सामो, किं त्ति चिंतेसि, समस्ससिहि समस्ससिहि । [तर्हीदानीमेव भर्तृदारिकां प्रेक्षिष्यावः, किमिति चिन्तयसि, समाश्वसिहि समाश्वसिहि] (स्मृतिमभिनीय सोत्कण्ठम्] अइ भट्टिदारिआदंसणाणंतरवुत्तं महाराअवुत्तंतं किं जाणासि ।[अयि भर्तृदारिकादर्शनानन्तरवृत्तं महाराजवृत्तान्तं किं जानासि ।]

अन्या—अह इं । [अथ किम् ।]

एका—कहेहि कहेहि । [कथय कथय]

अन्या—सोहग्गगदभट्टिदारिआमुहचंदसंदंसणादो पहुदि [1] ममह-[1] करगदकंमुअविगळिदमंमविभेअणमग्गणजाळविणिमिदपंजररुद्धो णरेंदो मिएंदो विअ कहं एणं एणसावच्छिं वसीकदुअ किदी होम्मि त्ति चिंतअंतो बिसपण्डरेण सरीरेण सोमसेहरं अणुअरंतो चिंताकुळिदो [2] चिट्ठदि त्ति [2] अय्यकोसीदएण णिअभहिणीए कहावदीए काहिदम् , ताए उण मझ समक्खं भट्टिदारिआए । [सौधाग्रगतभर्तृदारिकामुखचन्द्रसंदर्शनात्प्रभृति मन्मथकरगत-कार्मुकविगलितमर्मविभेदनमार्गणजालविनिर्मितपञ्जररुद्धो नरेन्द्रः मृगेन्द्र इव कथमेनामेणशावाक्षीं वशीकृत्वा कृतीभविष्यामीति चिन्तयमानो बिसपाण्डरेण शरीरेण सोमशेखरमनुकरन् चिन्ता-कुलिस्तिष्ठतीत्यार्यकौषीतकेन निजभगिन्यै कथावत्यै कथितम् , तया पुनर्मम समक्षं भर्तृदारिकायै ।]

एका—(सवितर्कम्) एसा कहावदी अय्यकोसीदअस्स किं बहिणी । जा भट्टिदारिआए भक्खविसेसं पडिदिणं आणीअ पअच्छेदि ।

---

[1] वंमह–ख. [2] चिट्ठइ त्ति–ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[एषा कथावती आर्यकौषीतकस्य किं भगिनी। या भर्तृदारिकायै भक्ष्यविशेषं प्रतिदिनमानीय प्रयच्छति।]

अन्या—अह इम्। [अथ किम्।]

एका—तळिहि संजादपरप्पराणुराअबंधाणं भट्टिदारिआणरेंदाणं सअं एव्व संघडणं हविस्सदि। किं अ अय्यकोसीदअमुहेण महाराअवुत्तंतं भट्टिदारिआए, कहावदीमुहेण भट्टिदारिआवुत्तंतं महाराअस्स वि परिण्णादुं साहु अणुकूळिदं देव्वेण। [तर्हि सञ्जातपरस्परानुरागबन्धयोः भर्तृदारिकानरेन्द्रयोः स्वयमेव संघटनं भविष्यति। किं च आर्यकौषीतकमुखेन महारजवृत्तान्तं भर्तृदारिकायाः, कथावतीमुखेन भर्तृदारिकावृत्तान्तं महाराजस्यापि परिज्ञातुं साध्वनुकूलितं दैवेन।]

अन्या—ळद्धजीविदा आअच्छदु भट्टिदारिआ। संपदं उण भट्टिणी किं करेदि त्ति जाणीमो। [लब्धजीविता आगच्छतु भर्तृदारिका। साम्प्रतं पुनः भट्टिनी किं करोतीति जानीवः।]

(इति निष्क्रान्ते)

(प्रवेशकः)

(ततः प्रविशति कालिकालयसमीपगतो राजा ससखीजना सेवन्तिका च)

राजा— (सेवन्तिकां विलोक्य)

गता भीतिर्भीरु प्रतिभयनिषादौघजनिता
वयस्यां पश्यैनां वरतनु समुन्मील्य नयने।
तदेतत्त्वं कालीभवनमुपयातासि शनकैः
प्रकम्पं गात्रे च त्यज निजजनक्लेशजनकम् ॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(सेवन्तिका चक्षुषी उन्मील्य सारङ्गिकां पश्यति)

सारङ्गिका—(स्वगतम्)

परिगहिदभट्टिदारिआ-
पाणिकमळं महाराअम् ।
करगहिदरदिं विअ मंमहं
पेक्खिअ अदिमेत्तं मुदिदहिअअम्हि ॥

[परिगृहीतभर्तृदारिका-
पाणिकमलं महाराजम् ।
करगृहीतरतिमिव मन्मथं
प्रेक्ष्यातिमात्रं मुदितहृदयास्मि ॥ २ ॥]

(प्रकाशम्) हळा सेवन्दिए सक्कसमविक्कमस्स [1]मलएंद[1] चक्कवत्तिणो करंबुजं ओळंबिअ वि किंत्ति सज्झसं ण मुंचेसि । [हला सेवन्तिके! शक्रसमविक्रमस्य मलयेन्द्रचक्रवर्तिनः कराम्बुजमवलम्ब्यापि किमिति साध्वसं न मुञ्चसि ।]

सेवन्तिका—[2]सहि[2] सारंगिए मं दिढं परिस्सजेहि । सखि सेवन्तिके! मां दृढं परिष्वजस्व ।

राजा—

निषादकुलवित्रस्तां विषादाकुलमानसाम् ।
आश्वासय सखीमेनां निःश्वासमलिनाधराम् ॥ ३ ॥

(इति सारङ्गिकाहस्ते सेवन्तिकाहस्तं निक्षिपति)

(सारङ्गिका परिष्वज्य तामङ्कमारोपयति)

---

[1] बसवेंद । [बसवेन्द्र] ख, ग. [2] अइ—[अयि] ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(सेवन्तिकां दृष्ट्वा)—

उन्मील्याक्षि समीक्षते सचकितं भीरुः समस्ता दिशः
वारं वारमकाण्ड एव रभसादाश्लिष्यति स्वां सखीम् ।
आहूतापि न भाषते कथयति स्वच्छन्दमन्या गिरः
त्रस्ताया अपि चेष्टितं विजयते संजीवनं मे दृशोः ॥ ४ ॥

सेवन्तिका—(प्रकृतिस्थं राजानं विलोक्य स्वगतम्) उवकिदं खु मह णिसादेहिं, जदो विवित्तप्पदेसे अंगंगसंमेळणपुरोसरो महाराएण समागमो जादो । [उपकृतं खलु मम निषादैः, यतो विविक्त-प्रदेशे अङ्गाङ्गसम्मेलनपुरस्सरो महाराजेन समागमो जातः ।] (अपवार्य) सहि सारंगिए इमिणा महाराएण मह किदे केत्तिअं साहसं उवक्कंदम्, पेक्ख, एक्को एव्व रअणीमज्झम्मि खग्ग-पाणी विणिग्गदो । [सखि साराङ्गिके ! अनेन महाराजेन मम कृते कियत्साहसमुपक्रान्तम्, पश्य, एक एव रजनीमध्ये खड्गपाणिर्विनिर्गतः ।]

साराङ्गिका—एदस्स [1]महाराअस्स[1] अणुकंपाविसेसेण अम्हेहिं पुणो दंसणभागहेअं उवळद्धम् । [एतस्य महाराजस्यानुकम्पाविशे-षेणास्माकं पुनर्दर्शनभागधेयमुपलब्धम् ।]

राजा—(पुरतो विलोक्य) गृहीतदण्डकाष्ठः सत्वरमभ्येति वयस्यः कौषीतकः ।

(ततः प्रविशति यथानिर्दिष्टो विदूषकः)

विदूषकः—(उपसृत्य) जेदु महाराओ । [जयतु महाराजः ।]

---

[1] महाभाअस्स [महाभागस्य]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—

निःश्वसन्नभिपतन् समुत्पतन्
दण्डकाष्ठमवलम्ब्य सत्वरम् ।
साधयन्निव महत्समीहितं
संभ्रमेण किमिहागतो भवान् ॥ ५ ॥

विदूषकः—(सोच्छ्वासगद्गदम्)

सेवंदिअं णिसादा
रअणीमज्झम्मि गण्हिअ गदत्ति ।
सोदूण ता विणिज्जिअ
समाअदो हं इमं णिवट्ठेदुम् ॥

[सेवन्तिकां निषादा
रजनीमध्ये गृहीत्वा गता इति ।
श्रुत्वा तान् विनिर्जित्य
समागतोऽहमिमां निवर्तयितुम् ॥ ६ ॥]

सारङ्गिका—(सस्मितम्) पच्चत्थिणिसादविअअसाहणं पहळणं साहु गहीदं होदा । [प्रत्यर्थिनिषादविजयसाधनं प्रहरणं साधु गृहीतं भवता ।]

विदूषकः—बंहणकुळउत्तो वसिट्ठो एक्केण दंडकट्ठेण गाहिणंदणस्स बंहत्थप्पमुहाइ [1]सव्वत्थाइ[1] णिरत्थाइ किदवंतो त्ति कदा वि किं तुए णाकण्णिदम् । [ब्राह्मणकुलपुत्रो वसिष्ठ एकेन दण्डकाष्ठेन गाधिनन्दनस्य ब्रह्मास्त्रप्रमुखानि सर्वास्त्राणि निरर्थकानि कृतवानिति कदापि किं त्वया नाकर्णितम् ।]

---

[1] समत्थाइ अत्थाइ [समस्तान्यस्त्राणि]—ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका--तारिसं किळ तत्तहोदो वि बंहणत्तणम्। [तादृशं किल तत्र भवतोऽपि ब्राह्मणत्वम्।]

विदूषकः--अमित्तेहिं अवट्ठादव्वं, मह विक्कमो वि दट्ठव्वो। [अमित्रैरवस्थातव्यं, मम विक्रमोऽपि द्रष्टव्यः।]

सारङ्गिका—एआरिसो तुमं तदाणिं एव्व किं त्ति ण णिग्गदो सि। [एतादृशस्त्वं तदानीमेव किमिति न निर्गतोऽसि।]

विदूषकः—किं करेमि, वाणराणं विअ णिसामुहे मह णअणपाडवं णत्थि। [किं करोमि, वानराणामिव निशामुखे मम नयनपाटवं नास्ति।] (सर्वे हसन्ति)

सेवन्तिका--सहि सारंगिए को एसो महाभाअस्स पेमभाअणम्। [सखि सारङ्गिके क एष महाभागस्य प्रेमभाजनम्।]

सारङ्गिका--अम्हाणं कहावदीए भादा अय्यकोसीदओ। [अस्माकं कथावत्याः भ्राता आर्यकौषीतकः।]

सेवन्तिका--(सानुस्मरणम्) सोहग्गे महाराएण किं वि रहस्सं संळवंतो दिट्ठो एव्व एसो। [सौधाग्रे महाराजेन किमपि रहस्यं संलपन् दृष्ट एवैषः।]

विदूषकः--अइ सारंगिए तुम्हाणं भट्टिदारिआ पकिदिट्ठा किं जादा। [अयि सारङ्गिके! युवयोर्भर्तृदारिका प्रकृतिस्था किं जाता?]

सारङ्गिका--अह इम्। [अथ किम्।]

विदूषकः--(उपसृत्य) सत्थि होदीए। [स्वस्ति भवत्यै।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(सेवन्तिका लज्जां नाटयति ।)

राजा—

दरविकसदधरकिसलय-
विलसितमन्दस्मिताञ्चितदृगन्ता ।
पश्यन्ती सुदती मा-
मभिनयति रतीशनाटकं किमपि ॥ ७ ॥

विदूषकः—इमस्सिं दिणम्मि वअस्ससंणिहाणे एव्व काळिआपूअणं कदुअ घरअं पडिट्ठेहि । [अस्मिन्दिने वयस्यसन्निधान एव कालिकापूजनं कृत्वा गृहं प्रतिष्ठस्व ।]

सारङ्गिका—सच्चं एव्व कोसीदओ भणादि, तुवरेहि दाव । [सत्यमेव कौषीतको भणति, त्वरस्व तावत् ।]

सेवन्तिका—तळिहि पुक्खरिणीसळिळे ओगाहिअ आअच्छम्हि । [तर्हि पुष्करिणीसलिलेऽवगाह्यागच्छामि ।]

(इति निष्क्रम्य दुकूलपरिधाना पुनः प्रविशति)

राजा—(सेवन्तिकां दृष्ट्वा)—

पृथुतरनितम्बलम्बि-
स्नपनान्तनिबद्ध[1]कुन्तलार्धमिदम् [1] ।
व्रतसमयोचितमेत-
द्विलसति गात्रं दुकूलसंवीतम् ॥ ८ ॥

---

[1] कुन्तलान्तमिदम्—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—सहि सारङ्गिए पूजोपकरणाइ उवणेहि । [सखि सारङ्गिके पूजोपकरणान्युपनय ।]

(सारङ्गिका आनयति)

(सेवन्तिका ससखीजना गर्भमण्टपप्रवेशं नाटयति ।)

राजा—वयस्य स्तम्भान्तरितावनयोः पूजाक्रमं पश्यावः ।

(इति तथा कुरुतः ।)

(सेवन्तिका पुष्पाण्यादाय ध्यानं नाटयति)

राजा—(सेवन्तिकां दृष्ट्वा)

[1] मन्त्रोच्चारणकालमन्थरचलद्बन्धूकशोणाधरं
ध्यानस्थेमनिमीलदक्षियुगलं निश्चेष्टितभ्रूलतम् ।
कुम्भस्पर्धिपृथुस्तनद्वयनमत्पूर्वाङ्गमर्चाविधौ
दुर्लेखं प्रतिभात्यवस्थितमिदं चित्रेऽपि वामभ्रुवः[1] ॥९॥

(पुनर्निर्वर्ण्य) वयस्य पश्य—

[2] कालीपदाम्बुरुहयुग्मसमर्चनाय
पुष्पाञ्जलिर्धृतविलासमुदञ्चितोऽयम् ।
पङ्केरुहायतदृशो विषमायुधीय-
तूणीरसाम्यधियमातनुते नितान्तम्[2] ॥ १० ॥

---

[1] तत्तन्मन्त्रोच्चारणसमयचलद्बिम्बशोणाधरोष्ठं
ध्यानस्थेमार्धसंमीलितनयनयुगं निश्चलभ्रूलतान्तम् ।
हेमक्षीणीभृदुच्चस्तनयुगलनमत्पूर्वकायं सपर्या-
काले नालेख्यमस्याः स्थितमतुलमिदं भाति चित्रेऽपि भीरोः ॥—ख. ग.

[2] कालीपदाम्भोरुहपूजनाय पुष्पाञ्जलिर्नूनमुदञ्चितोऽयम् ।
पङ्केरुहाक्ष्याः प्रसवायुधीयतूणीरसादृश्यमतिं तनोति[2] ॥—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—वअस्स पच्चत्थिणिसादकुले पळाइदेऽवि सज्जीकिदसरणिसंगो अणंगो उवट्ठिदो। ता पच्चुवआरकिदमदीए सेवंदिआए अणंगरिवुसआसादो तुमं मोअणिज्जो। [वयस्य प्रत्यर्थिनिषाद-कुले पलायितेऽपि सज्जीकृतशरनिषङ्गः अनङ्ग उपस्थितः। तस्मात्प्रत्युपचारकृतमत्या सेवन्तिकया अनङ्गरिपुसकाशात्त्वं मोचनीयः।]

सारङ्गिका—जहविहिविहिदं खु देवदाराहणम्। अहिमदवरळाहकिदे अंगीकरेहि संगीदअम्। [यथाविधिविहितं खलु देवताराधनम्। अभिमतवरलाभकृते अङ्गीकुरुष्व सङ्गीतकम्।]

राजा—

रूपविलोकनसफले
मा भूदक्षान्तिरक्षियुगले ते।
सङ्गीतनिशमनेन
त्वमपि श्रुतियुगल सफलतामेषि ॥ ११ ॥

सेवन्तिका—(वीणामादाय गायति।)

भअवदि देवि णमो दे
पणमंतजणस्स पारिजादळदे।
[1]मलएंद[1]सव्वभौमं
णाहं मह देहि मंमहसरूवम् ॥ १२ ॥

---

[1] वसवेंद [वसवेन्द्र]—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[भगवति देवि नमस्ते
प्रणमज्जनस्य पारिजातलते ।
मलयेन्द्रसार्वभौमं
नाथं मम देहि मन्मथसरूपम् ॥ १२ ॥]

विदूषकः—पकडिदं खु एदाए णिअहिअअम्, ता मह भहिणीए कहावदीए कहिदं सव्वं सच्चं मण्णेहि । [प्रकटितं खल्वेतया निजहृदयम्, तस्मान्मम भगिन्या कथावत्या कथितं सर्वं सत्यं मन्यस्व ।]

राजा—(सहर्षरोमाञ्चम्)

[1]तन्त्रीवादनखेलनोचितनखव्यापारभव्यौ करौ
मन्दान्दोलितकर्णपाशमसृणं रागप्रयोगे मुखम् ।
बालायाः स्वरमाधुरी सुघटिता ताले लये च श्रुतौ
तस्मादेतदधीनमेव कलये गान्धर्वतन्त्रं सखे[1] ॥ १३ ॥

(सकरुणम्)

वनभुवि पदचारमाचरन्ती
स्नपनमुखं व्रतसाधनं विधाय ।
मम हृदयमजानती वृथा त्वं
व्यथयसि कोमलमन्वहं शरीरम् ॥ १४ ॥

---

[1] पाणी वीणागुणास्फालनकुशलनखव्यापृतिव्याप्तिभव्यौ
वक्त्रं रागप्रयोगावसरमृदुचलत्कर्णपाशाभिरामम् ।
सज्जा षड्जादिससस्वरसुमधुरता तालभेदी च तस्माद्
तन्त्र्या गान्धर्वतन्त्रं निखिलमपि परिक्रीतमेवेति मन्ये[1] ॥—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुदृशो मय्यनुरागं
बुद्ध्वा[1] भूयोऽपि तप्यते हृदयम्।
लब्धान्तरः स्मरोऽपि
प्रहरति मर्माणि मार्गणैर्निशितैः ॥ १५ ॥

विदूषकः—एदाए करंबुजं [1]ओळंबस्व[1]। [एतस्याः कराम्बुजमवलम्बस्व।]

राजा—अलमलमविवेकमूलेन मूर्खालापेन। एवं खलु नयकोविदा उदाहरन्ति—"कविता वनिता चैव स्वयमेवागता वरा"[2] इति।

सेवन्तिका—सहि सारंगिए मह पआसं सहळं किं करिस्सदि भअवदी। [सखि सारङ्गिके! मम प्रयासं सफलं किं करिष्यति भगवती।]

विदूषकः—वअस्स अदिभूमिं गदं एदाए उक्कंठं पेक्ख। [वयस्य! अतिभूमिं गतामेतस्या उत्कण्ठां पश्य।]

सारङ्गिका—सहि वरप्पदाए काळिआए [3]भअणं[3] ण कस्स वि विहळं संजादम्। [सखि! वरप्रदायाः कालिकाया भजनं न कस्यापि विफलं संजातम्।]

सेवन्तिका—सो महाणुहावो मइ किदाणुराओ ण वेत्ति संकेदि मे हिअअम्। [स महानुभावो मयि कृतानुरागो न वेति शङ्कते मे हृदयम्।]

---

[1] ओळंबेहि इति स्यात्. [2] "बलादाकृष्यमाणा चेत् सरसा विरसा भवेत्" इति श्लोकशेषः। [3] भद्दणं[3]—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

साराङ्गिका—सहि सोहग्गगदाए तुह मुहचंदसंदंसणप्पहुदि सव्वंग-विसप्पिदहणकप्पाणप्पकंदप्पजुरवेअकिसबिसंपडरसरीरो अदि-मेत्तं उत्तमइत्ति अय्यकोसीदएण कहिदं त्ति कहावदी[1]मुखादो सुदं[1] किं विसुमरिदं आसि। [सखि! सौधाग्रगतायास्तव मुखचन्द्रसंदर्शनप्रभृति सर्वाङ्गविसर्पद्दहनकल्पानल्पकन्दर्पज्वर-कृशबिसपाण्डरशरीरोऽतिमात्रमुत्ताम्यतीति आर्यकौषीतकेन कथितमिति कथावतीमुखाच्छ्रुतं किं विस्मृतमासीत्।]

सेवन्तिका—ताए वअणम्मि ण मे वीसासो। [तस्या वचने न मे विश्वासः।]

साराङ्गिका—(सरोषम्) जइ एव्वं ळज्जं विणिज्जिअ महाराअस्स सरीरं पेक्ख। [यद्येवं लज्जां विनिर्जित्य महाराजस्य शरीरं पश्य।] (इति सेवन्तिकां बहिर्गृहीत्वा गच्छति)

विदूषकः—(राजानं हस्ते गृहीत्वा उपसृत्य) सहि सारंगिए किं त्ति बही गच्छसि, एत्थ एव्व चिट्ठइ मह पिअवअस्सो। [सखि सारङ्गिके! किमिति बहिर्गच्छसि, अत्रैव तिष्ठति मम प्रियवयस्यः।]

सेवन्तिका—[विवलितग्रीवं राजानं विलोक्य सलज्जं अपवार्य] सहि सारंगिए अम्हाणं वअणं सव्वं सुदं महाभाएण, ता मह चावळं सव्वं वि दाणिं पकडिदं त्ति अत्तणो विळज्जेमि। [सखि सारङ्गिके! आवयोर्वचनं सर्वं श्रुतं महाभागेन, तस्मान्मम चापलं सर्वमपीदानीं प्रकटितमित्यात्मनो विलज्जे।]

---

[1] मुहादो सच्चं सव्वं सुदं (ग) मुखात् सत्यं सर्वं श्रुतं.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—विप्पळंभमग्गेण अम्हाणं रहस्संसळ्ळावं सुदवंतस्स तत्तहोदो किं अण्णं विसेसदो मए णिवेदणिज्जम्, तह वि एत्ति-अमेत्तं भणामि, मणोहवसिळीमुहणिरंतरळक्खभूदाइं एदाइं अणुअंपेदु झत्ति तत्तभवं त्ति। [विप्रलम्भमार्गेणावयो रहः-संलापं श्रुतवतस्तत्रभवतः किमन्यद्विशेषतो मया निवेदनीयम्, तथाप्येतावन्मात्रं भणामि, मनोभवशिलीमुखानिरन्तरलक्ष्यभूता-यामेतस्यां अनुकम्पयतु, झटिति तत्रभवानिति।]

विदूषकः—किदाणुअंपो एव्व मह वअस्सो, तुह सहीए उण विळंबी-अदि। [कृतानुकम्प एव मम वयस्यः, तव सख्या पुनर्वि-लम्ब्यते।]

सारङ्गिका—अय्यकोसीदअ कहावदीमुहादो सव्वं वि णिसमिअ अजाणंतो विअ किं कहेसि। [आर्यकोषीतक कथावती-मुखात्सर्वमपि निशम्य अजानन्निव किं कथयसि?]

विदूषकः—मह मुहादो सव्वं सोदूण तुमं एव्वं कहं कहेसि। [मम मुखात्सर्वं श्रुत्वा त्वमेवं कथं कथयसि?]

राजा—

मयीयमनुरक्ताहमस्या वश्यस्तथापि तु।
सस्यपाक इवात्रापि समयः कोऽपि साधकः॥ १६॥

(नेपथ्ये)

अइ सारंगिए भट्टिदारिअं भट्टिणी पेक्खिदुं तुवरेदि, किं त्ति विलंबेसि, एहि गच्छम्हि। [अयि सारङ्गिके! भर्तृदारिकां भट्टिनी प्रेक्षितुं त्वरते, किमिति विलम्बसे, एहि गच्छामः।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—सहि सारंगिए जणणीए सहअरी पहावदी बही आगदुअ वाहरइ। एहि घरअं पडिट्ठेमो। [सखि सारङ्गिके! जनन्याः सहचरी प्रभावती बहिरागत्य व्याहरति, एहि गृहं प्रतिष्ठावः।]

सारङ्गिका—जेदु महाराओ, घरअं गच्छंतिं सहिं अणुजाणीहि। [जयतु महाराजः, गृहं गच्छन्तीं सखीमनुजानीहि।]

राजा—सखि! साध्यतां पुनर्दर्शनाय।

(सेवन्तिका साकूतस्मितं राजानं पश्यन्ती सारङ्गिकया सह निष्क्रान्ता)

राजा—[1] (नायिकां[1] दृष्ट्वा)

मन्दं गच्छति तिष्ठति क्षणमथ व्यावर्तयत्याननं
[2]साकूतास्मितमीक्षते कलयति स्मेरं मुखाम्भोरुहम्[2]।
स्कन्धे बाहुलतां निवेश्य वलितां सख्या रहो भाषते
किं वक्ष्यामि [3]सखे[3] प्रसह्य [4]हृदयं[4] सैषा समाकर्षति॥

किंच—

चाम्पेयप्रतिमं व्यलोकि न मया सम्यङ्नताङ्ग्या वपुः
संलापो न मिथो व्यधायि मधुरो नाङ्गाङ्गसंमेलनम्।

(आत्मनि सावज्ञम्)

हन्ताभ्यर्णजुषापि किं कृतमिदं नीतिं हतां ध्यायता
भूयोऽपि क्वनु सुन्दरी मिलतु सा देशे विविक्ते मम॥

---

[1] सेवन्तिकां–ग' [2] दीना पश्यति लोचनान्तरगतं बाष्पं निरुन्धे ततः–ख.ग. [3] मनः–ग. [4] सुदती–ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(सवितर्कं) सखे ! किं करोमि ?

चन्द्रः स्फुलिङ्गनिकरान्विकिरेन्निशासु
कर्णौ दहेत्परभृतप्रकरप्रणादः ।
संदीपयेदपि पटीरसमीरणोऽसौ
पापी च मां प्रतिदिनं प्रहरेदनङ्गः ॥ १९ ॥

विदूषकः—(स्वगतम्) कहं एसो पिअवअस्सो पज्जवट्ठावणिज्जो । [कथमेष प्रियवयस्यः पर्यवस्थापनीयः ?] (प्रकाशम्) एदं काळिआळअपरिसरोववणं पविसिअ तंतं विणोदं विळोअअंतो अत्ताणं[1] विणोदेहि[1] । [एतत्कालिकालयपरिसरोपवनं प्रविश्य तंतं विनोदं विलोकयन्नात्मानं विनोदय ।]

राजा—यदभिरुचितं वयस्याय ।

विदूषकः—इदो इदो आअच्छदु भवम् । [इत इत आगच्छतु भवान् ।]

राजा—(उपवनप्रवेशं नाटयित्वा समन्तादवलोक्य)

बन्धूकवारिरुहगन्धफलीप्रवाल-
नीलोत्पलस्तबकभृङ्गकुलं विलोक्य ।
तस्या मुहुः प्रकृतिकोमलमङ्गमङ्गं
स्मृत्वा मनो विकृतिमेति सखे सखेदम् ॥ २० ॥

---

[1] विणोदेदु तत्तभवम् । [विनोदयतु तत्रभवान्]—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषक :—(स्वगतम्) इमस्स उक्कंठावणअणं कहं कादव्वं त्ति चिंता-संततिसंतत्तस्स मह वअस्सोववणप्पवेसणं णिगळादो उवरि दारुबंधणं विअ समावदिदम्। [एतस्योत्कण्ठापनयनं कथं कर्तव्यमिति चिन्तासन्ततिसंतप्तस्य मम वयस्योपवनप्रवेशनं निगलादुपरि दारुबन्धनमिव समापतितम्।] (इति विचिन्त्य) केण वि ववदेसेण उक्कंठं अवणेमि। [केनापि व्यपदेशेनोत्कण्ठामपनयामि।] (प्रकाशम्) वअस्स पुप्फिणीए ळदाए पडिबिंबसणाहं आळवाळभाअणसंपुण्णं मअरंदघिदं पडिग्गहिअ महुअरद्दिजा परिदो वग्गंदि। [वयस्य! पुष्पिण्या लतायाः प्रतिबिम्बसनाथं आलवालभाजनसम्पूर्णं मकरन्दघृतं प्रतिगृह्य मधुकरद्विजाः परितो वल्गन्ति।]

राजा—अये! तिर्यक्षु च स्वजातिधर्मानारोपयसि। (विचिन्त्य)

अधिके दृशौ मृगदृशः
शम्बरमथनस्य हव्यवाहास्त्रात्।
स्मरणेनैव तयोर्मम
सन्तापो हन्त जायते वपुषि ॥२१॥

विदूषकः—इदो पेक्खदु भवम्, रोमसंगीए बंमणीए विअ अहं वणप्पिआए सह वणप्पिओ विहरेमि। [इतः पश्यतु भवान्, रोमशाङ्ग्या ब्राह्मण्या इवाहं वनप्रियया सह वनप्रियो विहरामि।]

राजा—(विलोक्य) अहो मन्मथसार्वभौमस्य सार्वत्रिको नियोगः, पश्य—

छायां विधाय सपदि स्तबकैरनेकै-
राच्छिद्य नूतनरसालतरुप्रवालम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चञ्चूपुटे परभृतो विनिधाय निद्रा-
भङ्गं प्रतीक्ष्य निकटे वसति प्रियायाः ॥ २२ ॥

(सवितर्कं विचिन्त्य)

[1] पञ्चेषुमोषकविनिर्गमसूचकेन
विष्वग्वनप्रियकुहूनिनदेन घुष्टाः ।
वासन्तिकीरपनयन्ति कथं त्रियामाः
भीतिं गता विरहिणोऽद्य सहायहीनाः ॥[1] २३ ॥

(सर्वतः परिक्रामन् सहर्षम्)

पश्यामि तां प्रतिमहीरुहमानताङ्गीं
[2] अत्युन्नतस्तनभरावनतावलग्नाम् [2]।
मन्ये तदद्य मदनो विदधेऽनुतापात्
सेवन्तिकामयमिमं विपिनान्तदेशम् ॥ २४ ॥

विदूषकः—(स्वगतम्) पभंजणग्गहणं विअ अदिदुक्करं पिअवअस्ससमासासणम् । [प्रभञ्जनग्रहणमिवातिदुष्करं प्रियवयस्यसमाश्वासनम् ।] (प्रकाशम्) अदिक्कंदे अब्भवहारसमये महब्बंमणी मं पहरिस्सदि, एहि घरअं गच्छम्हो । [अतिक्रान्ते अभ्यवहारसमये महाब्राह्मणी मां प्रहरिष्यति, एहि गृहं गच्छावः ।]

---

[1] मदनचोरविनिर्गमसूचकैः
(प्रिय) कुहूनिनदैर्मुखरीकृताः ।
विरहिणोऽद्य सहायविनाकृताः
व्यपनयन्ति वसन्तनिशाः कथम्–क.

[2] मन्दस्मिताङ्कुरविकस्वरगण्डभागां–क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(निमीलिताक्षः संकल्पसुखमनुभवन् प्रलपति)

पादद्वन्द्वमिदं निवेशय परिश्रान्तं ममोरुद्वये
ताम्बूलीच्छदनानि दापय पुनः संवेष्ट्य दास्यामि ते।
कोपं मुञ्च मयि प्रसीद सहसा दासोऽस्मि ते सुस्मिते
किं त्वं धावसि हन्त हन्त पदयोरानम्रमाधून्वती ॥ ती ?

(इत्युन्मीलितनयनो धावन्मध्ये स्खलितगतिमभिनयति)

विदूषकः—(स्वगतम्)

गमणेण वि मअणेण वि
अज्ज वअस्सो भिसं परिस्संतो।
णीससइ दीहदीहं
समे वि मग्गे पदे पदे खळइ॥

[गमनेनापि मदनेनापि
अद्य वयस्यो भृशं परिश्रान्तः।
निःश्वसति दीर्घदीर्घं
समेऽपि मार्गे पदे पदे स्खलति] ॥ २६ ॥

(इति विचिन्त्य सकरुणम्) गब्भसिमंतस्स पकिडिसुउमाळस्स णिद्दब्भव्ववहाराणं केरळकण्णआवदेसेण महंतो अंतराओ संवुत्तो। [गर्भश्रीमतः प्रकृतिसुकुमारस्य निद्राभ्यवहारयोः केरलकन्यकाव्यपदेशेन महानन्तरायः संवृत्तः]। (प्रकाशम्) सोहारोहणदिणप्पहुदि संकमाणमाणसा देवी एव्वं विहं दुरंताणिरंतरचिंताउळं पेक्खिअ तुमं कुप्पिस्सदि, ता एदं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चावळं विसज्जिअ साहाविअं धीरत्तणं ओळंबेहि । [सौधारोहणप्रभृति शङ्कमानमानसा देवी एवंविधं दुरन्त-निरन्तरचिन्ताकुलं प्रेक्ष्य त्वां कुप्स्यति, तदेवं चापलं विसृज्य स्वाभाविकं धैर्यमवलम्बस्व ।]

राजा—

कुप्यतु दृप्यतु वा सा
कुवलयदलदीर्घनयनायाः ।
अस्यास्तनगिरिदुर्गे
चेतोहस्ती स्थितो वशं नैति ॥ २७ ॥

किंच—

सौधाग्रमधिरूढायाः सखे तस्या मृगीदृशः ।
अपाङ्गवलनैरेव हृता सा मम धीरता ॥ २८ ॥

विदूषकः—(स्वगतम्) किं करेमि किं वा कहेमि, मत्तो विअ उम्मत्तो विअ दीसइ पिअवअस्सो । [किं करोमि किं वा कथयामि, मत्त इवोन्मत्त इव दृश्यते प्रियवयस्यः ।] (प्रकाशम्) तुइ किदाणु-राअराअकण्णआसमाअमो अइरादो एव्व भविस्सदि, किं त्ति चिंतेसि, घरअं पडिट्ठामो । [तव कृतानुरागराजकन्यकासमागमः अचिरादेव भविष्यति, किमिति चिन्तयसि, गृहं प्रतिष्ठावः ।]

राजा—(स्मृतिमभिनीय) तस्यास्तावदौपम्यमभिलषन्तोऽपि कथंचिदपि भावा न लभेरन् । तथा हि—

गुरुद्रोही चन्द्रो न मुखरुचिमभ्येति सुदृशो
गतिं नाभ्यस्यन्ति द्विरदनिवहा मन्दमतयः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चला वेणीभङ्गीं कथमपि न गृह्णन्ति मधुपाः
पिका वाचं पूर्णामभिदधति नैकस्वरविदः ॥ २९ ॥

(नेपथ्ये)

उद्वीक्ष्य राजानमुदग्रखड्गं
तूर्णं निषादेषु पलायितेषु ।
अदृश्य एकः स्थपतिर्निबध्य
[1]क्षोणीपते[1]रन्तिकमद्य नीतः ॥ ३० ॥

राजा—(आकर्ण्य) वयस्य परामृश, क एवं व्याहरति ।

विदूषकः—(दूरतो विलोक्य) अम्हाणं सेणावई रणहीरो अब्भुदवुत्तंतं कं वि वाहरंतो इदो एव्व आअच्छइ । [अस्माकं सेनापती रणधीरः अद्भुतवृत्तान्तं कमपि व्याहरन् इत एवागच्छति ।]

(ततः प्रविशति सेनापतिः)

सेनापतिः—(अञ्जलिं बध्नन् उपसृत्य) [2]एष प्रणमामि[2] ।

राजा—उपविश्यतां तावत् ।

सेनापतिः—(उपविशति)

राजा—किमेतदद्भुतमभिहितं भवता ।

सेनापतिः—(यथोक्तं कथयति)

विदूषकः—[3]साहु रणहीर साहु[3], जदो अब्भुदवुत्तंदकहणेण पज्जवट्ठाविदो वअस्सो । [साधु रणधीर ! साधु, यतः अद्भुतवृत्तांतकथनेन पर्यवस्थापितो वयस्यः ।]

---

[1] महीपते—क. [2] प्रणमति—क. [3] सेणावए साहु, [सेनापते साधु]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेनापतिः—

खलीनाधीनसञ्चारो दृश्यते तुरगो यथा ।
विनैव पुरुषं तद्वत् दृष्टः कोऽपि तुरङ्गमः ॥ ३१ ॥

राजा—ततस्ततः ।

सेनापतिः—

तदनन्तरं तुरङ्गग्रहणोद्युक्तेषु मामकभटेषु ।
सहसावरुह्य तस्मादुदयुङ्क्त पलायितुं निषादेशः ॥ ३२ ॥

राजा—(साश्चर्यम्)—

एवं पलायमानं तं निषादाधिपतिं भवान् ।
दृशोरविषयं बध्वा कथमानीतवानिह ॥ ३३ ॥

सेनापतिः—तदनन्तरमव्यवहितपूर्वदिनोपजातवर्षजलप्रवाहैरत्या[1]द्रया भुवा[1] संचरमाणः प्रतिमुद्रितपदाविन्यासक्रमेण मामकैर्भटैरनुसृत्य वागुराभिराबध्य वध्यमानो "मूलिकाविशेषमहिम्ना पश्यतामदृश्यतामुपगतोऽस्मि, किमिति मां पीडयथ । यथानियोगं करोमि, किंकरोऽस्मि भवतां" इति सविनयकरुणं प्रार्थयमानः समीपमयमानीतः । अनन्तरकरणीये महाराजः प्रमाणम् ।

राजा—दृश्यतां तावदानीयतामदृश्य एष निषादः ।

(ततः प्रविशति राजपुरुषनीयमानो रज्जुबद्धो निषादस्थपतिः)

---

[1] द्रायां भुवि—ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(विलोक्य)

बन्धनी रज्जुरेकैव रोदस्योर्दृश्यतेऽन्तरा ।
बद्धस्तु पुरुषो नैव [1] दृश्यते किमिहाद्भुतम्[1] ॥ ३४ ॥

(विदूषकः सचकितं मन्दं मन्दमुपसृत्य रज्जुशेषमाकृष्य सत्वरं निवर्तते)

राजा—कथय वयस्य ! कुतो बिभेषि ।

विदूषकः—इमिणा बंधणरज्जुसेसेण बलादो आकरिस्संतो वि पुच्छविणिहादचलणो विअ रहो किंचिं वि ण जळइ एसो । ता मण्णे विक्कमक्कसमीवं विअ तुह सविहं को वि वेदाळो सेणावइणा समाणीदो त्ति वेवइ मे हिअअम् । [अनेन बन्धनरज्जुशेषेण बलादाकृष्यमाणोऽपि पुच्छविनिघातचलन इव रथः किंचिदपि न चलत्येषः । तन्मन्ये विक्रमार्कसमीपमिव तव सविधं कोऽपि वेतालः सेनापतिना समानीत इति वेपते मे हृदयम् ।]

राजा—सेनापते ! विस्मयकारिणी मूलिका परिगृह्यतामेषा ।

सेनापतिः—रे रे निषादस्थपते ! मम हस्ते निधेहि मूलिकामेताम् ।

(निषादस्थपतिः कचान्तरादुद्धृत्य दृश्यमान एव सेनापतिहस्ते मूलिकां निक्षिपति)

विदूषकः—(निषादं विलोक्य) वअस्स कीरिसं मूळिआए माहप्पम्, जदो एदाए विओअमेत्तेण को वि भीसणवेसो मासरासिसरिसो काणणवासी पुरुसविसेसो ळोअणपहं गदो । [वयस्य! कीदृशं मूलिकाया माहात्म्यम्, यत एतस्या वियोगमात्रेण कोऽपि भीषणवेषो माषराशिसदृशः काननवासी पुरुषविशेषो लोचनपथं गतः ।]

---

[1] किमेतन्महदद्भुतम्—ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—

सङ्घीभूय निषादानामत्रागमनकारणम् ।
कन्याग्रहण[1]हेतुश्च[1] दुरात्मा परिपृच्छ्यताम् ॥ ३५ ॥

सेनापतिः—

संत्यज्य साध्वसं सर्वं सत्यं भाषस्व दुर्मते ।
अन्यथा भाषमाणस्त्वं न जीवन् प्रतियास्यसि ॥ ३६ ॥

निषादस्थपतिः—पुरा खु मित्तवम्मणो रण्णो कण्णअं पत्थंतो गोदवम्मा सावमाणं तेण णिराकिदो, तदप्पहुदि संजाद-विरोहेण गोदवम्मणा मित्तवम्मा समरघरणिम्मि जीवग्गाहं गहीदो, तदणंतरं अंतेउरवासी अवच्चकळत्तप्पमुहो सव्वो वि जणो कुळउत्तेहिं अत्थ आणीय णिवेसिदो त्ति सोदूण गोदवम्मणा अत्थप्पदाणादिणा समुच्चाहिदा तं कण्णअं गहिदुं संपेसिदा अम्हे आअदं म्ह । [पुरा खलु मित्रवर्मणो राज्ञः कन्यकां प्रार्थयमानो गोदवर्मा सापमानं तेन निराकृतः, ततः प्रभृति संजातविरोधेन गोदवर्मणा मित्रवर्मा समरघरण्यां जीव-ग्राहं गृहीतः, तदनन्तरमन्तःपुरवासी अपत्यकलत्रप्रमुखः सर्वोऽपि जनः कुलपुत्रैरत्रानीय निवेशित इति श्रुत्वा गोदवर्मणा अर्थप्रदानादिना समुत्साहितास्तां कन्यकां ग्रहीतुं संप्रेषिता वयमागताः स्मः ।]

राजा—(स्वगतम्) गोदवर्ममित्रवर्मणोर्वैरकारणं सम्यग्विदितमिदानीम् ।

---

[1] हेतुं च-ग.

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Accn. No. 1204

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(स्वगतम्) एसा कण्णआ दोवदीव खेत्तिआणं अणत्थकाळिणी जादा। [एषा कन्यका द्रौपदीव क्षत्रियाणामनर्थकारिणी जाता।]

राजा—(मूलिकां हस्ते गृहीत्वा स्वगतम्) चिन्तितेष्वर्थेषु क्वचिदेतदुपयोक्ष्यते। (इति कोशान्तर्निधाय प्रकाशम्) सप्रपञ्चमस्या मूलिकायाः परामृश्य माहात्म्यं परिमुच्यतामेषः।]

सेनापतिः—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

विदूषकः—एसा मूलिआ चिंतिदेसु कज्जेसु कहिं वि उवजुज्जस्सदित्ति पसण्णमुहो सि। [एषा मूलिका चिन्तितेषु कार्येषु कुत्राप्युपयोक्ष्यत इति प्रसन्नमुखोऽसि।]

राजा—अदर्शनविनोदमात्रसाधिकया मूलिकया किमद्य मे साध्येत। किं च—

कारागृहे निपतितः स तु मित्रवर्मा
सेवन्तिका परवती किल सा जनन्याः।
साग्रः फलिष्यति कथं नु मनोरथद्रु-
रित्याविलं भजति मे न मनः प्रसादम्॥ ३७॥

विदूषकः—को वि उवाओ दाणिं मए चिंतिदो, सुणोदु तत्तभवम्। [कोऽप्युपाय इदानीं मया चिन्तितः, श्रुणोतु तत्रभवान्।]

राजा—श्रुणुमस्तावदभिधेहि।

विदूषकः—अम्हाणं सेणावइणं पेसिअ मित्तवम्मा गोदवम्मसआसादो मोअणिज्जो। तदो वरं सो णिअकण्णआणुराअं विआरिअ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्तहोदो मणोणुगुणं एव्व सव्वं आअरिस्सदि। [अस्माकं सेनापतिं प्रेष्य मित्रवर्मा गोदवर्मसकाशान्मोचयितव्यः। ततः परं सः निजकन्यकानुरागं विचार्य तत्रभवतो मनोऽनुगुणमेव सर्वमाचरिष्यति।]

राजा—किमियन्तमयं समयं न चिन्तयत्यात्ममोचनोपायम्।

विदूषकः—काराघरआवट्ठिदं तं मोएदुं तदीअजणो को वा वट्टइ। [कारागृहावस्थितं तं मोचयितुं तदीयजनः को वा वर्तते।]

राजा—किं जानासि? नीतिपराः खलु निखिलाः रहसि स्निह्यन्ति बहुषु महीपालाः।

विदूषकः—जं किंचि होदु, अदिचदुरा सारंगिआ केण वि संविहाणेण तं कण्णअं तत्तहोदो अंतेवुरे [1]अवच्छावेदि[1], ण संदेहो, अवि अ एदं अत्थं पडिजाणंतो महामदी मोहुत्तिओ वि तुह ससवहं विण्णाविदुं रहस्ससमअं पडिक्खेइ। [यत्किंचिद्भवतु, अतिचतुरा सारङ्गिका केनापि संविधानेन तां कन्यकां तत्रभवतोऽन्तःपुरेऽवस्थापयति, न सन्देहः, अपि च इममर्थं प्रतिजानन् महामतिर्मौहूर्तिकोऽपि तव सशपथं विज्ञापयितुं रहस्यसमयं प्रतीक्षते।]

(प्रविश्य प्रतीहारी)

प्रतीहारी—जेदु भट्टा। महामदी विण्णावेदि, किं वि विण्णप्पं अत्थि त्ति। [जयतु भर्ता। महामतिर्विज्ञापयति, किमपि विज्ञाप्यमस्तीति।]

---

[1] अवट्ठावेदि—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—समअम्मि समाअदो एसो। [समये समागत एषः।]

(प्रतीहारी राज्ञो भ्रूसंज्ञां दृष्ट्वा तथेति निष्क्रान्ता)

(ततः प्रविशति महामतिः)

महामतिः—विजयतां देवः।

भास्वान् कलावानसि लोहिताङ्गः
बुधो गुरुश्चासि कविः स्थिरोऽसि।
तस्माद्बलं तावकमेव सर्वं
बलं ग्रहाणामिति निश्चयो मे॥ ३८॥

विदूषकः—सुट्ठु भणिदं होदा, जं विण्णप्पं तं विण्णवेहि। [सुष्ठु भणितं भवता, यद्विज्ञाप्यं तद्विज्ञापय।]

महामतिः—

मूकाम्बिकानगरमेतदुपागतस्य
कन्यां प्रयच्छति विभो तव मित्रवर्मा।
देवी भविष्यति भृशं भवतोऽनुकूला
गेहस्थिता भगवती हृदयस्थिता च॥ ३९॥

विदूषकः—इमस्सिं अत्थे पत्तं विळिहिअ मह हत्थे पअच्छेहि। [अस्मिन्नर्थे पत्रं विलिख्य मम हस्ते प्रयच्छ।]

(महामतिः पत्रं विलिख्य विदूषकस्य हस्ते प्रयच्छति)

विदूषकः—(पत्रं हस्ते गृहीत्वा) महामदे सुणाहि, जइ एदं वअणं सच्चं भवे तइ रअणाहिसेहो तुह करिअदि, अण्णहा उण जीहाए संसओ भविस्सदि। महाराओ विअ अहं खमावं ण होमि।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[महामते! श्रुणुष्व, यद्येतद्वचनं सत्यं भवेत्तदा कनकाभिषेकस्तव क्रियते, अन्यथा पुनर्जिह्वायाः संशयो भविष्यति, महाराज इवाहं क्षमावान्न भवामि।]

राजा—वयस्य! निर्दयः कियद्वदसि।

विदूषकः—जोदिसिआणं रीदिं सुमरिअ एत्तिअं भणामि।
[ज्यौतिषिकाणां रीतिं स्मृत्वा एतावद्भणामि।]

महामतिः—व्याहर, का रीतिरेतेषाम्।

विदूषकः—एदे जोदिसिआ किं वि कज्जं उद्दिसिअ पुच्छिदा किंचि काळं अंगुळीगणणं कदुअ तक्काळीअळग्गे सक्काररिओ चिट्ठइ सत्तमत्थाणत्थिदो सणी वि तं पेक्खइ, अदो विळंबादो कज्जसिध्दी भविस्सदित्ति पुढमं संदिध्दं विअ भणंदि। तदणंतरं जइ कज्जं सिज्झइ तइ पुच्छजणसव्वस्सं वि णिअबहुमाणस्स [1]अपज्जत्तं[1] मण्णंदि। अण्णहा चे दुट्ठसाणिविक्खणेण एव्वं जादं त्ति भणंति। किंअ आउप्पसणे जइ चिर जीविस्सदि तदो मं बहुमाण्णिस्सदि, अण्णहा मिदो एसो कं वा किं पुच्छिस्सदि त्ति चिंतिअ सव्वं वि जणं सदाऊ तुमं त्ति भणंति। अविअ गब्भप्पसणे तणओ जणिस्सदि त्ति जणअसविहे पडिजाणंदि। जणणीसविहे उण कण्णएत्ति। एआरिसं सहस्सं चिट्ठइ, विहा कण्ठसोसणेण किं त्ति विरमिज्जादि।

[एते ज्यौतिषिकाः किमपि कार्यमुद्दिश्य पृष्टाः किंचित्कालमङ्गुलीगणनं कृत्वा तात्कालिकलग्ने सत्काररिपुस्तिष्ठति,

---

[1] ण पज्जत्तं [न पर्याप्तं] (ख, ग)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सप्तमस्थानस्थितः शनिरपि तं प्रेक्षते। अतो विलम्बात्कार्य-सिद्धिर्भविष्यतीति प्रथमं संदिग्धमिव भणन्ति। तदनन्तरं यदि कार्यं सिध्यति तदा प्रष्टृजनसर्वस्वमपि निजबहुमान-स्यापर्याप्तं मन्यन्ते। अन्यथा चेत् दुष्टशनिवीक्षणेनैवं जातमिति भणन्ति। आयुःप्रश्ने यदि चिरं जीविष्यति ततो मां बहुमानिष्यति, अन्यथा मृत एषः कंवा किं प्रक्ष्यति, इति चिन्तयित्वा सर्वमपि जनं शतायुस्त्वमिति भणन्ति। अपि च—गर्भप्रश्ने तनयो जनिष्यतीति जनकसविधे प्रतिजानन्ति, जननीसविधे पुनः कन्यकेति। एतादृशं हसनं वर्तते। वृथा कण्ठशोषणेन किम्।] (इति विरम्यति)

(राजा महामतेर्मुखं पश्यति)

महामतिः—

यदि तवास्ति कृपा मयि भूपते
न गणयेयममुष्य विकत्थनम्।

इदमपि हृदि निधीयतां महाराजेन—

सपदि केरलभूपतिकन्यका
[1]नृप[1] भवन्तमुपैष्यति सा बलात् ॥४०॥

राजाः—अस्याः [2]खलु[2]

---

[1] ननु—(ख, ग) [2] अस्याः किल—(ख, ग) यस्याः किल—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1] रम्भा तुष्यति सा यदूरुसदृशो वृक्षस्य संज्ञां गता
यद्गन्धाढ्यसिताभ्रनामघटनाच्चन्द्रो भृशं नन्दति ।
चक्रो यत्कटिदेशसंनिभरथाङ्गाख्याह्वयान्मोदते
बाला सैव बलादुपैति यदि मे किं भागधेयं ततः ॥ ४१ ॥

(इति निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः

---

[1] ... .मण्डलात्कुलगिरेर्निस्सीमभाग्योदयः
धिक्कारश्च पयोमुचां कचभराश्लिस्पन्दमैन्द्रं धनुः ।
राकाचन्द्रमसो मुखादवमती राज्याभिषेको .....
बाला सैव बलादुपैति यदि मे किं भागधेयं ततः ॥ (क)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(ततः प्रविशति मन्दारिका)

मन्दारिका—आणत्तंहि भट्टिदारिआए कळावदिं काळिउज्जाणं झेत्ति पेसएत्ति। सा उण उदअप्पहुदि संझासमअपेरंतं पडिघरअं पविसंती कहिं दाणिं दट्ठव्वा। [आज्ञप्तास्मि भर्तृदारिकया कथावतीं कालिकोद्यानं झटिति प्रेषयेति। सा पुनरुदयप्रभृति सन्ध्यासमयपर्यन्तं प्रतिगृहं प्रविशन्ती कुत्रेदानीं द्रष्टव्या] (इति प्रस्थितामन्ती दूरतो विलोक्य) कस्सिं वि भाअणे कं वि भक्खविसेसं णिक्खिविअ देव्वादो इदो एव्व आअच्छइ। होदु णं उवसप्पिस्सम्। [कस्मिन्नपि भाजने कमपि भक्ष्य-विशेषं निक्षिप्य दैवादित एवागच्छति। भवत्वेनामुप-सर्पामि।[1] (इत्युपसर्पति)[1]

(प्रविश्य)

कथावती—(पुरो विलोक्य) अइ मन्दारिए कहिं दाणिं तुमं पत्थिदासि। [अयि मन्दारिके! केदानीं त्वं प्रस्थितासि।]

मन्दारिका—भट्टिदारिआए णिओअं कहिदुं तुह सविहं एव्व। [भर्तृदारिकाया नियोगं कथितुं तव सविधमेव।]

कथावती—(सादरम्) को उण सो णिओओ। [कः पुनः स नियोगः।]

मन्दारिका—हिओ किळ काळिआए भअवदीए मह सिविणए समागदुअ एव्वं आणत्तम्, वच्छे तुह पसण्णं म्हि झत्ति भत्तिविसेसेण। ता सहस्सव्वंहणभोअणं करिअ सुवो वदसमत्तिं करेहि, मासमेत्तेण तुह मणोरहासिज्झी भवस्सादि त्ति।

---

[1] इति समीपमुपसर्पति–(ख, ग).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ता आढअ मुग्ग मास गोहूम तण्डुल दहि घिदप्पहुदि समग्गा सामग्गी वि अज्ज सुज्जोदआदो पुव्वं एव्व काळिउज्जाणं पेसिदा। ता तुमं वि तत्थ गदुअ सव्वं विआरेहि। अहं उण आसिव्वअणसमअम्मि आअच्छम्हि त्ति। [अद्यः किल कालिकया भगवत्या मम स्वप्ने समागत्यैवमाज्ञप्तम्, "वत्से तव प्रसन्नास्मि झटिति भक्तिविशेषेण, तस्मात्सहस्रब्राह्मण-भोजनं कृत्वा, श्वो व्रतसमाप्तिं कुरु। मासमात्रेण तव मनोरथ-सिद्धिर्भविष्यती"ति। तस्मादाढकमुद्गमाषगोधूमतण्डुलदधिघृत-प्रभृति समग्रा सामग्र्यपि अद्य सूर्योदयात्पूर्वमेव कालिकोद्यानं प्रेषिता। तस्मात्त्वमपि तत्र गत्वा सर्वं विचारय। अहं पुनराशीर्वचनसमय आगच्छामीति।]

कथावती—भट्टिदारिआमणोरहसिज्झिकाळं वि किं पेक्खिस्सामो। [भर्तृदारिकामनोरथसिद्धिकालमपि किं प्रेक्षिष्यामः।]

मन्दारिका—काळिआभअवदिं सरणं गदाए ताए किं णूणं भविस्सदि। [कालिकाभगवतीं शरणं गतायास्तस्याः किं न्यूनं भविष्यति।]

कथावती—तळिहि कालो अदिक्कामदि। काळिउज्जाणं गदुअ भट्टिदारिआए णिओअं असुण्णं करोमि। [तर्हि कालोऽतिक्रामति। कालिकोद्यानं गत्वा भर्तृदारिकाया नियोगमशून्यं करोमि।] (इति कानिचित्पदानि परिक्रामति)

मन्दारिका—सहि कहावदि किं जाणासि, पुव्वदिणम्मि काळिआळ-आदो भट्टिदारिअं घरअं पेसिअ महाराओ किं किदवंतो त्ति। (सखि कथावति! किं जानासि, पूर्वदिने कालिकालयाद्भर्तृ-दारिकां गृहं प्रेषयित्वा महाराजः किं कृतवानिति।)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथावती—(सोच्छ्वासम्)सहि किं तं कहेमि। तस्सिं एव्व काळिउज्जाणे मत्तो विअ उम्मत्तो विअ समंतादो परिब्भमंतो अय्यकोसीदएण कहं वि पज्जवट्ठाविदो साअंकाळे णअरं समाअदो। [सखि! किं तत्कथयामि, तस्मिन्नेव कालिकोद्याने मत्त इवोन्मत्त इव समन्तात्परिभ्रमन् आर्यकोषीतकेन कथंचिदपि पर्यवस्थापितः सायंकाले नगरं समागतः।]

मन्दारिका—गब्भसीमंताणं सेवंदिआबसवेंदाणं कदा वा हिअअणिव्वुदी भविस्सदि त्ति ण जाणीअदि। होदु भट्टिदारिआए सामीवं गच्छम्हि। [गर्भश्रीमतोः सेवन्तिकाबसवेन्द्रयोः कदा वा हृदयनिर्वृतिर्भविष्यतीति न ज्ञायते। भवतु, भर्तृदारिकायाः समीपं गच्छामि।] (इति पदान्तरे स्थित्वा) सहि कहावइ अज्ज पच्चूससमअम्मि महाराअभवणदुवारे भेरीणिणादो समाकण्णिदो, तत्थ किं णिमित्तं जाणासि। [सखि कथावति! अद्य प्रत्यूषसमये महाराजभवनद्वारे भेरीनिनादः समाकर्णितः, तत्र किं निमित्तं जानासि।]

कथावती—सहि उक्कंठावणअणणिमित्तं मिअआविहारं मिसीकदुअ विविणंतदेसं गदो त्ति अय्यकोसीदएण कहिदम्। [सखि! उत्कण्ठापनयननिमित्तं मृगयाविहारं मिषीकृत्य विपिनान्तदेशं गत इत्यार्यकौषीतकेन कथितम्।

मन्दारिका—अय्यकोसीदओ वि तेण समं एव्व किं विणिग्गदो। [आर्यकौषीतकोऽपि तेन सममेव किं विनिर्गतः।]

कथावती—दाणिं गंदुकामो चिट्ठइ। [इदानीं गन्तुकामस्तिष्ठति]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन्दारिका—तळिहि मिअआविहारादो पडिणिवट्टमाणो भट्टिदारिआ-समाअमणसमअम्मि काळिउज्जाणं आणेदव्वो त्ति अय्यको-सीदअं भणाहि । [तर्हि मृगयाविहरात् प्रतिनिवर्तमानो भर्तृदारिकासमागनसमये कारुयुद्यानमानेतव्य इत्यार्यकौषीतकं भण ।]

कथावती—होदु साहेहि । [भवतु साधयावः ।] (इति निष्क्रान्ते)

प्रवेशकः

(ततः प्रविशति सवयस्यो राजा)

राजा—(दूरतो विलोक्य) खाड्गिककौन्तिक धानुष्कवागुरिक श्वगण-संकुलं सकलमपि बलं परिश्रान्तं प्रविशति नगराभ्यन्तरम् । अहं पुनरिह [1]बकुलमुकुलविदलितदल[1]समुदयपरिगलितमधुर-मधुरसभरबहुलपरिमलसुरभिलपवनचलनमीलितमधुकरविविध--शुकपिकनिकरकलकलरवमुखरिते कालिकोपवने कंचित्कालं विनोदयाम्यात्मानम् । (इत्युपवनप्रवेशं नाटयन् परिक्रामति)

विदूषकः—इदो इदो आअच्छदु भवम् । (इत इत आगच्छतु भवान्)

राजा—(अञ्जलिं बध्वा)

काञ्चीमहितश्रोणीं
[2]कचभर[2]परिभूतमधुकरश्रेणीम् ।
तामिह तामरसाक्षीं
भूयोऽपि विधे विधेहि मे पुरतः ॥ १ ॥

---

[1] विदलितबकुलमुकुलदल-ख. ग. [2] कचरुचि-ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(पुरतो निर्वर्ण्य)—

पाटीरपङ्कपरिलिप्तसमस्तदेहाः
चाम्पेयदामपरिवेष्टितबद्धचूडाः ।
आशीर्वचोमुखरितोपवनप्रदेशाः
विप्रा विभान्ति पुरतो मिलिताः क एते ॥ २ ॥

विदूषकः—(स्मृतिमभिनीय) एत्तिअं कालं कहावदीमुहादो सुदं वअणं वअस्सस्स मए कहं ण कहिदम् । [एतावन्तं कालं कथावती-मुखात् श्रुतं वचनं वयस्यस्य मया कथं न कथितम् ।]

राजा—(सोत्कण्ठम्) विस्मरणशील ! विस्पष्टमभिधेहि ।

विदूषकः—पुव्वदिणावररत्तिम्मि पसंणाऐ काळिआभअवदीए सेवंदिआसिविणए समागदुअ सुवो सहस्सब्बम्मणभोअणपुरोसरं वदसमत्तिं करेहि, सहळो दे मणोरहो होदि त्ति कहिदम् । ता दाणिं ताए आमंतिदा बम्मणा गोहूममंडआदिअं खादिअ पिचंडिळा दीसंदि । अहं उण तत्तहोदा समं मिअआविहारं पेखंतो अदिक्कंदभोअणवेळो णिज्जलकूवसरुव्वजठरो वंचिदो म्हि । [पूर्वदिनापररात्र्यां प्रसन्नया कालिकाभगवत्या सेवन्तिकास्वप्ने समागत्य श्वः सहस्रब्राह्मणभोजनपुरस्सरं व्रतसमाप्तिं कुरु, सफलस्ते मनोरथो भवतीति कथितम् । तस्मादिदानीं तया आमन्त्रिता ब्राह्मणा गोधूमण्डकादिकं खात्वा पिचण्डिला दृश्यन्ते । अहं पुनस्तत्रभवता समं मृगयाविहारं पश्यन् अतिक्रान्तभोजनवेलो निर्जलकूपसरूपजठरो वञ्चितोऽस्मि]

राजा—तर्हि किं तया कान्तया परिष्कृतं भवेदुद्यानम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—आसिव्वअणसमअम्मि सेवंदिआ समाअमिस्सदि त्ति कहादीए कहिदम्। संपदं उण सा समाअदा वा ण वेत्ति जाणीदव्वम्। [आशीर्वचनसमये सेवन्तिका समागमिष्यतीति कथावत्या कथितम्, साम्प्रतं पुनः सा समागता वा नवेति ज्ञातव्यम्।]

(इत्युभौ परिक्रामतः)

राजा—(साक्षेपम्)

कूजत्कोकिलसंकुले वनतले नावैमि तस्या वचः
तन्मञ्जीररवोऽपि हंसनिनदाक्रान्ते न च ज्ञायते।
तद्वक्त्राब्जपरीमलो न सुलभो ज्ञातुं सरोजावृते
कान्तां चन्द्रमुखीं ततः कथमिवेदानीं विचेयामहे ॥३॥

(क्षणं विचिन्त्य सोत्कण्ठम्)

पश्येयं वदनं कदा मृगदृशो मन्दस्मितालङ्कृतं
वाचं कीरवधूनिनादमधुरामाकर्णयेयं कदा।
जिघ्रेयं कबरीभरं सुरभिलं चाम्पेयगर्भं कदा
[1]गात्रं [1]तच्च शिरीषपुष्पमृदुलं किंच स्पृशेयं कदा ॥४॥

(इति परिक्रम्योद्यानं विलोक्य)

वयस्य पश्य—[2]मामक[2]मानसजीवातुमूलिका नूनमत्र निवसति सेवन्तिका। यदस्मिन्निकुञ्जभवने—

आलापो मधुरो मया निशमितस्तस्याश्चकोरीदृशः,

---

[1] वक्त्रं—क.

[2] विलासलोमलामलकालिदधत्सु कुन्दं तं तिलकोज्वलालि . . .।
स्फुरत्पिकालापमिदं विराजते मुखं वनान्तस्य वधूमुखं यथा ॥
(श्रुतिमभिनीय) वयस्य मामक—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(निर्वर्ण्य) णहि [नहि]—

सहआरसाहिसिहरे किसळअसअळं णिअप्पिअविदिण्णम् ।
चंचूपुटे णिवेसिअ कूअइ महुरं कुहूमुहप्पमदा ॥
[सहकारशाखिशिखरे किसलयशकलं निजप्रियवितीर्णम्
चञ्चूपुटे निवेश्य कूजति मधुरं कुहूमुखप्रमदा] ॥ ५ ॥

राजा—किं भणसि—

कर्णौ शीतलयत्ययं पदरणन्मञ्जीरमञ्जुस्वनः ।

विदूषकः—(निपुणं [1] निध्याय[1]) [2]का खु [2] २. का खलु २

मीळिदणअणा णिअपइ-
चंचूमुहकसणसमिदकंडूइ ।
पुण्णाअविडविमूले
पुण्णा णिणदेइ मल्लिअक्खवहू ॥ ६ ॥

[मीलितनयना निजपति-
चञ्चूमुखकषणशमितकण्डूतिः ।
पुन्नागविटपिमूले
पुण्या निनदति मल्लिकाक्षवधूः]

राजा—किं वदसि—

तन्वङ्ग्या वदनस्य तस्य सुरभिर्गन्धः परिघ्रायते,

---

[1] निर्वर्ण्य—ख. ग. [2] णखु (नखलु)—ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(विचिन्त्य)

णिपतंतभमरचळणप्पहळणाविदळंताणिहिळपत्ताणम् ।
सदपत्ताणं गण्हिअ पराअणिअरं समीरणो वहइ ॥

[निपतद्भ्रमरचरणप्रहरणविदलन्निखिलपत्राणाम् ।
शतपत्राणां गृहीत्वा परागनिकरं समीरणो वहति] ॥ ७ ॥

राजा—

किं ब्रूषे ननु पश्य सैव पुरतश्चन्द्रानना दृश्यते ॥ ८ ॥

विदूषकः—(विलोक्य)

[1]थणजुअळसोहिमज्झदेसा[1]
पचळिदणूदणपळ्ळवाहिरामा ।
थणजुअणमिदा उदत्थहत्था
फुरइ वहूविअ माहवीळदा दे ॥

[स्तबकयुगलशोभिमध्यदेशा
प्रचलितनूतनपल्लवाभिरामा ।
स्तनयुगनमिता उदस्तहस्ता
स्फुरति वधूरिव माधवीलता ते] ॥ ९ ॥

राजा—तर्हि त्वमेव वयस्य! तस्याः प्रवृत्तिं जानीहि ।

विदूषकः—इमस्सिं सिअदिळप्पदेसे कए वि इत्थिआए चळणविण्णासो दीसइ । [अस्मिन् सिकतिलप्रदेशे कस्या अपि स्त्रियाश्चरण-विन्यासो दृश्यते ।]

---

[1] महुअरपरिसोहिकोरअग्गा [मधुकरपरिशोभिकोरकाग्रा]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा— (विलोक्य सवितर्कम्)

नितम्बभारातिशयेन गाढं
निक्षिप्तमङ्घ्रिद्वयमम्बुजाक्ष्याः ।
विलुप्तपद्माङ्कुशमुख्यरेखा-
व्यत्यस्तविन्यासमिदं विभाति ॥ १० ॥

विदूषकः—(अन्यतो विलोक्य) इमस्सिं सिळादळे कए वि. इत्थिआए चळणणळिणसत्ताळत्तअद्दवो पडिमुद्दिदो पडिभाइ । [अस्मिन् शिलातले कस्या अपि स्त्रियाश्चरणनलिनसक्तालक्तकद्रवः प्रतिमुद्रितः प्रतिभाति ।]

राजा—(निपुणं निर्वर्ण्य) हन्त, तस्या एवायम् ।

सुकृतेन येन भवता
सुदतीपदपद्मतलहतिरवाप्ता ।
तन्मे देहि शिलातल!
सुकृतवितरणेन सुकृतमाप्नोषि ॥ ११ ॥

विदूषकः—(श्रुतिमभिनीय) तस्सिं ळदाघरए इत्थिआणं आळावो विअ आकण्णीअदि, एहि गच्छम्हो । [तस्मिन् लतागृहे स्त्रीणामालाप इवाकर्ण्यते, एहि गच्छावः ।] (इति सत्वरं परिक्रामत.)

विदूषकः—(पुरो विलोक्य) वअस्स समस्ससिहि २, जदो अत्थ ळदामंदिरंतरे सेवंदिआए सहअरी सारंगिआ दीसइ । [वयस्य! समाश्वसिहि २, यतोऽत्र लतामन्दिरान्तरे सेवन्तिकायाः सहचरी सारङ्गिका दृश्यते ।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(विलोक्य)

कुसुमश्रियः पुरस्ता-
त्किसलयलक्ष्मीमिवावलोक्येमाम् ।
मकरन्दरसजिघृक्षु-
र्मधुकर इव हर्षमतुलमभ्येमि ॥ १२ ॥

(लतागृहान्तरे विलोक्य)

एकं नितम्बफलके विनिवेश्य बाहु-
मन्यं च वेष्टितमधःशिरसो निधाय ।
श्वासानिलोच्चलितमौक्तिकशोभिनासा
शेतेऽधुना सुखमियं सरसीरुहाक्षी ॥ १३ ॥

(सोल्लासम्) वयस्य! लतान्तरितावनयोरुक्तिक्रमं श्रुणुवः।

(ततः प्रविशति सख्यङ्के शयाना सेवन्तिका)

राजा—वयस्य! सारङ्गिकायाः निरवधिकं निजसखीसौहार्दं पश्य—

निद्राविरामविशयाकुलमानसेय-
मूरुं न किंचिदपि कम्पयतेऽतिभीता ।
किंच श्रमापनयनं वितनोति सख्या-
श्चेलाञ्चलेन वदनोपरि वीजयन्ती ॥ १४ ॥

विदूषकः—सेवन्दिआए रूवसंहणणं इत्थिआणं वि दिट्ठिचित्ताइ अवहरइ। [सेवन्तिकाया रूपसंहननं स्त्रीणामपि दृष्टिचित्तान्यपहरति।]

राजा—सखे! सम्यगभिहितं भवता। किं च किं वर्णयामि शरीरिताचरितार्थताम्। तथाहि—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दृष्टैषा वरवर्णिनी निशमितं चास्या वचः सुन्दरं
स्पृष्टं पाणिसरोरुहं कचभरो घ्रातः स्फुरत्सौरभः ।
अस्या नाम समीरितं सुमधुरं मन्दस्मितं च स्मृतं
प्राप्तं प्राक्तनपुण्यवैभववशात्सर्वेन्द्रियाह्लादनम् ॥ १५ ॥

(तत उत्स्वप्नायते सेवन्तिका)

सेवन्तिका—महाभाअ दिढं मं परिस्सजेहि । [महाभाग! दृढं मां परिष्वजस्व ।]

विदूषकः—पूरेहि मणोरहं एदाए । [पूरयस्व मनोरथमेतस्याः ।]

सारङ्गिका—महाराअ एदाए उत्तंतं कं वि णजाणासि । इअं उण एआरिसिं अवत्थं पडिवण्णा चिट्ठइ, किं करेमि । [महाराज! एतस्या वृत्तान्तं कमपि न जानासि । इयं पुनरेतादृशीमवस्थां प्रतिपन्ना तिष्ठति । किं करोमि ।]

राजा—सखि सारङ्गिके! मम कृते परितप्यत इयं कल्याणीति श्लाघानिन्दयोरुभयोरपि भजामि भाजनताम् ।

सेवन्तिका—महाराअ! [1] वक्खत्थळे [1] णहक्खदं ण करेहि । [महाराज! वक्षस्थले नखक्षतं न कुरु ।] (इति स्वस्तिकं बध्नाति)

राजा—

परिष्वङ्गविधानाच्च नखक्षतनिषेधिका ।
उक्तिरेषातिशयितामुत्पादयति मे मुदम् ॥ १६ ॥

---

[1] कक्खत्थळे । [कक्षस्थले]—(ख, ग)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—सहि असंबध्दप्पलापे उट्ठेहि २। [सखि! असंबध्द-प्रलापे उत्तिष्ठ।] (इति सहस्तास्फालनं प्रबोधयति)

(सेवन्तिका बुध्यमाना चक्षुषी उन्मृज्याङ्गभङ्गं करोति)

राजा—(सेवान्तिकां दृष्ट्वा)

[1]आनितम्बतटमा च शिरोऽग्रं
पृष्ठदेशघटितायतवेणी।
बध्दपट्टदगुणस्मरचाप-
भ्रान्तिमाकलयते वपुरस्याः॥[1] १७॥

सेवन्तिका—(हसन्ती सारङ्गिकामवलोक्य) सहि सारंगिए किं तुए हासो करिअदि। [सखि सारङ्गिके! किं त्वया हासः क्रियते।]

सारङ्गिका—तुह ऊसिविणाइदं सुदंति। [तवोत्स्वप्नायितं श्रुतमिति।]

सेवन्तिका—(साशङ्कम्) किं तं कहेहि २। [किं तत्कथय २।]

सारङ्गिका—(यथावृत्तं कथयति)

सेवन्तिका—(ससाध्वसम्) ळदंदरिदेण केण वि सुदं भवे त्ति वेवइ मे हिअअम्। [लतान्तरितेन केनापि श्रुतं भवेदिति वेपते मे हृदयम्।]

विदूषकः—जं जणं उद्दिसिअ तुए फणिदं तेण एव्व सुदं, किं त्ति सज्झसं करेसि। [यं जनमुद्दिश्य त्वया भणितं तेनैव श्रुतं, किमिति साध्वसं करोषि।]

---

[1] वस्तिदेशगलितश्रथनीवीबन्धमुन्नमितचारुकुचाग्रम्।
अङ्गभङ्गसमये वपुरस्याः भात्यनङ्गनतचापसरूपम्॥—(क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—

वेष्टिताङ्गुलिकराम्बुजमेषा
विस्मिता निदधती चुबुकाग्रे।
निश्चलभ्रु वदनं च दधाना
भाति चित्रलिखितेव नताङ्गी ॥ १८ ॥

सेवान्तिका—सो महाणुहावो एत्थ आअमिस्सदि त्ति असंभावणिज्जमणरहाहिं अम्हेहिं केत्तिअं काळं अवट्ठादव्वम्। [स महानुभावोऽत्रागमिष्यतीत्यसंभावनीयमनोरथाभ्यामावाभ्यां कियन्तं कालमवस्थातव्यम्।]

सारङ्गिका—अम्हाणं समाअमणं महारअस्स साविदव्वं त्ति कहावदीए अय्यकोसीदअस्स कहिदम्। ता इदो एव्व सो आअमिस्सदि। खणमेत्तं पडिक्खेहि। [आवयोः समागमनं महाराजस्य श्रावितव्यमिति कथावत्या आर्यकौषीतकस्य कथितम्। तस्मादित एव स आगमिष्यति। क्षणमात्रं प्रतीक्षस्व।]

सेवान्तिका—मिअआविहारकिदकोऊहळेण तेण विसुमरिदं एदं त्ति संकेदि मे हिअअम्। [मृगयाविहारकृतकौतूहलेन तेन विस्मृतमिदमिति शङ्कते मे हृदयम्।]

सारङ्गिका—दूसहमअणवेअणाळसस्स तस्स केत्तिअं कोऊहळं मिअआइम्, सावि उक्कंठावणअणत्थं एव्व। [दुस्सहमदनवेदनालसस्य तस्य कियत्कुतूहलं मृगयायाम्, साप्युत्कण्ठापनयनार्थैव।]

राजा—सखि सारङ्गिके! साधु गृहीतं मे हृदयम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—(सानुस्मरणाशङ्कम्) एसो महाराओ मइ अणुरागं पकडीकादुं णिअमहिसीसआसादो बिहेदि त्ति कहावईए कहिदं, किं तं सच्चम्। [एष महाराजो मय्यनुरागं प्रकटीकर्तुं निजमहिषीसकाशाद्बिभेतीति कथावत्या कथितं, किं तत्सत्यम्।]

सारङ्गिका—को संदेहो, सव्वस्सवि राअउळस्स णीदी खु एसा, विसेसदो विसुद्दकुळप्पसूदो एसो एव्वं त्ति किं एत्थ अत्थि पुच्छिदव्वम्। [कः सन्देहः, सर्वस्यापि राजकुलस्य नीतिः खल्वेषा, विशेषतो विशुध्दकुलप्रसूत एष एवमिति किमत्रास्ति प्रष्टव्यम्।]

सेवन्तिका—(सवैमनस्यम्) तळिहि अम्हाणं मणोरहो कहं फळिस्सदि, किं त्ति वा णिरत्थआदो इमादो वावारादो ण विरमिज्जिअदि। [तर्ह्यस्माकं मनोरथः कथं फलिष्यति। किमिति वा निरर्थकादस्माद्व्यापारान्न विरम्यते।]

राजा—वयस्य! सारङ्गिकावचनसमनन्तरमेव—

निःश्वसितशुष्यदधरा
चिन्तासन्तापविनिहतस्वान्ता।
ताम्यति तनुरियमचिरा-
दातपवेगाहता मृणालीव॥ १९॥

सारङ्गिका—सहि विहिविळसिदं केण जाणीअदि। काळिआपूअणं उण चेळंचळणिबध्दं सुवण्णं त्ति मण्णेहि। किंअ एत्थ आअमणुज्जुत्ताणं अम्हाणं अप्पदक्खिणपक्खिणाहदंसणं सोक्खप्पदं त्ति पसण्णहिअअंम्हि। अविअ बम्मणासिव्वअणावसरम्मि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आअंमई उवम्सुई विस्संभणिज्जा होदि। जइ अण्णं उवण्णस्सामि तइ मं तुमं पिअभासिणिं मण्णिस्सदि त्ति विरमिज्जदि। [सखि! विधिविलसितं केन ज्ञायते। कालिकापूजनं पुनश्चेलाञ्चलनिबद्धं सुवर्णमिति मन्यस्व। किंचात्रागमनोद्युक्तयोरावयोरप्रदक्षिणपक्षिनाथदर्शनं सुखप्रदमिति प्रसन्नहृदयास्मि। अपि च ब्राह्मणाशीर्वचनावसरे आगच्छन्त्युपश्रुतिः विस्रम्भणीया भवति। यद्यन्यदुपन्यस्यामि तर्हि मां त्वं प्रियभाषिणीं मंन्यसे इति विरम्यते।]

(सेवन्तिका वामाक्षिस्पन्दनं रूपयति)

सारङ्गिका—(विलोक्य) पच्चक्खळक्खिदं उवेक्खिअ परोक्खं एव्व किं त्ति कहणिज्जम्। पेक्खस्स अदक्खिणं चक्खू फुरइ। तं जाव महाराओ आअच्छइ दाव एदेहिं भूसणेहिं पसाहेमि। [प्रत्यक्षलक्षितमुपेक्ष्य परोक्षमेव किमिति कथनीयम्। प्रेक्षस्वादक्षिणं चक्षुः स्फुरति। तस्माद्यावन्महाराज आगच्छति तावदेतैर्भूषणैः प्रसाधयामि।]

राजा—

मृदुलानामङ्गानां
मृगशावदृशो निसर्गकान्तानाम्।
परिकर्मभिरावरणं
पश्यञ्जनदृष्टिदोषनिर्हरणम् ॥ २० ॥

सारङ्गिका—सहि सेवंदिए पुढमं वेणिं कळएमि। [सखि सेवन्तिके! प्रथमं वेणीं कलयामि।] (इति वेणीग्रथनं करोति)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—

सौरभलोभादधुना
मानस! सुदृशः [1]कचान्तिकं[1] मा गाः।
त्वामपि निवेश्य मध्ये
रचयेदेषा सखी वेणीम् ॥ २१ ॥

(वेणीं निर्वर्ण्य)

साधु सारङ्गिके! साधु। अविरचय्य धम्मिल्लबन्धनं वेणीरचनेन भृशं नन्दनीयासि। यतः—

आपार्ष्णि वेणिकेयं
पश्चाद्भागं विभूषयत्यखिलम्।
कचभारस्तु मुखेन्दुं
केवलमस्या विशोभयति ॥ २२ ॥

(सारङ्गिका चम्पकस्रजा वेष्टयति)

राजा—

चम्पकदामस्थगिता
भीषयितुं मां प्रदर्श्य मदनेन।
क्षिप्ता सुवर्णकोशे
[2]सुदृशो वेणी पुनः कृपाणीव[2] ॥ २३ ॥

सारङ्गिका—(तिलकं विलिख्य) सहि दट्ठुं तिळअं दप्पणबिम्बं गण्ह। [सखि! द्रष्टुं तिलकं दर्पणबिम्बं गृहाण।] (इति दर्पणं हस्ते निक्षिपति)

---

[1] कचान्तरं—(ख) [2] दीर्घकृपाणीव दृश्यते वेणी—(ग)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(तिलकं निर्वर्ण्य)

भ्रूमध्ये [1]परि[1]लिखितो विलासवत्याः
सारङ्गीमदतिलको [2]ममाव[2] भाति।
नीलाम्भोरुहकलिका [3]शरः शिताग्रः [3]
कोदण्डं कुसुमशरासनेन नीतः ॥ २४ ॥

सारङ्गिका—सहि मोत्तिअसरेहिं सव्वंगं विभूसइस्सम्। [सखि! मौक्तिकसरैः सर्वाङ्गं विभूषयिष्यामि।] (इति मुक्ताहाराञ्चिक्षिपति)

राजा—(विलोक्य)

ताराकारैर्मौक्तिकैर्भूषिताङ्गी-
मुद्वीक्ष्यैनां पद्मपत्रायताक्षीम्।
आमूलाग्रं पुष्पभारावनद्धा
भूयो भूयः स्मर्यते कल्पवल्ली ॥ २५ ॥

सेवन्तिका—सहि सारंगिए असंभावणिज्जमहाराअसमाअमण-संभावणाए पीडिज्जंती तुमं मं वि आआसेसि। [सखि सारङ्गिके! असंभावनीयमहाराजसमागमनसंभावनया पीड्यमाना त्वं मामप्यायासयसि।]

राजा—अयि मद्व्यसनानभिज्ञे!

[4]सुकृत[4]समधिगम्यत्वत्पदाब्जैकलुब्धे
मयि तव परिचर्याकिङ्करे शङ्कया किम्।
हृदयमधिवसन्ती सन्ततं मे मनोज-
ज्वरकृतमतितापं दुस्सहं किं न वेत्सि ॥ २६ ॥

---

[1] सखि—क. [2] पमाव—ग. [3] मयः कलम्भः—ख. [4] सुकृति—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—हला कलामेत्तं पडिक्खेहि, तदो गमिस्ससि। अह व पमदाजणविप्पळंभकुसळो आअदो एव्व ळदंदरिदो कहिं वि चिट्ठइ त्ति संकेदि मे हिअअम्। [हला कलामात्रं प्रतीक्षस्व, ततो गमिष्यसि। अथवा प्रमदाजनविप्रलम्भकुशल आगत एव लतान्तरितः कुत्रापि तिष्ठतीति शङ्कते मे हृदयम्।]

विदूषकः—वअस्स सारंगिआए विण्णाणकोसळं पेक्ख। [वयस्य! सारङ्गिकाया विज्ञानकौशलं पश्य।]

राजा—

ऊहापोहविचार-
प्रगल्भविज्ञानवैभवोन्मेषा।
एतादृशी वयस्या
यस्याः [1]सुदृशो[1] जितं तया भुवनम् ॥ २७॥

सेवन्तिका—जइ एव्वं तइ मह ऊसिविणाइदं वि किं सुदं भवे। [यद्येवं तदा मम उत्स्वप्नायितमपि किं श्रुतं भवेत्।]

विदूषकः—(राजानं हस्ते गृहीत्वोपसृत्य) सुदं एव्व। [श्रुतमेव।]

(सेवन्तिका राजानं विलोक्य सभयहर्षलज्जमुत्तिष्ठति)

राजा—अयि पुलिनजघने! कृतमूरुयुगलसमावहेन साहसेन। (नायिकां निर्वर्ण्य)

किंचिद्विश्लथचङ्क्रमं ततकनत्काञ्चीनिनादं सखी-
विन्यस्तस्तनकुम्भसीमविगलत्सव्यानमभ्युत्थिता।
लज्जालीनदृढानुरागपिशुनं मन्दस्मितं तन्वती
साचीकृत्य मुखाम्बुजं हरति मे चेतो नतभ्रूरियम् ॥

---

[1] नार्याः—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—(उपसृत्य) जेदु महाराओ। [जयतु महाराजः।]

राजा—अपि कुशलं ते सख्याः।

सारङ्गिका—महाराअस्स अणुअंपाविसेसेण एदाए कुसळं एव्व। [महाराजस्यानुकम्पाविशेषेणैतस्याः कुशलमेव।]

राजा—(विहस्य) त्वामेव सखीमुद्दिश्य कुशलमहमप्राक्षम्।

सारङ्गिका—अदो एव्व तं उद्दिसिअ मए उत्तरं दिण्णम्। [अत एव तामुद्दिश्य मयोत्तरं दत्तम्।]

राजा—स्वाभाविकान्यपि वचनानि चमत्कर्तुमतिनिपुणासि।

सारङ्गिका—परेंगिदं परिण्णादुं त्ति भणिदव्वम्। [परेङ्गितं परिज्ञातुमिति भणितव्यम्।]

विदूषकः—पिअसहि तुमं वि किंचि चाडुअं कहेहि। [प्रियसखि! त्वमपि किंचित् चाटुकं कथय।]

सेवन्तिका—सहि आअदाणं अम्हाणं महन्तो काळो अदिक्कंतो, ता जणणिं पेक्खिदुं गच्छम्हो। [सखि! आगतयोरावयोर्महान् कालोऽतिक्रान्तः, तस्माज्जननीं प्रेक्षितुं गच्छावः।]

विदूषकः—साहु कहिदं तुए चाडुअम्। [साधु कथितं त्वया चाटुकम्।]

सारङ्गिका—अइ जणणिं कदावि किं ण जाणासि, खणमेत्तं विळंबेहि। [अयि जननीं कदापि किं न जानासि, क्षणमात्रं विलम्बस्व।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—महाराअ पाअवेअणं सहिदुं ण पारेमि, उवविसामो।
[महाराज! पादवेदनां सोढुं न पारयामि, उपविशामः।]

(इति सर्वे उपविशन्ति)

सेवन्तिका—सहि घरअं गच्छेमि। [सखि! गृहं गच्छामि।]
(इति बहिर्गन्तुमुद्युङ्क्ते)

(सारङ्गिका सेवन्तिकाहस्तमाकर्षति)

(सेवन्तिका सारङ्गिकायाः पश्चाद्भागे उपविशति)

राजा—

लज्जावरणान्तस्स्था
साध्वसदुर्गं समाश्रिता बलवत्।
वितनोति विफलमबला
वितनोर्वीरस्य वीर्यसर्वस्वम् ॥ २९ ॥

सेवन्तिका—(सारङ्गिकान्तरिता निर्निमेषं राजानं विलोक्य स्वगतम्) एसो खु ससहररुइहर (णिरसणपडुदर) मणहरमुहसरसीरुहो विअसिदसिदंभोअपळाससविळासविसाळविळोअणो मिअमदविळिहिदविसेसकविसेसकमणीअणिडाळफळओ कुरुविंदिमणिविंदविळसंतसुहदंतपंत्तिकंतिकणंतरसाळपाळकिसाळराअंतरअगच्छदो संबरविमदविअअकंबुरुइरपरिणद्धकंधरो ळच्छीविहारगेहंतबाहंतरो दव्वीअरसव्वभौमदुव्वारगव्वखव्वीकळगसमत्थभुअत्थंभो केसरिकिसोरकिसोदर[1] विसोहिदकंचणसिअअ[1] सम-

[1] विसोहिदो महिदकंचणणिअअ-[विशोभितो महितकाञ्चननिचय]-ख.ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिदकडिप्पदेसो मदावळकरसमग्गसोहग्गमदावळिगळग्गहिदो-रुजुअव्वे कंदप्पमणिदप्पहरणप्पवीणजाणुओ मअरब्भमअ-रब्भाअंतजंघो कलसकुलिसकुसेसअंकुसप्पमुहरेहाळंकिदपदप्प-वालो सक्खा इक्खुसरासणो विअ पेक्खंताणं जणाणं कुणइ णअणाणंदम्। [एष खलु शशधररुचिधर(निरसनपटुतर,मनोहर-मुखसरसीरुहः विकसितसितांभोजपलाशसविलासविशाललोचनः मृगमदविलिखितविशेषकविशेषकमनीयनिटिलफलकः कुरुविन्द-मणिबृन्दविलसच्छुभदन्तपङ्क्तिकान्तिकमनीयरसालसालकिसल-यराजमानरदनच्छदः शम्बरविमतविजयकम्बुरुचिरपरिणद्ध-कन्धरः लक्ष्मीविलासगृहायमानबाह्वन्तरः दर्वीकरसार्वभौ-मदुर्वारगर्वखर्वीकरणसमर्थभुजस्तम्भः केसरिकिशोरकृशो-दरविशोभितकाञ्चनसिचयसमञ्चितकटिप्रदेशः मदावलकर-समग्रसौभाग्यमदावलीगलग्रहीतोरुयुगलः कन्दर्पमणिदर्पहरण-प्रवीणजानुकः मकरभ्रमकरभ्राजमानजङ्घः कलशकुलिश-कुशेशयाङ्कुशप्रमुखरेखालङ्कृतपदप्रवालः साक्षादिक्षुशरासन इव प्रेक्षमाणानां जनानां करोति नयनानन्दम्।]

सारङ्गिका—तुह सण्णिहाणे एसा एव्वं ळज्जेइ। अण्णहा उण अदिभूमिं गदाए उक्कंठाए पीडिज्जंती परिअणं वि पीडेदि। एदं वि सुणादु भवम्—गज्जेदकंधराहिरूढस्स तुह मुहचंदसंद-सणप्पहुदि सव्वसरीरविसारिकिसाणुविदाणसमाणपसूणसरासण-दाळुणदूसहजुवरवेअकिसबिसविसदसअळंगी चंदणाळेवणिमित्तं समीवसंपतप्परिअणं किदं किदकळणेणेत्ति णिवारेह। किंअ पसवसरकरपरिमुत्तसराणिअरमिहोवइअरसमुद्दिददहणज्जाळ-जाळविद्दुदकंचणभूसणाविळित्तसरीरा मज्झम्मि मज्झम्मि पुव्वा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वत्थं पवण्णाविअ दीसइ। अविअ--दुरंतणिरंतरचिंताणळदज्जंत-हिअएंघणसंधिसंभूदधूमसंसग्गमळिणं मोत्तिअहारं पेक्खिअ एसो णीळमणिहारो कुदो वेत्ति विम्भिदा होइ। एदं अ—अंजणद्दवकळिळणअणजुअळपरिगळिदसळिळधारापरिसित्तकंचु-ळिआ मणोहवसिळीमुहभआदो विअ आअम्भिअ आअम्भिअ वम्मणद्धाविअ पडिभाइ। अण्णं अ—इमस्सिं उज्जाणे पिअसहीवक्खत्थळणिक्खित्तबिसकिसळअफंसुमेत्तपरितत्तचंचूउडा बाळचक्कवाआ सअळं वि मिणाळणाळं संमइदमाणसा ण गिण्हंदि। इदं अ—संततं वि किं वि चिंतअंती हठादो कोइळकूइदं सोदूण अज्जुणो फग्गुणो ति पुणो पुणो पठइ। सुब्भ-करब्भुदएवि आदिच्चहिअअं आवट्टअंती पणामं कादुं उज्जुत्ता होइ। अण्णं अ—झाणळएण पुरो परिकप्पिअ तुमं संळ्ळवंती हसंती परिस्सजंती वावारमेत्तविमुहमाणसा आहारं णिद्दं वा ण जाणादि। इदो वरं जह तह वा मण्णेदु महाराओ। [तव सन्निधाने एवैवं लज्जते। अन्यथा पुनरतिभूमिं गतया उत्कण्ठया पीड्यमाना परिजनमपि पीडयति। इदमपि श्रुणोतु भवान्—गजेन्द्रकन्धराधिरूढस्य तव मुखचन्द्र-संदर्शनप्रभृति सर्वशरीरविसारिकृशानुवितानसमानप्रसूनशरासन-दारुणदुस्सहज्वरवेगकृशविसावशदसकलाङ्गी चन्दनालेपनिमित्तं समीपसंपतत्परिजनं कृतं कृतकरणेनेति निवारयति। किं च—प्रसवशरकरपरिमुक्तशरनिकरमिथोव्यतिकरसमुत्थितदहनज्वाला-जालविद्रुतकाञ्चनभूषणविलिप्तशरीरा मध्ये मध्ये पूर्वावस्थां प्रपन्नेव दृश्यते। अपि च—दुरन्तनिरन्तराचिन्तानलदह्यमान-हृदयेन्धनसन्धिसंभूतधूमसंसर्गमलिनं मौक्तिकहारं प्रेक्ष्य एष

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नीलमणिहारः कुतो वेति विस्मिता भवति । एतच्च—अ-
ञ्जनद्रवकलिलनयनयुगलपरिगलितसलिलधारापरिषिक्तकञ्चुलिका
मनोभवशिलीमुखभयादिव आगत्यागत्य वर्मनद्धेव प्रतिभाति।
अन्यच्च अस्मिन्नुद्याने प्रियसखीवक्षस्थलनिक्षिप्तविसकिसलय-
स्पर्शमात्रपरितप्तचञ्चूपुटाः बालचक्रवाकाः सकलमपि मृणालनालं
संशयितमानसा न गृह्णन्ति । इदं च-सन्ततमपि किमपि
चिन्तयन्ती हठात्कोकिलकूजितं श्रुत्वा अर्जुनः फल्गुन इति
पुनः पुनः पठति। शुभ्रकराभ्युदयेऽपि आदित्यहृदयमावर्तयन्ती
प्रणामं कर्तुमुद्युक्ता भवति । अन्यच्च—ध्यानलयेन पुरः
परिकल्प्य त्वां संलपन्ती हसन्ती परिष्वजन्ती व्यापारमात्र-
विमुखमानसा आहारं निद्रां वा न जानाति । इतः परं यथा
तथा वा मन्यतां महाराजः।)

राजा—

क्रमशः सरोरुहाक्षी
कालेन चिरेण यदनुभूतवती।
त्वद्वचनश्रवणादिह
युगपदशेषं मया तदनुभूतम् ॥ ३० ॥

विदूषकः—एदाए मअणज्जरो भूइसेवणेण [1]समणिज्जो[1] । [एतस्याः
मदनज्वरो भूतिसेवनेन शमनीयः।]

सारङ्गिका—जइ एदाइं अणुकंपेसि तइ ओसरो एसो एव्व।
[यद्येतस्यामनुकम्पसे तर्ह्यवसर एष एव।]

---

[1] णिसमणिज्जो [निशमनीयः]—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(लतागृहाद्बहिर्निर्गत्य) सहि सारंगिए कं वि विणोदं तुह मंतेमि सविहं एहि। [सखि सारङ्गिके! कमपि विनोदं तव मन्त्रयामि सविधमेहि।]

सारङ्गिका—(स्वगतम्) काळोइदपरिण्णाणचदुरो खु अय्यकोसीदओ। [कालोचितपरिज्ञानचतुरः खल्वार्यकौषीतकः।] (प्रकाशम्) सहि सेवंदिए अय्यकोसीदअवअणं सोदूण आअच्छम्मि, एत्थ एव्व चिट्ठ। [सखि सेवन्तिके! आर्यकौषीतकवचनं श्रुत्वा आगच्छामि, अत्रैव तिष्ठ।]

सेवन्तिका—सहि सारंगिए मं विसज्जिअ कहिं दाणिं गच्छसि। [सखि सारङ्गिके! मां विसृज्य केदानीं गच्छसि।] (इति जिगमिषन्त्याः सारङ्गिकायाश्चेलाञ्चलं गृह्णाति।)

सारङ्गिका—सहि सुवो महाराअस्स अंतेवुरं गच्छंतिं तुमं किं एसा अणुसरिस्सदि त्ति मण्णेसि। [सखि! श्वो महाराजस्यान्तःपुरं गच्छन्तीं त्वां किमेषा अनुसरिष्यतीति मन्यसे।] (इति विधूय विदूषकेण सह निष्क्रान्ता)

राजा—भीरु! बिभेषि किमिति विजनोपवनेऽपि। (इति सेवन्तिकामङ्के बलादुपवेश्य) अयि सेवन्तिके!—

ममान्तिके सम्प्रति याचितं त्वया
पयोधरालिङ्गनमङ्गनामणे।
अवश्यदेयं खलु तत्समागतं
भवेत्प्रतिज्ञा विफला ममान्यथा॥ ३१॥

सेवन्तिका—(सस्मितम्) उसिविणाइदं खु तम्। [उत्स्वप्नायितं खलु तत्।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—प्रथमवासनापरिणामः खलु स्वप्नो नाम।

सेवन्तिका—अदक्किदव्वसुदत्थविसआ वि सिविणिआ दीसंदि। [अतर्कितद्भुतार्थविषया अपि स्वप्ना दृश्यन्ते।]

राजा—तर्हि सम्प्रति याचतो वितर मे परिरम्भम्।

सेवन्तिका—याचंतेण जणेण जं पुच्छिदं तं ओसिअं वितरणिज्जं ति णत्थि मज्झ पडिण्णा। [याचकेन जनेन यत्पृष्टं तदवश्यं वितरणीयमिति नास्ति मम प्रतिज्ञा।]

राजा—(चाटुवचनश्रुतिमभिनीय)

अपरिग्रहेण वीणा
घुणसंहतिवक्त्रसात्कृता भवतु।
मोचासितासुधाना-
माचार्यो जयति [1]यत्त्वदालापः[1]॥ ३२॥

(चुबुकं गृहीत्वा) अयि! नैतावतो निषेधस्यायमवसरः।

लज्जासरसि निमग्नं
वदनाम्बुजमेतदुन्नमय कान्ते।
श्रमजलदूषितमालिके
मृगमदतिलकं समीकरोम्यधुना॥ ३३॥

(इति चुबुकमुन्नमयन्नधरचुम्ब[2]नमभिनयति[2])

सेवन्तिका—(स्वगतम्) अंबाए तादस्स वा अणुमदिं अंतरेण कण्णआजणविरुद्धं एदं कहं अणुमण्णेमि। अह वा संमिट्ठा

---

[1] यत्तवालापः-(क). [2] नं नाटयति-(क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विअ संउदळा विअ महापुरुसं अहिळसंती कहं ळोअस्स वअणीआ भविस्सम् । [अम्बायास्तातस्य वा अनुमतिमन्तरेण कन्यकाजनविरुद्धमिदं कथमनुमन्ये। अथवा शर्मिष्ठेव शकुन्तलेव महापुरुषमभिलषन्ती कथं लोकस्य वचनीया भविष्यामि (प्रकाशम्) (ससीत्कारम्) [महाराअ, मुंचेहि २ दसणक्खदं रअणच्छदे दट्ठूण जणणी मं कुप्पिस्सदि। महाराज! मुञ्चस्व २, दशनक्षतं रदनच्छदे दृष्ट्वा जननी मां कोपिष्यति ।]

राजा—(स्वगतम्) लज्जाभयमूर्यिष्ठेन जितं मौग्ध्येन।

अधरं मधुरसमधुरं
यावन्न पिबामि तावदेवैषा।
साध्वसलज्जाविवशा
साचीकुरुते मुखाम्बुजं सहसा ॥ ३४ ॥

(प्रकाशम्)

सचकितमुत्तिष्ठन्त्या
वक्षोरुहयोरिमे विपर्यस्ताः।
शशिमुखि मौक्तिकहारा-
स्तानहमधुना समीकुर्वे ॥ ३५ ॥

सेवन्तिका—(सस्मितम्) तिळअसमीकळणेण एव्व तत्तहोदो चदुरत्तणं परिण्णादम्। [तिलकसमीकरणेनैव तत्रभवतश्चतुरत्वं परिज्ञातम्।] (इति स्वस्तिकं बध्नाति, राजा पार्श्वयोर्नखान् निःश्य मुक्तस्वस्तिकां गाढमालिङ्गति)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका— (आलिङ्गनसुखमभिनीय स्वगतम्)

तुहिणज्जुहिपज्जंके
जळहरजढरे सुहारसद्दहादे
कप्पूरद्दवळित्ता
सइदा दाणिं अहं त्ति मण्णेमि ॥

[तुहिनद्युतिपर्यङ्के
जलधरजठरे सुधारसाह्लादे ।
कर्पूरद्रवलिप्ता
शयितेदानीमहमिति मन्ये] ॥ ३६ ॥

राजा—(परिष्वङ्गसुखमभिनीय)

मग्नः किंनु सुधार्णवेऽहमधुना वीचीभिरान्दोलितः
पाटीरद्रवपङ्किले हिमसरोमध्ये किमस्नासिषम् ।
राकाशीतमयूखपादनिकरैः किं वाहमाच्छादितः
कर्पूरद्रवसारिणीषु किमवागाहिष्यहं साम्प्रतम् ॥३७॥

(नेपथ्ये)

अब्भम्मणिअम् २, अहिरुहिअ चंपअरुक्खं कुसुमाइ अवचिण्णन्तो साहाभंगेण णिवदिदो गदचेदणो चिट्ठइ अय्यकोसीदओ। [अभ्रह्मण्यम् २, अधिरुह्य चम्पकवृक्षं कुसुमान्यवचिन्वन् शाखाभङ्गेन निपतितो गतचेतनस्तिष्ठत्यार्यकौषीतकः ।]

राजा—सर्वतः प्रमादी किलैष कौषीतकः । कथमेतदापत्स्यत [1] इति चिन्ताकुलितं मे हृदयम्[1] ।

---

[1] इति चिन्तासन्ततिभरितं ताम्यति मे चेतः—(ख).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—(स्वगतम्) अमिउ[1]प्पादणावसरे हाळाहळसमुग्गमणं विअ सारंगिआए वअणं [2]समापदिदम्। (प्रकाशम्) महाराअ पिअवअस्सं विआरेहि। (अमृतोत्पादनावसरे हालाहल-समुद्गमनमिव साराङ्गिकाया वचनं समापतितम्। महाराज! प्रियवयस्यं विचारय।)

(नेपथ्ये)

हिमजळसेअणताळविंतवीअणप्पमुहेहिं उवआरेहिं दिट्ठिआ समासासिदो अय्यकोसीदओ। (हिमजलसेचनतालवृन्तवीजन-प्रमुखैरुपचारैः दिष्ट्या समाश्वासित आर्यकौषीतकः।)

राजा—दिष्ट्या किल सम्प्रति प्रतिष्ठितो दक्षिणो बाहुः।

सेवन्तिका—पसण्णमुहकमळं महाराअं पेक्खिअ सत्थहिअअम्हि। (बहिर्विलोक्य ससाध्वसम्) अम्हहे अणत्थकारिणी सारंगिआ संजादा। जदो एदाए उग्घोसेण सव्वे वि भोइदा बंहणा वणपाळआ अ ळदामंदिरदुवारे समाअदा। [प्रसन्नमुखकमलं महाराजं प्रेक्ष्य स्वस्थहृदयास्मि। अहो अनर्थकारिणी साराङ्गिका संजाता। यत एतस्या उद्घोषेण सर्वेऽपि भोजिता ब्राह्मणा वनपालकाश्च लतामन्दिरद्वारे समागताः।]

राजा—अयि सेवन्तिके! महति सङ्कटे पतितासि। पश्य नानाजन-संबाधं लतागृहद्वारम्।

सेवन्तिका—(पुरो विलोक्य) किं करेमि, एक्कपदंदरिदा खु एदे सव्वे वि [किं करोमि, एकपदान्तरिताः खल्वेते सर्वेऽपि।)

राजा—महानयं प्रमादः।

---

[1] प्पाअणा—ग. [2] समावदिदम्—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—महाराअ किं अण्णं कहेमि। माणं परित्ताएहि
(महाराज! किमन्यत्कथयामि। मानं परित्रायस्व।)

राजा—न किंचिदपि विधातुमुचितोऽयं समयः। यतः—

आश्वास्यमानमधुना
परितः पश्यन्ति वेष्टयन्त इमे।
कालीकारुण्यमृते
कारणमन्यन्न पश्यामि॥ ३८॥

(स्मृतिमभिनीय) अयि मा भैषीः, सेनापतिना रणधीरेण निषादस्थपतिग्रहणावसरे सर्वजनादृश्यतापादिका मूलिका काचिदानीता। सा क्वचिदुपयोक्ष्यत इति करवालकोशे निक्षिप्ता तिष्ठति। (इति कोशाभ्यन्तरान्मूलिकामादाय)

निर्गत्य त्वं वल्लरीगेहमध्यात्
पश्यत्स्वेव ब्राह्मणौघेष्वमीषु।
विन्यस्येमां मूलिकां वेणिकान्तः
मन्दं मन्दं मन्दिरं याहि बाले॥ ३९॥

(इति वेणीमूले मूलिकां निधाय) अहो कीदृशमस्या मूलिकाया माहात्म्यम्।

शृणोमि मणिकिङ्किणीझणझणात्कृतिं मञ्जुलां
सुवर्णरशनालसत्कटितटी पुनर्नेक्ष्यते।
मुखाम्बुजपरीमलो मृगदृशः [1]समाघ्रायते[1]
मुखं तु न च दृश्यते कनककुण्डलालङ्कृतम्॥४०॥

---

[1] परिघ्रायते—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—सव्वप्पहारसुहदाइणो तत्तहोदो मए किं करणिज्जम्। इमं जणं कदा वि ण विसुमरेहि। [सर्वप्रकारसुखदायिनस्तत्र-भवतो मया किं करणीयम्। इमं जनं कदापि न विस्मर।]

(इति निष्क्रान्ता)

राजा—

घ्राणं जिघ्रति सौरभं कचगतं त्वक् च प्रियास्पर्शिनं
गृह्णीते पवनं सुवर्णरशनारावं शृणोति श्रुतिः।
जिह्वा तामनुवक्ति संस्मरति मे चेतश्च मन्दस्मितं
नेत्रद्वन्द्वमिदं तु वञ्चितमभूद्यान्त्या गृहं सुभ्रुवा॥

(विचिन्त्य) उचितमेवैतत्।

वञ्चयित्वा त्वगादीनि वीक्ष्य सौधस्थितां प्रियाम्।
यदनेन सुखं प्राप्तं तत्फलं भुज्यतेऽधुना॥ ४२॥

(अदक्षिणाक्षिस्पन्दनं रूपयित्वा सवितर्कम्)

वामं मे नयनं स्फुरत्यनुकलं, किं स्यादतोऽनीहितं
सख्युः स्याद्विपदागमः, स तु समाश्वस्तः स्वगेहं गतः।
दृष्टा सा सुतनुर्भवेत्पथि जनैः, सिद्धा हि सा मूलिका,
शत्रुः कश्चन संदधीत भुवि कस्तन्वीत मे विप्रियम्॥

(प्रविश्य प्रतीहारी)

प्रतीहारी—जेदु भट्टा, अमच्चो विण्णावेदि किंचि विण्णप्पं अत्थि त्ति। [जयतु भर्ता, अमात्यो विज्ञापयति किंचिद्विज्ञाप्यमस्तीति।]

राजा—प्रवेश्यतामविलम्बेन। (प्रतीहारी—तहेति—तथेति निष्क्रान्ता)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(ततः प्रविशति शुभमतिः)

शुभमतिः—विजयतां देवः ।

देशः समृद्धसस्यस्ते धनाढ्यं कोशमन्दिरम् ।
गजाश्वरथसैन्यं च वृद्धिमेति निरामयम् ॥ ४४ ॥

राजा—शुभमते ! उपविश्य विज्ञापय विज्ञाप्यम् ।

शुभमतिः—(उपविश्य) केरलदेशाधिपतिना मित्रवर्मणा किंचिदत्र पत्रं प्रहितम् । तदनुद्घाटितजतुद्रवमुद्रमेव समानीतं सविधे ।

राजा—(स्वगतम्) वामाक्षिस्पन्दनं व्याख्यातम् । हन्त सेवन्तिका-मूलकमेव किंचिदनीहितमापतितमिति मन्ये । (प्रकाशम्) उन्मुच्य वाचय वाचकमाकर्णयामः ।

शुभमतिः—(पत्रं वाचयति) अगणितगुणगणमणिरोहणधरणिभृतो निरवधिनिरुपधिकरुणारसार्द्रचेतसो निखिलमहीपालकजालमौलिलालितशासनस्य प्रत्यर्थिपृथ्वीपतिप्रातिभयशरासनस्य महाकुलीनस्य महोदारस्य बसवेन्द्रमहीपतेः मित्रभूतो मित्रवर्मा विज्ञापयति—

वंशागतं हि शरणागतरक्षकत्वं
धात्रीसुतासहचरस्य यथा तथा ते ।
एतादृशस्य मदपत्यजनावतृत्वं
स्तुत्यं कथं भवति धार्मिकसार्वभौम ॥ ४५ ॥

राजा—(स्वगतम्) प्रस्तुतसंशयनिरसनाय न वाचकमिदं पर्याप्तम् । (प्रकाशम्) ततस्ततः—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभमतिः—

सामन्तभूमिपालेन सख्या मे चित्रवर्मणा ।
पुनः प्रतिष्ठितो राज्ये पूर्वपुण्यवशादहम् ॥ ४६ ॥

राजा—(स्वगतम्) किमन्यदपत्यकलत्रप्रमुखस्वजनप्रेषणलेखनादुत्तरमवशिष्येत । (प्रकाशम्) ततस्ततः—

शुभमतिः—

भूम्ना कृपाया भवतो महीन्दो
भूयादितो भूतिपरम्परा मे ।
प्रेम्णा कलत्रप्रमुखो मदीयः
प्रेष्यो भवद्दर्शनतः कृतार्थः ॥ ४७ ॥

राजा—(स्वगतम्)

यत्तदाशङ्कितं पापं जज्ञे तस्य विनिश्चयः ।
किं च—
प्रभविष्यत्यनङ्गोऽपि प्रहर्तुं कुसुमायुधैः ॥ ४८ ॥

(प्रकाशम्) वाहनधनप्रदानादिना बहुमत्य सत्वरमेव ते प्रेष्यन्ताम् ।

(विचिन्त्य)

प्रेम्णापत्यकलत्रादि प्रेष्यतामित्ययं ध्वनिः ।
मां [1] विजेतुं [1] प्रवृत्तस्य मन्मथस्य गुणध्वनिः ॥ ४९ ॥

---

[1] विहर्तुं—ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(प्रविश्य)

प्रतीहारी—देवी विण्णावेदि—मित्तवम्मणो महिसी कण्णआजणप्पमुहेहिं परिअणेहिं णिअदेसं पत्थादुकामा तत्तहोदो [1] अब्भणुण्ण[1] गहीतुं मह सविहं आगदुअ अंतेवुरे चिट्ठइ। ता सिग्घं एव्व अय्यउत्तो भवणं आअच्छदु त्ति। [देवी विज्ञापयति—मित्रवर्मणो महिषी कन्यकाजनप्रमुखैः परिजनैः निजदेशं प्रस्थातुकामा तत्रभवतोऽभ्यनुज्ञां ग्रहीतुं मम सविधमागत्यान्तःपुरे तिष्ठति। तस्माच्छीघ्रमेवार्यपुत्रो भवनमागच्छत्विति।]

राजा—(स्वगतम्) हा देवि!

सेवन्तिका मय्यनुरागिणीति
यैषा तव प्रत्यहमुज्झि[2]हीते[2]।
शङ्कापि सा तामनुसृत्य याति,
स्वस्था भव त्वं सरसीरुहाक्षि॥ ५०॥

(विचिन्त्य) हन्त किमद्य व्यवसितं विधिहतकस्य।

दृष्टा सा प्रथमं सरोजवदना स्पृष्टा निषादाहवे
दैवेनोपवने पृथुस्तनपरीरम्भोऽपि मे साधितः।
भूयोऽपि प्रमदावनेषु घटनं तस्या मम स्यादिति
प्रत्याशा विपिनापगेव विरतिं यातातिवेगादियम्॥

(प्रकाशम्) तर्हि सज्जीभूता शिबिकेह समानीयताम्।

(इति निष्क्रान्ताः सर्वे)

इति तृतीयोऽङ्कः

---

[1] अणुण्णं [अनुज्ञां]—क. [2] हीयते—ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(ततः प्रविशति विदूषकः)

विदूषकः—हन्त किं ववसिदं देव्वहदअस्स, जेण विदेसावट्ठिदाणं सेवंदिआवसवेंदाणं एक्कस्सिं पदेसे मेळणं संपादिअ अण्णोण्णाणुराअं अ समुप्पादिअ संपदं उक्कंठामेत्तफळओ सो पज्जवसाइदो। (विचिंत्य सोच्छ्वासम्) [1]मिअआविहारेण वा उववणप्पवेसेण वा[1] पुणो दंसणासंभावणाए अदिभूमिं गदं उक्खंठं कहंचि वि अवणेदुं पिअवअस्सो ण पारेदि त्ति चिंतासंतिसंतत्तो म्हि। (पुरो विलोक्य) एसा कहावदी मह भइणी सअं वि केरळदेसं पत्थादुकामा मं आपुच्छिदुं आअच्छइ। [हन्त किं व्यवसितं दैवहतकस्य, येन विदेशावस्थितयोः सेवन्तिकावसवेन्द्रयोरेकस्मिन् प्रदेशे मेलनं सम्पाद्यान्योन्यानुरागं च समुत्पाद्य साम्प्रतमुत्कण्ठामात्रफलकः स पर्यवसायितः। मृगयाविहारेण वा उपवनप्रवेशेन वा पुनर्दर्शनासंभावनया अतिभूमिं गतामुत्कण्ठां कदंचिदपनेतुं प्रियवयस्यो न पारयतीति चिन्तासन्ततिसन्तप्तोऽस्मि। एषा कथावती मम भगिनी स्वयमपि केरलदेशं प्रस्थातुकामा मामापृष्टुमागच्छति।]

(ततः प्रविशति कथावती)

कथावती—(उपसृत्य) दिट्ठिआ समासादिदं तुमं दट्ठूण पज्जवट्ठाविदो मह अप्पा। [दिष्ट्या समाश्वासितं त्वां दृष्ट्वा पर्यवस्थापितो ममात्मा।]

---

[1] सोहग्गे वा काळिउज्जाणे वा। [सौधाग्रे वा कालिकोद्याने वा]—क.ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—देसंतरं गच्छंतिं तुमं चिंतिअ पुणो वि अहं अदिमेत्तं उत्तंमामि। [देशान्तरं गच्छन्तीं त्वां चिन्तयित्वा पुनरप्यहमतिमात्रमुत्ताम्यामि।]

कथावती—मासमेत्तेण आअच्छम्मि, किं त्ति चिंतेसि। (मासमात्रेणागच्छामि, किमिति चिन्तयसि।)

विदूषकः—किं एदं चेळंचळेण पच्छादिअ कडिप्पदेसे णिक्खित्तं दंसेहि दाव। [किमिदं चेलाञ्चलेन प्रच्छाद्य कटिप्रदेशे निक्षिप्तं, दर्शय तावत्।]

कथावती—[1]णिअदेसं[1] पडिट्ठमाणाए सारंगिआए सेवंदिआचित्तफळअं तुह मुहादो महाराअस्स सविहं णेदव्वं त्ति मह हत्थे दिण्णम्, तं गिण्ह। [निजदेशं प्रतिष्ठमानया सारङ्गिकया सेवन्तिकाचित्रफलकं त्वन्मुखान्महाराजस्य सविधं नेतव्यमिति मम हस्ते दत्तम्, तद्गृहाण।] (इति चित्रफलकं विदूषकस्य हस्ते निक्षिपति)

विदूषकः—असंभावणिज्जमणरहा सारंगिआ किंत्ति अत्ताणं इदो वरं वि आआसेइ। होदु, पिअवअस्सस्स उक्कंठावणअणत्थं इदं उवजुज्जिस्सदि। [असंभावनीयमनोरथा सारङ्गिका किमित्यात्मानमितः परमप्यायासयति। भवतु, प्रियवयस्यस्योत्कण्ठापनयनार्थमिदमुपयोक्ष्यते।] (इति चेलाञ्चलेनाच्छादयन् गृह्णाति)

कथावती—सेवंदिआए वि उक्कंठावणोदणाणिमित्तं महाराअचित्तफळअं तुह मुहादो घत्तूण आणेहि त्ति मं अवट्ठाविअ पट्ठिदा

---

[1] केरळदेसं। [केरलदेशं]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारंगिआ। ता दाणिं एव्व तं संपादिअ मह हत्थे विदरेहि। [सेवन्तिकाया अप्युत्कण्ठापनोदननिमित्तं महाराजचित्रफलकं त्वन्मुखाद्गृहीत्वा आनयेति मामवस्थाप्य प्रस्थिता सारङ्गिका। तस्मादिदानीमेव तत्सम्पाद्य मम हस्ते वितर।]

विदूषकः—अम्हाणं देव्वपूजाघरए देवीए समं महाराअं विळिहिअ चित्तफळअं अवट्ठाविदं चिट्ठइ। तं घत्तूण दाणिं एव्व पडिट्ठेहि। [आवयोर्देवपूजागृहे देव्या समं महाराजं विलिख्य चित्रफलकमवस्थापितं तिष्ठति। तद्गृहीत्वेदानीमेव प्रतिष्ठस्व।]

कथावती—तह। [तथा] (इति निष्क्रान्ता)

विदूषकः—हेमंतकाळे कमळिणीपत्थावो विअ सेवंदिआपसंगो पडिभाइ। (विचिन्त्य) सोहारोहणदिणप्पहुदि सेवंदिआपिअवअस्साणं परप्पराणुराअवुत्तंतो [1]बहुप्पहारं[1] पुच्छिदेण वि मए ण कहिदो त्ति संकमाणमाणसा देवी पुव्वं विअ मं ण बहुमण्णेदि। ता दाणिं सेवंदिआपआणणिव्वुदहिअआए ताए समीवं गदो चाडुवअणेहिं तं अहिणंदिअ तदो पिअवअस्सं पेक्खामि। (इति परिक्रामन् मध्ये श्रुतिमभिनीय) एसा घरअगोदिआ चित्तफलअमूलअं कं वि अणत्थं कहेदि। किं त्ति एदं मए गहीदम्। [हेमन्तकाले कमलिनीप्रस्ताप इव सेवन्तिकाप्रसङ्गः प्रतिभाति। सौधारोहणदिनप्रभृति सेवन्तिकाप्रियवयस्ययोः परस्परानुरागवृत्तान्तो बहुप्रकारं पृष्टेनापि मया न कथित इति शङ्कमानमानसा देवी पूर्वमिव मां न बहुमन्यते।

---

[1] एहप्पहारं [एकप्रकारं]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदिदानीं सेवन्तिकाप्रयाणनिर्वृतहृदयायास्तस्याः समीपं गतश्चाटुवचनैस्तामभिनन्द्य ततः प्रियवयस्यं प्रेक्षामि। एषा गृहगोधिका चित्रफलकमूलकं ऽमप्यनर्थं कथयति। किमितीदं मया गृहीतम्।]

(नेपथ्ये)

एसो खु पडिक्खणविक्खरंतमदजळपरिमळपवमाणमाणवअसमाकारिदमहुअरणिअरमहुरझंकारमुहरिदगंडमंडळो संवग्गविहूणणमहीदळणिवादिदपादपोसिददुहाकिदकळेवरहत्थिवआवळोअणभीदपळाइदसअळजणणिवहो हेहआहिणाहबाहुसहस्सधारिदगदाविलसंतदंतजुअळभंजिदस्सत्थसाहिसाहाभक्खणत्थविविदपादाळगहीरमुहब्भंतरो हत्थग्गसमुदत्थविक्खित्थसिंखळप्पहारणिद्दअणिद्दळिदतादच्चिअपच्चासण्णणरतुरअमहिसबळीवद्दमुहचेदणाणिवहगळंदरगळंतरत्तपूरकद्दमिअणिअगइवहो सट्ठिहाअणो दुट्ठवाळणो सद्दूळो विअ परिदो वि परिब्भमइ। ता पळाइअ अत्तणो जीविदं परित्ताअहेत्ति। [एष खलु प्रतिक्षणविक्षरन्मदजलपरिमलसुरभिलपवमानमाणवकसमाकारितमधुकरनिकरमधुरझंकारमुखरितगण्डमण्डलः संवर्गविधूननमहीतलनिपातितपादपेषितद्विधाकृतकलेवरहस्तिपकावलोकनभीतपलायितसकलजननिवहः हेहयाधिनाथबाहुसहस्रधारितगदाविलसद्दन्तयुगलभञ्जिताश्वत्थशाखिशाखाभक्षणार्थविवृतपातालगभीरमुखाभ्यन्तरः हस्ताग्रसमुदस्तविक्षिप्तशृङ्खलाप्रहारनिर्दयनिर्दलितत्तादात्विकप्रत्यासन्ननरतुरगमहिषबलीवर्दप्रमुखचेतननिवहगलान्तरगलद्रक्तपूरकर्दमितनिजगतिपथः षष्ठिहायनो दुष्टवारणः शार्दूल इव परितोऽपि परिभ्रमति। तत्पलाय्यात्मनो जीवितं परित्रायथेति।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(आकर्ण्य सभयम्) एक्कपादेण एव्व धाविअ धाविअ देवीए भवणं पविसेमि। [एकपादेनैव धाव्य धाव्य देव्या भवनं प्रविशामि।] (इति निष्क्रान्तः)

(प्रवेशकः)

(ततः प्रविशति केरलदेशस्था ससखीजना सेवन्तिका)

सेवन्तिका—सहि सारंगिए अम्हाणं मणोरहणाडअस्स दाणिं एव्व णिव्वहणं जादंति मण्णेमि। [सखि सारङ्गिके! आवयोर्मनोरथनाटकस्येदानीमेव निर्वहणं जातमिति मन्ये।]

सारङ्गिका—सहि सहस्सं कहेहि, काळिआपूअणं उण ण विहळं होइ। [सखि! सहस्रं कथय, कालिकापूजनं पुनर्न विफलं भवति।]

सेवन्तिका—सहि दाणिं वि एआरिसं वअणं भणिदुं ण ळज्जेसि। [सखि! इदानीमप्येतादृशं वचनं भणितुं न लज्जसे।]

सारङ्गिका—सहि पुव्वं मूअंबिआणअरगमणं किं संभाविदं आसि। ता अदक्किदं [1] देव्वविळासिदं[1] केण जाणीअदि। [सखि! पूर्वं मूकाम्बिकानगरगमनं किं संभावितमासीत्। तस्मादतर्कितं दैवविलसितं केन ज्ञायते।]

सेवन्तिका—(विचिन्त्य सोच्छ्वासम्) सहि मंदभाइणीए मह किदे णिसग्गसुहगसरीरो सो महाणुहावो बिसविसदकिसेहिं अंगेहिं अदिमत्तं उत्तम्मइत्ति एदं एव्व पुणो पुणो सुमरिअ धज्जइ मे हिअअम्। हा किं करेमि। हा कस्स कहेमि। मूअंबिआ-

---

[1] देव्वसंघडणं—[दैवसंघटनं] ख.

CC-0: Jangamwadi Math Collection. Digitized by eGangotri

णअरट्ठिदाए मए काळिआळए वा सोहग्गे वा ळदाघरए वा महाराअदंसणं घडिस्सदि त्ति पच्चासाए जीविदं धारिदम्। संपदं उण दंसणासंभावणाए णिरासं तं विरमिज्जदि। सहि सारंगिए किं त्ति तुए उवेक्खीअदि, जाव सरीरे पाणो फुरइ दाव तावोवसमोवाअं चिंतेहि। [सखि! मन्दभागिन्या मम कृते निसर्गसुभगशरीरः स महानुभावो बिसविशदकृशैरङ्गै-रतिमात्रमुत्ताम्यतीति इदमेव पुनः पुनः स्मृत्वा धक्ष्यते मे हृदयम्। हा किं करोमि। हा कस्य कथयामि। मूकाम्बिका-नगरस्थितया मया कालिकालये वा सौधाग्रे वा लतागृहे वा महाराजदर्शनं घटिष्यतीति प्रत्याशया जीवितं कथमपि धारितम्। साम्प्रतं पुनर्दर्शनासंभावनया निराशं तद्विरम्यते सखि साराङ्गिके! किमिति त्वयोपेक्ष्यते। यावच्छरीरे प्राणः स्फुरति तावत्तापोपशमोपायं चिन्तय।]

साराङ्गिका—सहि अम्हाणं घरआ[1]रामाळंकारे[1] माहवीमंडवे तुमं उवणेदुं अहं उज्जुत्ता एव्व। [सखि! आवयोर्गृहारामालङ्कारे माधवीमण्डपे त्वामुपनेतुमहमुद्युक्तैव।]

सेवन्तिका—तळिहि घरआराममग्गं दंसेहि। [तर्हि गृहाराममार्गं दर्शय।]

साराङ्गिका—इदो इदो पिअसही। [इत इतः प्रियसखी।]
(इति गृहारामप्रवेशं नाटयतः)

सेवन्तिका—सहि सारंगिए एदेसु रुक्खग्गेसु अस्संतं विहरंतेहिं सउंतमिहुणेहिं जम्मंदरम्मि किं पुण्णं आअरिदम्। (आत्मनि सावज्ञम्) मह जंमणो वि पक्खिजम्मं साहुदरम्। (सविमर्शम्)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सव्वहा पावफळं एव्व जम्मं इत्थिआणम्। (साक्षेपम्) अह वा साहारणदाए सव्वा वि पमदा अहं ण कहेमि, महाराअमहिसिप्पमुहा केत्तिआओ पुण्णङ्गणाओ चिट्ठंदि। अहं एव्व मंदभाइणी सहस्समुहेहिं णिंदणिज्जा। [सखि सारङ्गिके! एतेषु वृक्षाग्रेष्वश्रान्तं विहरद्भिः शकुन्तमिथुनैर्जन्मान्तरे किं पुण्यमाचरितम्! मम जन्मनोऽपि पक्षिजन्म साधुतरम्। सर्वथा पापफलमेव जन्म स्त्रीणाम्। अथवा साधारणतया सर्वा अपि प्रमदा अहं न कथयामि, महाराजमहिषीप्रमुखाः कियत्यः पुण्याङ्गनास्तिष्ठन्ति। अहमेव मन्दभागिनी सहस्रमुखैर्निन्दनीया।]

सारङ्गिका—सहि जइ किंचि अहं कहेमि तइ तुमं मं पिअभासिणिं मण्णिस्सदि त्ति मोणं ओळंबेमि। तहवि एत्तिअमेत्तं सुणाहि, काळिअप्पसादेण सव्वासु वि पमदासु समग्गसोहग्गा तुमं एव्व। परंतु इमस्सिं ओसरे एव्वं वाहरंतिं मं जह तह वा मण्णेदु होदि। पच्चा उण मं बहुमण्णिस्ससि। [सखि! यदि किंचिदहं कथयामि तदा त्वं मां प्रियभाषिणीं मन्यस इति मौनमवलम्बामि। तथाप्येतावन्मात्रं श्रुणु, कालिकाप्रसादेन सर्वास्वपि प्रमदासु समग्रसौभाग्या त्वमेव। परं तु अस्मिन्नवसरे एव व्याहरन्ति मां यथा तथा वा मन्यतां भवती। पश्चात्पुनर्मां बहुमंस्यसे।]

सेवन्तिका—[1]एआरिसं वअणं सोदुं अहं ळज्जेमि[1]। होदु, माहवीमंडवं पविसामो। [एंतादृशं वचनं श्रोतुमहं लज्जे। भवतु, माधवीमण्डपं प्रविशावः।]

---

[1] एआरिसाइ वअणाइ सअं ळज्जाए मह कण्णपुडं ण प्पविसंदि। [एतादृशानि वचनानि स्वयं लज्जया मम कर्णपुटं न प्रविशन्ति.]—ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—जह रुइदं पिअसहीए। [यथा रुचितं प्रियसख्यै।]
(इति माधवीमण्डपप्रवेशं नाटयतः)

सेवन्तिका—(निःश्वस्य) हळा सारंगिए ळदामंदिरब्भंतरविरइदमहाराअविळसिदाणुचिंतणं वि पसूणसरासणस्सआसस्स इंधणं होइ। ता दूसहणीसीमणीसासवेअमळिणीकि[1]दाहारा केच्चिरं पच्चासामेत्तफुरंतजीविदा मंदभाइणी मअणदहणज्जाळावळीढजदुद्दवावत्थं अणुहविस्सम्। [हला सारङ्गिके! लतामन्दिराभ्यन्तरविरचितमहाराजविलसितानुचिन्तनमपि प्रसूनशरासनाश्रयाशस्येन्धनं भवति। तस्माद्दुस्सहनिस्सीमनिःश्वासवेगमलिनीकृताहारा कियच्चिरं प्रत्याशामात्रस्फुरज्जीविता मन्दभागिनी मदनदहनज्वालावलीढजतुद्रवावस्थामनुभविष्यामि।]

सारङ्गिका—सहि सिविणअप्पसण्णभअवदी[2]वअणाणुसारेण[2] मासमेत्तं तुमं पडिक्खेहि। [सखि। स्वप्नप्रसन्नभगवतीवचनानुसारेण मासमात्रं त्वं प्रतीक्षस्व।]

सेवन्तिका—सहि ण जाणासि, एक्को वि णिमेसो मह परमेट्ठिपरमाऊ होइ। जदो पज्जळिदप्पळअदहणप्फुळिङ्गुग्गारा पडीरसमीरकिसोरा मह पच्चंगं अवक्कंदंदि। (सानुतापम्)

कीस पुरा लवणोदे
कीसवरेहिं पडीरसअळो वि।
विरहिजणकाळमिच्चू
ण विणिक्खित्तो समुद्दरिअ एसो॥

---

[1] किदहारा [कृतहारा] इति स्यात. [2] वअणाणुवट्टणेण [वचनानुवर्तनेन]—ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[सखि! न जानासि, एकोऽपि निमेषो मम परमेष्ठिपरमायुर्भवति। यतः प्रज्वलितप्रलयदहनस्फुलिङ्गोद्गाराः पटीरसमीरकिशोरा मम प्रत्यङ्गमवस्कन्दन्ति।

कस्मात्पुरा लवणोदे
कीशवरैः पटीरशकलोऽपि।
विरहिजनकालमृत्यु-
र्न विनिक्षिप्तः समुच्छृत्यैषः॥ १॥]

(संस्कृतमाश्रित्य)

शीतो न मन्दपवनः
शितभावादेव शैत्यमस्याहुः।
आंहरतामुरगाणा-
मत एवैनं द्विधा कृता रसना॥ २॥

सारङ्गिका—हळा सेवंदिए एदा दक्खिणगवक्खा पिहिददुवारा करिअंदि। एदेण ताळविंतविरइदादवत्तेण अच्चुण्हं जोण्हं विणिवारेमि। [हला सेवन्तिके! एते दक्षिणगवाक्षाः पिहितद्वाराः क्रियन्ते। एतेन तालवृन्तविरचितातपत्रेणात्युष्णां ज्योत्स्नामपि निवारयामि।]

सेवन्तिका—अइ मुद्दे एव्वं ताणं पडिआरे वि कप्पंतकाळतडित्तंतब्भंतरपतंतासणिघोसस्स विअ कण्णजुअळं भिंदंतस्स परभिदपादइपंचमस्स जीविदविचिईसं अंतरेण किं मण्णेसि चिईसम्। [अयि मुग्धे! एवं तेषां परिहारेऽपि कल्पान्तकालतटित्वदभ्यन्तरपतमानाशनिघोषस्येव कर्णयुगलं भिन्दतः परभृतपातकिपञ्चमस्य जीवितविचिकित्सामन्तरेण किं मन्यसे चिकित्साम्।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—(स्वगतम्) किं एत्थ करणिज्जम्। चंदोदअसमअंमि [1]जळणिहि[1] पूरो विअ एदाए दुप्फरिहरो संदावो वि वट्टेइ। (प्रकाशम्) सहि कहं वि धीरत्तणं ओळंबिअ समस्ससिहि। [किमत्र करणीयम्। चन्द्रोदयसमये जलनिधिपूर इवैतस्याः दुष्परिहारः संतापोऽपि वर्तते। सखि कथमपि धैर्यमवलम्ब्य समाश्वसिहि।]

सेवन्तिका—

जइ वणप्पिआ करडंदि
जइअ सहआरा संमळीरुक्खंदि।
जइअ मंमहरहो भग्गचळणो
तइ णीसंसअं होइ मे समासासो॥

[यदि वनप्रियाः करटन्ति
यदि च सहकाराः शाल्मलीवृक्षन्ति।
यदि च मन्मथरथो भग्नचरण-
स्तदा निस्संशयं भवति मे समाश्वासः॥ ३॥]

सारङ्गिका—सहि पच्चग्गकप्पूरसारेहिं सव्वंगं वि अणुळिंपेमि। [सखि! प्रत्यग्रकर्पूरसारैः सर्वाङ्गमप्यनुलिम्पामि।]

(इत्यनुलिम्पति)

सेवन्तिका—वणमज्झम्मि खारसळिळसेअणं किदं तुए। [व्रणमध्ये क्षारसलिलसेचनं कृतं त्वया।]

---

[1] पारावार-ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—तुसारवारिसीअरणिअरेण सिंचेमि तुह सरीरम्। [तुषारवारिशीकरनिकरेण सिञ्चामि तव शरीरम्।]

सेवन्तिका—आमज्जरतत्तस्स पुक्खरिणीसळिळावगाहणं विअ एदम्। [आमज्वरतप्तस्य पुष्करिणीसलिलावगाहनमिवैतत्।]

सारङ्गिका—सहि कमळिणीपळासजाळताळविंतेहिं ओसीरमूळत्थइदेहिं वीजेमि। [सखि! कमलिनीपलाशजालतालवृन्तैरुशीरमूलस्थगितैर्वीजयामि।]

सेवन्तिका—गिम्मउहुविजिंभमाणदिणणाहमऊहसमूहसंतत्तस्स हसंदिआसेअणं विअ साहु एदं आअरिदम्। किं अ पाउडतावोवसमोवाएण वंमहतावोवसमं कादुं मण्णेसि। ण खु [1]पसिदि[1] परिमिदघिदप्पक्खेहेण दिव्वो उवरदो त्ति पज्जळिदं वि दावाणळं णिव्वावेइ सो। [ग्रीष्मर्तुविजृम्भमाणदिननाथमयूखसमूहसंतप्तस्य हसन्तिकासेवनमिव साध्वेतदाचरितम्। किं च प्रावृततापोपशमोपायेन मन्मथतापोपशमं कर्तुं मन्यसे। न खलु प्रसृतिपरिमितघृतप्रक्षेपेण दीप उपरत इति प्रज्वलितमपि दावानलं निर्वापयति सः।]

सारङ्गिका—(दूरतो विलोक्य) आयच्छंती एसा कहावदी विअ दीसइ। [आगच्छन्त्येषा कथावतीव दृश्यते।]

सेवन्तिका—सा एव्वं विअडगमणा ण होइ। [सैवं विकटगमना न भवति।]

---

[1] पसुदि–ख.

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 1204

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—पाअवेअणावसादो एआरिसी गई एदाए। सा एव्व पेक्ख, समीवं आअदा। [पादवेदनावशादेतादृशी गतिरेतस्याः। सैव पश्य, समीपमागता।]

सेवन्तिका—(पुनर्निर्वर्ण्य) सहि होइ होइ। [सखि भवति भवति।]

(ततः प्रविशति कथावती)

कथावती—(उपसृत्य) सहळो होदु दे मणोरहो। [सफलो भवतु ते मनोरथः।]

सेवन्तिका—होदि वंदामि, किं त्ति एत्तिओ दे विळंबो। [भवति। वन्दे। किमित्येतावांस्ते विलम्बः।]

कथावती—मंदं मंदं आअदम्हि। [मन्दं मन्दमागतास्मि।]

सारङ्गिका—पादआरिणी अद्धाहिआऊआ, ता विळंबिअ समाअदा। सहि कहावदि मए कहिदं वअणं जहवं किं आअरिदम्। [पादचारिणी अर्धाधिकायुष्का, तस्माद्विलम्ब्य समागता। सखि कथावति! मया कथितं वचनं यथावत्किमाचरितम्।]

कथावती—अह इम्। [अथ किम्]

सारङ्गिका—सहि तळिहि दंसेहि किं त्ति विळंबेसि। [सखि! तर्हि दर्शय, किमिति विलम्बसे।]

(कथावती चित्रफलकं सेवन्तिकायाः पुरतो निदधाति)

(सेवन्तिका चित्रगतं राजानं निर्निमेषं विलोक्य निमीलितनयना हृदयपारवश्यं नाटयति)

सारङ्गिका—अय्यकौसीदओ दिढं समासासिदो खु। [आर्यकौषीतको दृढं समाश्वासितः खलु।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथावती—अह इम्। [अथ किम्।]

सारङ्गिका—सहि मए दिण्णं चित्तफळअं अय्यकोसीदएण महाराअ-समीवं किं उवणीदम्। [सखि! मया दत्तं चित्रफलकमार्य-कौषीतकेन महाराजसमीपं किमुपनीतम्।]

कथावती—तुए दिण्णं तस्स हत्थे दादूण तस्स देव्वपूआघरअट्ठिदं एदं घेत्तूण तदाणिं एव्व पट्ठिदम्हि। [त्वया दत्तं तस्य हस्ते दत्वा तस्य देवपूजागृहस्थितमिदं गृहीत्वा तदानीमेव प्रस्थितास्मि।]

सेवन्तिका—एदं चित्तफळअं केण काळणेण कहावदी अत्थ आणी-दवदी। [एतच्चित्रफलकं केन कारणेन कथावत्यत्रानीतवती।]

(सारङ्गिका यथाऽऽचरितं कथयति)

सेवन्तिका—मह तुमं सव्वप्पआरहिदाअरणकिदाहिणिवेसा एव्व। देव्वदुव्विळासिदेण उण तुह मणोरहो पच्चूहीअदि। [मम त्वं सर्वप्रकारहिताचरणकृताभिनिवेशैव। दैवदुर्विलसितेन पुनस्तव मनोरथः प्रत्यूह्यते।]

सारङ्गिका—समए समाअदे भअवदीपसादेण सव्वं वि देव्वदुव्विळ-सिदं चंडमारुदणुण्णं तूळं विअ पळाएदि। [समये समागते भगवतीप्रसादेन सर्वमपि दैवदुर्विलसितं चण्डमारुतनुन्नं तूलमिव पलायते।]

सेवन्तिका—(चित्रगतं राजानं निर्वर्ण्य) सहि सारङ्गिए सोहग्गकाळिआ-ळअळदामंदिरब्भंदरेसु जह दिट्ठो महाराओ तह एव्व दाणिं वि दीसइ, पेक्ख।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तं एव्व मंदहसिदं महुरं अवंग-
ळीळाइदं वि विळसंतकणीणिअं तम् ।
रेहा वि मुद्दपमदाजणमोहिणी सा
किं एत्थ दीसइ मए ण विणा णिमेसम् ॥

[सखि सारङ्गिके ! सौधाग्रकालिकालयलतामन्दिराभ्यन्तरेषु यथा दृष्टो महाराजस्तथैवेदानीमपि दृश्यते, पश्य—

तदेव मन्दहसितं मधुरमपाङ्ग-
लीलायितमपि विलसत्कनीनिकं तत् ।
रेखापि मुग्धप्रमदाजनमोहिनी सा
किमत्र दृश्यते मया न विना निमेषम् ॥ ४ ॥]

सारङ्गिका—तं तं अंगं पेक्खन्ती मंमहो एव्व एव्वं ओदिण्णो त्ति मण्णेमि । [तत्तदङ्गं पश्यन्ती मन्मथ एवैवमवतीर्ण इति मन्ये ।]

सेवन्तिका—को संदेहो, एसो महापुरुसो जाहिं पमदाहिं ण विळोई-अदि ताणं अंधाणं अ को विसेसो । 'सहि अंगप्फरिसो वि किं तारिसो हवे । [कः सन्देहः, एष महापुरुषो याभिः प्रमदाभिर्न विलोक्यते तासामन्धानां च को विशेषः । सखि ! अङ्ग-स्पर्शोऽपि किं तादृशो भवेत् ।] (इति स्पृशति)

सारङ्गिका—(स्वगतम्) मुद्दा खु एसा । [मुग्धा खल्वेषा ।]

सेवन्तिका—दिट्ठितित्तिमेत्तफळअं चित्तफळअम् । (निःश्वस्य) सिवि-णिए वि दुळ्ळहं वळ्ळहसमाअमं पत्थंती अत्तणो वि ळज्जेमि । (सनैराश्यम्) हा सारंगिए इमिणा महापुरुसेण पुणो वि कदा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चंदकंतमणित्थंभ[1]सविब्भमेहिं[1]भुजेहिं समालिंगिदा भविस्सम्। [दृष्टितृप्तिमात्रफलकं चित्रफलकम्। स्वप्नेऽपि दुर्लभं वल्लभसमागमं प्रार्थयन्ती आत्मनोऽपि लज्जे। हा सारङ्गिके! अनेन महापुरुषेण पुनरपि कदा चन्द्रकान्तमणिस्तम्भविभ्रमाभ्यां भुजाभ्यां समालिङ्गिता भविष्यामि।] (इत्यश्रुमोचनमभिनयति)

कथावती—वंझाअमाणेसु कण्णप्पमुहेसु कळणेसु एक्कस्स णअणस्स तित्तिकळणं खुहिदेसु सव्वेसु अवच्चेसु पुढमावच्चस्स अण्णपरिवेसणं विअ न जुत्तं त्ति मज्झत्थेहिं अस्सुपूरेहिं दंसणं णिवारीअदि। [वन्ध्यायमानेषु कर्णप्रमुखेषु करणेष्वेकस्य नयनस्य तृप्तिकरणं क्षुधितेषु सर्वेष्वपत्येषु प्रथमापत्यस्यान्नपरिवेषणमिव न युक्तमिति मध्यस्थैरश्रुभिर्दर्शनं निवार्यते।]

सारङ्गिका—सहि कहावदि चित्तफळअं अस्सुजळेहिं अद्दीकिदं मळिणं भविस्सदि। अण्णदो अवट्ठावेहि। [सखि कथावति! चित्रफलकमश्रुजलैर्मलिनं भविष्यति। अन्यतोऽवस्थापय।]

(कथावती चित्रफलकमन्यतोऽवस्थापयति)

(सारङ्गिका सेवन्तिकानयने चेलाञ्चलेन [2]मार्जयति)

कथावती—(दूरतो विलोक्य) सहि सारंगिए एसा मन्दारिआ संभंता दूरे चळणं णिक्खिवंदी सच्चरं इदो एव्व आअच्छइ। [सखि सारङ्गिके! एषा मन्दारिका संभ्रान्ता दूरे चरणं निक्षिपन्ती सत्वरमित एवागच्छति।]

---

[1] सविळासेहिं [सविलासैः]–क. [2] परिमार्जयति–ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—(विलोक्य) कं वि अणत्थं कहिदुं एसा एत्थ आअच्छइ, ण संदेहो। [कमप्यनर्थं कथितुमेषात्रागच्छति, न सन्देहः।]

(प्रविश्य)

मन्दारिका—(स्वगतम्) पहादकाळीणविहावरीपइबिंबसप्पहं तुसारसीअरसंसग्गमळिणकमळसरिक्खं एदाए वअणं दाळुणवुत्तंतं साविअ कहं पेक्खिस्सम्। अह वा एआरिसं वअणं कहं ण कहिस्सम। (प्रकाशम्) हळा सेवंदिए (इत्यर्धोक्ते सबाष्पगद्गदं विरमति) [प्रभातकालीनविभावरीपतिबिम्बसप्रभं तुषारशीकरसंसर्गमलिनकमलसदृक्षमेतस्या वदनं दारुणवृत्तान्तं श्राव्य कथं पश्येयम्। अथवा एतादृशं वचनं कथं न कथयिष्यामि। हला सेवन्तिके!]

सारङ्गिका—अइ [1]अणत्थविकत्थणोज्जुत्ते[1] सिग्घं कहेहि। इमिणा संशएण हिअअं परिप्फुरइ। [अयि अनर्थविकत्थनोद्युक्ते! शीघ्रं कथय। अनेन संशयेन हृदयं परिस्फुरति।]

मन्दारिका—सहि किं कहेमि, भट्टिदारिआए [2]उव्वाहव्ववदेसेण[2] महंतं किं वि अमंगळं उवट्ठिदम्। [सखि! किं कथयामि, भर्तृदारिकाया उद्वाहव्यपदेशेन महत्किमप्यमङ्गलमुपस्थितम्।]

सारङ्गिका—सहि साअक्खं एव्व [3]भणसि,[3] [4]वित्थरेण[4] कहेहि। [सखि! साकाङ्क्षमेव भणसि, विस्तरेण कथय।]

---

[1] अणत्थवादिणि. [अनर्थवादिनि] क. [2] कळळाणव्ववदेसेण. [कल्याणव्यपदेशेन] क. [3] कहेसि [कथयसि] ख. ग. [4] फुडदरं, [स्फुटतरं] ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन्दारिका—अम्हाणं रज्जप्पडिट्ठावओ चित्तवम्मा ह्विओ एत्थ समाअदो त्ति जाणासि खु एदम्। [अस्माकं राज्यप्रतिष्ठापकश्चित्रवर्मा ह्यः अत्र समागत इति जानासि खल्वेतत्।]

सारङ्गिका—(साशङ्कम्) अह इम्। [अथ किम्।]

मन्दारिका—पच्चुवआराहिळासी सो अज्ज भट्टिदारिअं पत्थेदि। [प्रत्युपकाराभिलाषी सोऽद्य भर्तृदारिकां प्रार्थयते।]

सेवन्तिका—साहु विहे साहु, चंदकराहदि चंदण मारुद कोइळकूइद बंभरसंभमप्पमुहेहिं एदेहिं मळणकाळणेहिं परिदो पवट्टमाणेहिं वि एसा समीहिदकज्जसिद्धिप्पच्चासाए ण मरीअदि त्ति सज्जत्थणमळणोवाओ दाणिं तुए चिंतिदो। [साधु विधे! साधु। चन्द्रकराहतिचन्दनमारुतकोकिलकूजितभ्रमरसंभ्रमप्रमुखैरेतैर्मरणोपायैः परितः प्रवर्तमानैरप्येषा समीहितकार्यसिद्धिप्रत्याशया न म्रियत इति सद्यस्तनमरणोपाय इदानीं त्वया चिन्तितः।]

सारङ्गिका—(साङ्कुलिभङ्गम्) तिळोअप्पदाई वि भट्टिदारिआपरिग्गहं पच्चुवआरं मण्णिदुं ळज्जेदि। सअं उण ळज्जादरिद्दो विवेअसुण्णो कहं एणं पत्थेदि। होदु, भट्टा किं मण्णेदि। [त्रिलोकप्रदाय्यपि भर्तृदारिकापरिग्रहं प्रत्युपकारं मन्तुं लज्जते। स्वयं पुनर्लज्जादरिद्रो विवेकशून्यः कथमेनां प्रार्थयते। भवतु, भर्ता किं मनुते।]

मन्दारिका—तत्तहोदो परवन्ताणं अम्हाणं किं सदंतत्तणम्। जह रोएइ तह कारिअदु त्ति भणिअ भट्टिणीं वि संमदं कदुअ अत्थाणीमंडवे मोहुत्तिएहिं मुहुत्तं विआरेदि। [तत्रभवतः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परवतामस्माकं किं स्वातन्त्र्यम्। यथा रोचते तथा करोत्वित्युक्त्वा भट्टिनीमपि संमतां कृत्वा आस्थानीमण्डपे मौहूर्तिकैर्मुहूर्तं विचारयति।]

सारङ्गिका—वुद्धाणं जणाणं बुद्धिव्वामोहो भविस्सदि त्ति ळोअप्पवादं सच्चं करेदि भट्टा। [वृद्धनां जनानां बुद्धिव्यामोहो भविष्यतीति लोकप्रवादं सत्यं करोति भर्ता।]

सेवन्तिका—रज्जाहिगमो खु तादस्स [1]समीहिदो[1] ण उण सेवंदिआ। [राज्याधिगमः खलु तातस्य समीहितो न पुनः सेवन्तिका।]

सारङ्गिका—काळिआपूअणं वि एव्वं जादं ति जेमिणिमदं एव्व साहीअं त्ति मण्णेमि। [कालिकापूजनमप्येवं जातमिति जैमिनिमतमेव साधीय इति मन्ये।]

सेवन्तिका—[2]सगब्भप्पसूदं[2] वि मं कव्वादाणं हत्थे बळिं विअ चित्तवम्मणो हत्थे तादो [3]खिवइ[3] त्ति जिदं णिक्करुणदाए। [स्वगर्भप्रसूतामपि मां क्रव्यादानां हस्ते बलिमिव चित्रवर्मणो हस्ते तातः क्षिपतीति जितं निष्करुणतया।]

(संस्कृतमाश्रित्य)

शशाङ्कः स्वच्छन्दं ग्लपयतु [4]करैरग्निसदृशैः[4]
अनङ्गोऽपि स्वैरं विकिरतु शितानेव विशिखान्।
समीरः पाटीरो विसरतु वमन्नेव गरलं
निराशाहं प्राणानहह विजहाम्यद्य नियतम्॥५॥

---

[1] गरीयं. [गरीयान्] क. [2] सगब्भप्पभूदं. [स्वगर्भप्रभूतां] ख, ग. [3] णिक्खिवइ त्ति. [निक्षिपतीति] ख, ग. [4] करैरेष जटिलैः क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विज्यं विधेहि चापं
भीता न भणामि विमृश विषमेषो ।
प्रागेव मामुपहतां
प्रहरसि भूयोऽपि पञ्चभिर्बाणैः ॥ ६ ॥

सारङ्गिका—(स्वगतम्) कहं एणं पज्जुवट्ठावेमि, केणुव्वाएण वा समासासेमि, कीरिसी दसा संपत्ता एदाए, कहं वा एसा जीविदं ण मुंचेदि । हद्धि हद्धि पराहीणजीविदाणं जम्मम् । [कथमेनां पर्यवस्थापयामि, केनोपायेन वा समाश्वासयामि, कीदृशी दशा सम्प्राप्ता एतस्याः, कथं वैषा जीवितं न मुञ्चति । हा धिक् हा धिक् पराधीनजीवितानां जन्म ।]

कथावती—(स्वगतम्) किं त्ति एसा कण्णआ मूअंबिआणअरं आअदा, किं त्ति वा इमस्सिं जणे पेमं किदं मए, महाराओ वा एदं वुत्तंतं सोदूण कहं सुहं लहेइ, अय्यकोसीदओ वा कहं तं पज्जुवट्ठावेइ, हंत हंत, केत्तिअं दुव्विलसिदं देव्वस्स । [किमित्येषा कन्यका मूकाम्बिकानगरमागता, किमिति वास्मिन् जने प्रेम कृतं मया, महाराजो वेमं वृत्तान्तं श्रुत्वा कथं सुखं लभेत, आर्यकौषीतको वा कथं तं पर्यवस्थापयेत्, हन्त हन्त कियद्दुर्विलसितं दैवस्य ।]

सेवन्तिका— सहि सारंगिए कहेहि मह तुमं सव्वप्पहारहिदकाळिणी, खु। [सखि सारङ्गिके ! कथय, मम त्वं सर्वप्रकारहितकारिणी खलु ।]

सारङ्गिका—(स्वगतम्) हंत किं वि अणत्थणाडअं अहिणेदुं उवक्कमेइ पत्थावणम् । (प्रकाशम्) को संदेहो । [हन्त किमप्यनर्थनाटकमभिनेतुमुपक्रमते प्रस्तावनाम् । कः सन्देहः !]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—तळिहि दाणिं एव्व आणीअ विसं पदेहि। तर्हीदानीमेवानीय विषं प्रदेहि।] (इति हस्तं प्रसारयति)

सारङ्गिका—अज्ज भविदव्वं सुवो भविस्सदि। किं तुवरेसि। [अद्य भवितव्यं श्वो भविष्यति। किं त्वरसे।]

सेवन्तिका—सहि तुए एव्व चिंतितव्वं मए चिंतिदं त्ति इमस्सिं अत्थे सच्चराए होदीए होदव्वम्। तं विसज्जिअ जइ एव्वं कहेसि तइ किं करेमि। सहीववदेसेण तादो विअ तुमं वि [1]अमिच्चभूदासि[1]। [सखि! त्वयैव चिन्तितव्यं मया चिन्तितमित्यस्मिन्नर्थे सत्वरया भवत्या भवितव्यम्। तद्विसृज्य यद्येवं कथयसि तदा किं करोमि, सखीव्यपदेशेन तात इव त्वमप्यमित्रभूतासि।]

[2]सारङ्गिका[2]—सहि णक्खत्ताणुऊळत्तणविरहेण वा खुदप्पमुहेण वा केण वि दुण्णिमित्तेण पट्ठुदं एदं पच्चूहिदं किं ण भवे। [सखि! नक्षत्रानुकूल्यविरहेण वा क्षुतप्रमुखेन वा केनापि दुर्निमित्तेन प्रस्तुतमेतत् प्रत्यूहितं किं न भवेत्।]

सेवन्तिका—अइ आसापिसाइआ तुमं एणं अ बाहेइ। होदु, एसा मंदारिआ अत्थाणीमंडववुत्तंतं विआरिअ झत्ति आअच्छदु। [अयि आशापिशाचिका त्वामेनां च बाधते। भवतु, एषा मन्दारिका आस्थानीमण्डपवृत्तान्तं विचार्य झटित्यागच्छतु।]

---

[1] अमिच्चभूता होसि. [अमित्रभूता भवसि] ग. अमिच्चासि [अमित्रासि] क. [2] कथावती—ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन्दारिका—पुरुससहस्ससंकुळं अत्थाणीमंडवं अहं कहं गच्छेमि।
[पुरुषसहस्रसङ्कुलमास्थानीमण्डपमहं कथं गच्छामि।]

सेवन्तिका—तस्स उवाअं कहेमि, एदं मूळिअं गण्हिअ गच्छ।
[तस्योपायं कथयामि, एतां मूलिकां गृहीत्वा गच्छ।]
(इति मूलिकां कचभरे निक्षिपति)

मन्दारिका—तह [तथा] (इति निष्क्रान्ता)

सेवन्तिका—एदं पत्तं अय्यकोसीदअमुहादो महाराअसमीवं उवणेहि।
[इदं पत्रमार्यकौषीतकमुखान्महाराजसमीपमुपनयस्व।]

(इति पत्रं लिखित्वा वाचयति)

अदिसुकिदसाळिणीणं
समायमो दे घटेदि पमदाणम्।
मह मंदभाइणीए
वळळह सो अज्ज दुळळहो जादो।

किंअ—

मअणसरणिअरदहण-
ज्जाळाहदिजणिदवणकिणत्थइदम्।
विकिदं मुच्चिअ गत्तं
अण्णं गिण्हामि विमलकित्तिमअम्॥

[अतिसुकृतशालिनीनां
समागमस्ते घटते प्रमदानाम्।
मम मन्दभागिन्या
वल्लभ सोऽद्य दुर्लभो जातः॥७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच--

मदनशरनिकरदहन-
ज्वालाहतिजनितव्रणकिणस्थगितम् ।
विकृतं मुक्त्वा गात्र-
मन्यं गृह्णामि विमलकीर्तिमयम्] ॥८॥

(इति कथावतीहस्ते पत्रिकामर्पयति)

(नेपथ्ये)

ळदामंदिरब्भंतरवुत्तवुत्तंतमेत्तफळअं काळिआपूअणम् । [लता-मन्दिराभ्यन्तरवृत्तवृत्तान्तमात्रफलकं कालिकापूजनम् ।]

सारङ्गिका—मंदारिआए सद्दो विअ सुणीअदि । सहि मंदारिए सविहं एहि, किं पावसंकि एव्व भट्टिणो हिअअम् । [मन्दारिकायाः शब्द इव श्रूयते, सखि मन्दारिके ! सविधमेहि, किं पापशङ्क्येव भर्तुर्हृदयम् ।]

(मन्दारिका प्रविश्य शिरःकम्पयति)

सारङ्गिका—सहि मन्दारिए आहूदा वि समीवं किं णाअदासि, उत्तरं वि ण दिससि । [सखि मन्दारिके ! आहूतापि समीपं किं नागतासि, उत्तरमपि न दिशसि ।]

मन्दारिका—सहि समीवे णिसण्णम्हि, दिण्णं अ मए उत्तरं सीसकंपणेण । [सखि ! समीपे निषण्णास्मि । उत्तरं च दत्तं शिरःकम्पनेन ।]

सारङ्गिका—किं एदं अच्चरिअम्, समीवे सद्दो सुणीअदि । सा उण ण दीसइ । [किमिदमाश्चर्यम्, समीपे शब्दः श्रूयते । सा पुनर्न दृश्यते ।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—अइ मुद्दे विसज्जिअ मूळिअं [1]भणाहि[1]। [अयि मुग्धे! विसृज्य मूलिकां भण।]

मन्दारिका—(मूलिकामुद्दृह्य) सहि गाहिणंदणो वसिट्ठसबळं विअ बलादो जिघिस्संतो चित्तवम्मा निमित्तं वा मुहुत्तं वा ण विआरेदि। सुवो एव्व पुढमयामे पाणिग्गहो त्ति णिद्दारिअ उवकज्जं गदो। [सखि! गाधिनन्दनो वसिष्ठशबलामिव बलाज्जिहीर्षन् चित्रवर्मा निमित्तं वा मुहूर्तं वा न विचारयति। श्व एव प्रथमयामे पाणिग्रह इति निर्धार्योपकार्यं गतः।]

सेवन्तिका—(सधैर्यावष्टम्भम्) इदो वरं विलम्बो ण कादव्वो। सहि मन्दारिए बाळत्तणादो पहुदि परिवड्ढिदं कीरासिसुं मं विअ परित्ताएहि। [इतः परं विलम्बो न कर्तव्यः, सखि मन्दारिके! बाल्यात्प्रभृति परिवर्धितं कीराशिशुं मामिव परित्रायस्व।] (इति मन्दारिकाहस्ते शुकं प्रयच्छति) (मन्दारिका साश्रुपातं गृह्णाति)

सेवन्तिका—सहि सारंगिए ळोअंदरं गदावि अहं तुए ण विसुमरणिज्जा। [सखि सारङ्गिके! लोकान्तरं गताप्यहं त्वया न विस्मरणीया] (इति तामालिङ्गति)

सारङ्गिका—सहि एत्तिअं कालं कालिआभअवदिं वीससिअ अहं ओळंबिदधीरत्तणा अवट्ठिदा। सम्पदं उण णिरासा जादम्हि। [सखि! एतावन्तं कालं कालिकाभगवतीं विश्वस्याहमवलम्बितधैर्या अवस्थिता। साम्प्रतं पुनर्निराशा जातास्मि।] (इति सबाष्पगद्गदं प्रत्यालिङ्गति)

---

[1] भणेहि—(क. ग).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—हा देवि भअवदि !

पणमामि पाअकमळं
भत्ता एसेत्ति जइ मइ किवा दे ।
जह मह पमदाजम्मं
कदावि ण हि होदि तह करेहि[1] दअम्[1] ॥

[हा देवि भगवति !

प्रणमामि पादकमलं
भक्ता एषेति यदि मयि कृपा ते ।
यथा मम प्रमदाजन्म
कदापि न हि भवेत् तथा कुरु दयाम्] ॥९॥

(इत्यञ्जलिं बध्वा ध्यायति)

सारङ्गिका—जइ एदाए दुद्दसं ण पेक्खिस्सं त्ति अण्णदो गमिस्सं तइ एसा सज्जो एव्व जीविदं मुंचिस्सदि त्ति पुरो पादो ण चळइ । हंत हंत केत्तिअं संकटं संपत्तम् । [यद्येतस्या दुर्दशां न प्रेक्षामीत्यन्यतो गमिष्यामि तदैषा सद्य एव जीवितं मोक्ष्यतीति पुरः पादो न चलति । हन्त हन्त कियत्सङ्कटं संप्राप्तम् ।]

सेवन्तिका—(चित्रगतं राजानं विलोक्य)

लोअंदरं गदं मं
वळ्ळह सोदूण दुळ्ळहसमीहम् ।
मा होदु तुह विसादो
जगदि सदं संदि मारिसा पमदा ॥

---

[1] तुमं [त्वं]–(क. ग).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[लोकान्तरं गतां मां
वल्लभ! श्रुत्वा दुर्लभसमीहाम् ।
मा भवतु तव विषादो
जगति शतं सन्ति मादृशाः प्रमदाः] ॥ १० ॥

(इति पादयोः पतति)

सारङ्गिका—हंत सेवंदिआए पच्चिमसंदेसो एसो । [हन्त सेवन्तिकायाः पश्चिमसन्देश एषः ।]

सेवन्तिका — (चेलाञ्चलं कटितटे निबध्य वेणीमुद्गृह्णन्ती)

अयि वेणिए उवकिदं खु
मह तुए अदिदीहभूदाए ।
जं साहागळेसु तिगुणं
परिवेट्ठिदावि वितत्थिपरिमिदा ओसिस्सेसि ॥

[अयि वेणिके उपकृतं खलु
मम त्वया अतिदीर्घभूतया ।
यत् शाखागलयोस्त्रिगुणं
परिवेष्टितापि वितस्तिपरिमिताऽवशिष्यसे ॥ ११ ॥

(इति वेण्युद्ग्रथनं कर्तुमुद्युञ्जाना मध्ये श्रुतिमभिनीय वृक्षाग्रं पश्यति)

सारङ्गिका—पडिहदममंगळं २ [प्रतिहतममङ्गलम् २] (इति सत्वरमागत्य बलाद्वेणीं मोचयन्ती) सहि साहसिए इमादो साहसादो विरमेहि २। एसा पिंगळा मंगळाळावा मं गळादो वेणिं मोएहि त्ति भणादि । [सखि साहसिके ! अस्मात्साहसाद्विरम २। एषा पिङ्गला मङ्गलालापा मां गलाद्वेणीं मोचयेति भणति ।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—(निमित्तस्फूर्तिमभिनीय)

फंदइ वामं णअणं वामो बाहू मुहू मुहू फुरइ।
ऊरू चळइ हदाए वड्ढइ मह देण चावळं भूओ॥

[स्पन्दते वामं नयनं वामो बाहुर्मुहुर्मुहुः स्फुरति।
ऊरुश्चलति हताया वर्धते मम तेन चापलं भूयः॥

(इति सोच्छ्वासमशोकतरोरधस्तादुपविशति)

सारङ्गिका—(सहर्षम्) सहि मंदारिए पेक्खावईणामहेअं ईक्खणिअं आणेहि। णीसंसअं भाविकज्जं जाणीमो। [सखि मन्दारिके! प्रेक्षावतीनामधेयामीक्षणिकामानयस्व, निस्संशयं भाविकार्यं जानीमः।]

मन्दारिका—तह–[तथा] (इति निष्क्रम्य प्रेक्षावत्या सह पुनः प्रविशति)

(सेवन्तिका सारङ्गिकाहस्तमवलम्ब्योत्तिष्ठति)

प्रेक्षावती—(अवलम्बितमन्दारिकाहस्ता समीपमुपसृत्य) सफलो मनोरथो भवतु भवत्याः।

सेवन्तिका—भअवदि वंदामि। [भगवति! वन्दे।]

प्रेक्षावती—सखि! उपविश्यताम्। (सर्वे उपविशन्ति) वत्से मदाह्वाननिमित्तमभिधेहि।

सेवन्तिका—किंचि कज्जं मणसि कदुअ पुच्छेमि, तं अणुऊळं भविस्सदि वा ण वेत्ति चिंतिअ कहेतु भअवदी। [किंचित्कार्यं मनसि कृत्वा पृच्छामि, तदनुकूलं भविष्यति वा नवेति चिन्तयित्वा कथयतु भगवती।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रेक्षावती—(ध्यानमभिनीय)

वृत्तं मूकाम्बिकापुर्यां वृत्तं यत्तव बालिके।
परिज्ञातं मया सर्वं भगवत्याः प्रसादतः ॥ १३ ॥

किंच—

कालिकायामविस्रम्भः कान्ते मा भूत्कदाचन।
बसवेन्द्रमहीपालो भर्ता ते नात्र संशयः ॥ १४ ॥

सेवन्तिका—(सहर्षरोमाञ्चम्) अणुगहीदम्हि भअवदीए [अनुगृहीतास्मि भगवत्या]

प्रेक्षावती—इह त्वदागमनानन्तरम्—

रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः।
समग्रमभिधास्यामि सावधानमनाः शृणु ॥ १५ ॥

(सेवन्तिका बध्दस्वस्तिका तदुन्मुखी तिष्ठति)

सारङ्गिका—(स्वगतम्) तारिसीए दुद्दसाए विमुत्तं पसण्णमुहिं पिअसहिं पेक्खिअ अदिमुदिदा जादम्हि। [तादृश्या दुर्दशाया विमुक्तां प्रसन्नमुखीं प्रियसखीं प्रेक्ष्य अतिमुदिता जातास्मि।]

प्रेक्षावती—इहागमनावसरे त्वत्प्रतिमाप्रसाधितं कथावतीमुखेन कौषीतकहस्ते सारङ्गिकया दापितं किल चित्रफलकम्।

सेवन्तिकासारङ्गिके—(स्वगतम्) सअं किदवदी विअ भअवदी उवदिसइ। [स्वयं कृतवतीव भगवत्युपदिशति।]

प्रेक्षावती—तदनन्तरं गृहीतचित्रफलकः कौषीतकोऽवनीशगृहं गच्छन्नन्तरा मददन्तिनाभिद्रुतस्तदुत्सृज्य गतोऽन्तिकगृहान्तरम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिकासारङ्गिके—पमादो। [प्रमादः।]

प्रेक्षावती—तदनन्तरं दृश्यतरं तदवलोकमानो निरुद्ध्य गमनं निमेषमात्रं तदुद्गृह्य कराग्रेण कंचिदनेहसं कुञ्चितशुण्डादण्डो वेतण्डः [1] वीथीमध्ये विरम्य विरम्य [1] महाराजमहिषीभवनसमीपमाप।

सेवन्तिकासारङ्गिके—(स्वगतम्) पत्थावणा खु एसा अणत्थणाडअस्स। [प्रस्तावना खल्वेषा अनर्थनाटकस्य।]

प्रेक्षावती—तदनन्तरं—

उत्तुङ्गे सौधशृङ्गे तदुच्चिक्षेप [2] मतङ्गजः [2]।
[3] दैवादुपागता तत्र देवी जग्राह सत्वरम् [3] ॥ १६ ॥

सेवन्तिकासारङ्गिके—हंत घट्टकुडिए पहादम्। [हन्त, घट्टकुट्यां प्रभातम्।]

प्रेक्षावती—तदनन्तरं तयातिकुपितया निर्भरं निर्भर्त्सितो मदनवेदनया च ततोऽधिकमवधीरितो नियमिताहारो निराकृतविहारो महाराजो जनस्थानगतो जनकसुतापतिरिव विमुह्यान्विलप [4] न्विषीदन् [4] नवचन्दनघनसारतुषारवारिप्रमुखेन सकलजनमनोनन्दनेनापि परिजनसमाजानीतेन जानीते न किंचिदपि सुखमुपजातम्।

सेवन्तिका—(अपवार्य) सहि सारङ्गिए महाराओ मह किदे वसणपरंपरं अणुहोदि त्ति अत्ताणं णाहिणंदामि। [सखि सारङ्गिके! महाराजो मम कृते व्यसनपरम्परामनुभवतीत्यात्मानं नाभिनन्दामि।]

---

[1] तेन तेन पथा संचरमाणः—(क) [2] मदोत्कटः—(क) [3] दैवादागतया तत्र देव्या च जगृहे ततः—(क) [4] न्विहसन्—(क)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—एसो किळेसो एत्तिअं काळं एव्व। इदोवरं तुह [1] समाअमेण [1] णिरवहिअं सुहं अणुहवंतो सग्गस्स सईवई विअ पुढवीए एसो भविस्सदि। [एष क्लेश एतावन्तं कालमेव। इतः परं तव समागमेन निरवधिकं सुखमनुभवन् स्वर्गस्य शचीपतिरिव पृथिव्या एष भविष्यति।]

प्रेक्षावती—वत्से! [2] भवत्यामुपगतस्नेहानुबन्धेन [2] सकलमपि कौशलं मामकमाविष्करोमि।

प्रदर्शयामि प्रतिभामहिम्ना
चित्रं चरित्रं चिरकाललब्धम्।
विलोक्य मोदस्व विलासिनि त्वं
विश्वासमस्यां विदधासि येन ॥ १७ ॥

सेवन्तिका—अमाणुसचरित्तासु तुम्हेसु का वा ण वीससिइ। [अमानुषचरित्रासु युष्मासु का वा न विश्वसिति।]

(प्रेक्षावती तैलमिश्रेण चूर्णेन सेवन्तिकायाः [3] करोदर[3]मनुलिम्पति)

सेवन्तिका—(स्वगतम्) किं करिस्सदि भअवदी, चुण्णवेहवेण दाणिं एव्व किं महाराअसमीवं मं पावेदि। [किं करिष्यति भगवती, चूर्णवैभवेनेदानीमेव किं महाराजसमीपं मां प्रापयति।]

प्रेक्षावती—(निर्निमेषं कंचिदनेहसं पश्यन्ती पाणितलम्)

मूकाम्बिकापुरस्थस्य मूलिकाचूर्णवैभवात्।
पश्यसि त्वं पयोजाक्षि पार्थिवस्य मुखाम्बुजम् ॥

---

[1] समाअमणेण–समागमनेन—(ख. ग.) [2] भवत्यामुपजनितस्नेहानुबन्धेन—(क. ख.) [3] करतल—(ख. ग.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—केत्तिओ अणुग्गहो मइ भअवदीए (इति निर्निमेषं पश्यन्ती) भअवदि मह करदळं चाळिणी विअ रंधबहुलं ळक्खीअदि। [कियाननुग्रहो मयि भगवत्याः। भगवति! मम करतलं चालिनीव रन्ध्रबहुलं लक्ष्यते।]

प्रेक्षावती—वत्से! पुनरवलोक्यमानं सविवरमवलोकिष्यते।

सेवन्तिका—दाणिं एव्व तह दीसइ। [इदानीमेव तथा दृश्यते।]

प्रेक्षावती—वत्से! विवरमुखेन विस्तृतं बहिः प्रदेशं किमवलोकसे।

सेवन्तिका—अह इम्। [अथ किम्।]

प्रेक्षावती—वत्से! निष्प्रत्यूहनिरीक्षणाय ध्यायामि दन्तिमुखम्—

प्रतिकलचलत्कर्णोद्दीर्णप्रभञ्जनसंहति-
प्रगरणभृशव्यग्रोदग्रोपवीतविशोभितम्।
द्विरदवदनं गण्डाभ्यर्णभ्रमद्भ्रमराकुलं
पुरमथनजं धाम द्वैमातुरं पुरतोऽस्तु मे॥ १९॥

(इति ध्यानं नाटयति)

सेवन्तिका—(साश्चर्यम्) अम्हहे अच्चरिअम्। पडिकळचळंतकण्णजुअळोववीदीकिदोदग्गफणमण्डळकुंडळिमंडळमण्डिदो गण्डब्भण्णब्भमंतभमरकुळझंकारमुहरिदो दिरदवअणो विरूववेसो विहणेसो पुरो णिच्चंतो परिप्फुरइ। [अहो आश्चर्यम्, प्रतिकलचलत्कर्णयुगलोपवीतीकृतोदग्रफणामण्डलकुण्डलीमण्डलमण्डितो गण्डाभ्यर्णभ्रमद्भ्रमरकुलझंकारमुखरितो द्विरदवदनो विरूपवेषो विघ्नेशः पुरो नृत्यन् परिस्फुरति।] (इति भयं नाटयति)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रेक्षावती—वत्से ! मा भैषीः (इति फालफलके विभूतिरेखामर्पयन्ती)

स्तुत्वा पदनमन्मौनिस्तोमं द्वादशनामभिः ।
मनसैव नमस्कृत्य मार्गं याचस्व मामिनि ॥२०॥

सेवन्तिका—(तथा कृत्वा) दिण्णो एव्व मग्गो । [दत्त एव मार्गः ।]

प्रेक्षावती—अञ्जनाधिदेवतामनुचिन्तयामि, भयं ते मा भूत् ।

पदनतजनव्राते मातेव या [1]कुरुते कृपां[1]
विकसितसरोजाक्षी यक्षाङ्गनापरिवेष्टिता ।
धनुरिषुवरं खड्गं खेटं चतुर्भिरसौ भुजैः
सपदि दधती भूयान्मायाविनी मम देवता ॥२१॥

सेवन्तिका—अच्चाहिदम् २, भीसणवेसा एसा मं पहरंती विअ सविहं आअच्छइ । [अत्याहितम् २, भीषणवेषैषा मां प्रहरन्तीव सविधमागच्छति ।]

प्रेक्षावती—ध्यानवैभवेन प्रसन्नवदनामेनां कलयामि । (इति ध्यानं नाटयति)

सेवन्तिका—पसण्णमुही एसा मादा विअ सादरं मं विळोएइ । [प्रसन्नमुख्येषा मातेव सादरं मां विलोकयति ।]

प्रेक्षावती—मनसैव नतिमातन्वती प्रार्थयस्व पन्थानम् ।

सेवन्तिका—(तथा कृत्वा) अंजणदेवदं अदिक्कमिअ अण्णदो गदम्हि । [अञ्जनदेवतामतिक्रम्यान्यतो गतास्मि ।]

---

[1] ह्यनुकम्पते–(क)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रेक्षावती—[1] किमत्र[1] समुदीक्षसे ।

सेवन्तिका—अणेआवरणपरिवेट्ठिदो उच्चदरसिहरगोवुरपरिसोहिदो देव्वाळओ दीसइ को वि । [अनेकावरणपरिवेष्टितः उच्चतर-शिखरगोपुरपरिशोभितो देवालयो दृश्यते कोऽपि ।]

प्रेक्षावती—तदेव सुब्रह्मण्यपुरम् ।

गाङ्गेयं सिद्धगेयं कनकमयसरोजातदामाभिराम-
ग्रीवं भूरिप्रभावं शतमखतनयालोचनेन्दीवरेन्दुम् ।
वल्लीकान्तामतल्लीवदनसरसिजामोदनन्दन्मिलिन्दं
सुब्रह्मण्यं भजेथाः निखिलदिविषदामग्रगण्यं शरण्यम् ॥

ऐन्द्रीकेलिकृतापराधकुपितामानम्य येनाददे
फालासङ्गितदङ्घ्रियावकरुचा पश्यालिकस्याकृतिः ।
तेन क्रौञ्चविदारणोद्यमवता देवेन ते दीयतां
गौरीगर्भविशुध्दशुक्तिमणिना कल्याणपारम्परी ॥

सेवन्तिका—विविहग्गहार[2]सोहग्ग[2]सोहिदोभअ[3]कूळा कावि सोदस्सिणी दीसइ[3] । [विविधाग्रहारसौभाग्यशोभितोभयकूला कापि स्रोतस्विनी दृश्यते ।]

प्रेक्षावती—

मथितदुरितसंघे मारुताङ्कूरनृत्य-
न्नवनलिनमरन्दानन्दभृङ्गे तरङ्गे ।

---

[1] किं तत्र–(ख. ग). [2] समग्गसोहग्ग–[समग्रसौभाग्य.] (ख. ग.)
[3] कूळं कंवि सोदस्सिणीं पेक्खामि । [कूलां कामपि स्रोतस्विनीं पश्यामि (ख. ग.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनुजसमुदयानां मज्जतामाशुदत्त-
प्रथितसकलभद्रा दृश्यते तुङ्गभद्रा ॥ २४ ॥

सेवन्तिका—[1] कस्सि वि दिव्वरूपे देव्वाळए अब्भुदयोसावेसा कावि देवदा दीसइ[1] । [कस्सिन्नपि दिव्यरूपे देवालये अद्भुतयोषावेषा कापि देवता दृश्यते ।]

प्रेक्षावती—

पाकारातिसरस्वतीसहचरश्रीकान्तमुख्यामरा-
नीकानर्घकिरीटशेखरपदा राकाशशाङ्कानना ।
साकारा करुणा पुरारितरुणी या कामधेनुः सतां
सा कामस्थितिसाधका भगवती मूकाम्बिका सेव्यताम् ॥

सेवन्तिका—(अन्यतो विलोक्य) सहि सारंगिए काळिउज्जाणे ळदामंदिरब्भंदरे किसबिसविसदसरीरो दीहदरणीसासतंमंतमुहकमळो अय्यकोसीदएण किं वि चिंतअंतो महाराओ दीसइ । [सखि सारङ्गिके ! कालिकोद्याने लतामन्दिराभ्यन्तरे कृशबिसविशदशरीरो दीर्घतरनिश्वासताम्यन्मुखकमलः आर्यकौषीतकेन किमपि चिन्तयमानो महाराजो दृश्यते ।] (इति देहपारवश्यं नाटयति)

सारङ्गिका—सहि भअवदीमाहप्पादो दंसणसुहं चिरं अणुहोहि । [सखि ! भगवतीमाहात्म्यात् दर्शनसुखं चिरमनुभव ।]

---

[1] पुरदो महंतो को वि देव्वाळओ विळोएइ । [पुरतो महान् कोऽपि देवालयो विलोक्यते]–(क)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—(स्वगतम्) अदिभूमिं गदं उक्कंठं अवणेदुं महाराअं दिढं [1]परिसाज्जिस्सम्[1]। [अतिभूमिं गतामुत्कण्ठामपनेतुं महाराजं दृढं परिष्वजिष्ये।] (इति बाहू प्रसारयति)

(सर्वा हसन्ति)

सेवन्तिका—हंत संपदं किं किदं मए मुद्दाए, परिस्संगसुहळोहेण दंसणसुहं वि पच्चूहिदम्। [हन्त साम्प्रतं किं कृतं मया मुग्धया, परिष्वङ्गसुखलोभेन दर्शनसुखमपि प्रत्यूहितम्।]

साराङ्गिका—अइ मुद्दे अंजणमाहप्पकिदं एदं त्ति अजाणीअ परिस्सङ्गकिदे किं त्ति बाहू पसारिदवदीसि। [अयि मुग्धे! अञ्जनमाहात्म्यकृतमिदमित्यज्ञात्वा परिष्वङ्गकृते किमिति बाहू प्रसारितवत्यसि।] (इति सेवन्तिका[2]नयनमुन्मृजति[2])

सेवन्तिका—(सस्मितम्) महाराअमुहचंदसंदंसणपरवसाए मह जहत्थं एदं त्ति फुरिदम्। [महाराजमुखचन्द्रसंदर्शनपरवशाया मम यथार्थमेतदिति स्फुरितम्।]

प्रेक्षावती—चिरविप्रयुक्तसमीहितवस्तुसंदर्शनं मोषयति मनीषाम्। (परितो विलोक्य) माध्याह्निकसरोऽवगाहनाय निजमुटजं प्रविशामि।] (इत्युत्तिष्ठति। सर्वा अनूत्तिष्ठन्ति)

प्रेक्षावती—सखि! सुखमास्यताम्, भविष्यति ते मनोरथः।

(इति निष्क्रान्ता)

---

[1] परिस्सजेमि [परिष्वजेयं]–ख. ग. [2] नयने चेलाञ्चलेन परिमार्जयति–ख. ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका—सहि सारंगिए [1]तुह संविहाणेण[1] मए चिंतिदादो [2]अणत्थादो[2] कहं वि मोइदंम्हि। सुवो पुढमयामे तादेण चिंतिदादो अणत्थादो मं मोएदुं उवाअं कं चिंतेसि। [सखि सारङ्गिके! तव संविधानेन मया चिंतितादनर्थात्कथमपि मोचितास्मि। श्वः प्रथमयामे तातेन चिन्तितादनर्थान्मां मोचयितुमुपायं कं चिन्तयसि।]

सारङ्गिका—(कर्णे) एव्वं विअ। [एवमिव।]

सेवन्तिका—साहु सारंगिए साहु, मंदारिअं वि मंतिअ घरअब्भंतरं गच्छम्हो। [साधु सारङ्गिके! साधु, मन्दारिकामपि मन्त्रयित्वा गृहाभ्यन्तरं गच्छामः।]

(इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः

---

[1] देव्वजोएण [दैवयोगेन]—ख. ग. [2] संकटादो [संकटात्]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(ततः प्रविशतो मित्रवर्मणश्चेटयौ)

एका—अइ चंपअळदे भट्टिदारिआए पाणिग्गहणमहूसवमुहुत्तो पच्चासण्णो खु। [अयि चम्पकलते! भर्तृदारिकायाः पाणिग्रहणमहोत्सवमुहूर्तः प्रत्यासन्नः खलु।]

चम्पकलता—अइ मंजरिए यामपेरंतं किदसअणा अंतेवुरवुत्तंतं किं वि ण जाणासि। [अयि मञ्जरिके! यामपर्यन्तं कृतशयना अन्तःपुरवृत्तान्तं किमपि न जानासि।]

मञ्जरिका—किं तं कहेहि २। [किं तत्कथय २।]

चम्पकलता—हिओ रअणीपुव्वयामे एव्व भट्टिदारिआ मूअंबिआणअरं पट्ठिदा। [ह्यो रजनीपूर्वयाम एव भर्तृदारिका मूकाम्बिकानगरं प्रस्थिता।]

मञ्जरिका—(साश्चर्यम्) कहं विअ। [कथमिव।]

चम्पकलता—बसवेंदमहाराअसमीवं पेसिदुं भूसणवसणचित्तवत्थुभरिदो मंजूसाणिवहो कोसघरए साअंकाळे अवट्ठाविदो त्ति जाणासि खु एदम्। [बसवेन्द्रमहाराजसमीपं प्रेषितुं भूषणवसनचित्रवस्तुभरितो मञ्जूषानिवहः कोशगृहे सायंकालेऽवस्थापित इति जानासि खल्वेतत्।]

मञ्जरिका—अह इम्। [अथ किम्।]

चम्पकलता—तदो वेवाहिअभूसणग्गहणमिसेण भट्टिदारिआ सारंगिआमंदारिआहिं कोसघरअं गदा। [ततो वैवाहिकभूषणग्रहणमिषेण भर्तृदारिका सारङ्गिकामन्दारिकाभ्यां कोशगृहं गता।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मञ्जरिका—तदो तदो। [ततस्ततः।]

चम्पकलता—तदणंतरं भट्टिदारिआए मंदारिआ एव्वं कहिदा—
"अइ मन्दारिए इमस्सिं मंजूसाजुअळे सारंगिअं मं वि बंधेहि। सुवो भट्टिणीए पुणो पुणो पुच्छिदा वि [1]पहिदा वि[1] किं वि अहं ण जाणामि त्ति साहसं करिअ दिणजुअळाणंतरं तुमं वि मह समीवं एहि" त्ति। तदो मंदारिआ तह एव्व किदवदी। [तदनन्तरं भर्तृदारिकया मन्दारिकैवं कथितौ—"अयि मन्दारिके! अस्मिन्मञ्जूषायुगळे सारङ्गिकां मामपि बन्धय। श्वो भट्टिन्या पुनः पुनः पृष्टापि प्रहृतापि किमप्यहं न जानामीति साहसं कृत्वा दिनयुगलानन्तरं त्वमपि मत्समीपमेहि" इति। ततो मन्दारिका तथैव कृतवती।]

मञ्जरिका—तदो तदो। [ततस्ततः।]

चम्पकलता—तदो एदं वुत्तंतं अजाणंतेण भट्टिना दिणजुअळेन एदं बसवेंदसमीवं नेदव्वं त्ति णिजुत्तो अमच्चतणओ सुमदी अस्सदरीरहारूढो मंजूसा[2]णिअरं[2] गण्हिअ णिसामुहे एव्व णिग्गदो। [तत इमं वृत्तान्तमजानता भर्त्रा दिनयुगळेनेदं बसवेन्द्रसमीपं नेतव्यमिति नियुक्तोऽमात्यतनयः सुमतिः अश्वतरीरथारूढो मञ्जूषानिकरं गृहीत्वा निशामुख एव निर्गतः।]

मञ्जरिका—(साश्चर्यम्) साहु जादम् २। [साधु जातम् २।]

चम्पकलता—अज्ज सुज्जोदआणंतरं भट्टिणीए भट्टिदारिअं अंतेवुरकोसघरअ घरआरामेसु कहिं वि अपेक्खिअ उत्तम्मंतीए

---

[1] पहारपीडिदावि [प्रहारपीडितापि]—ख. [2] णिउरुंबं [निकुरुम्बं]—ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वच्चाणुकम्पापरित्ताए कोसघरआहिआरी णिव्भच्छिअ पुच्छिदो। तदो तेण मन्दारिआए उवरि संसओ णिक्खित्तो। तदो ताए मुहविवण्णत्तणं पेक्खिअ संकमाणमाणसाए भट्टिणीए [1]अस्सकसापहारेहिं[1] चिरकाळं [2]मंदरिआ संपीडिदा[2]। [अद्य सूर्योदयानन्तरं भट्टिन्या भर्तृदारिकां अन्तःपुरकोशगृह-गृहारामेषु कुत्राप्यप्रेक्ष्य उत्ताम्यन्त्या वत्सानुकम्पापरितप्तया कोशगृहाधिकारी निर्भर्त्स्य पृष्टः। ततस्तेन मन्दरिकाया उपरि संशयो निक्षिप्तः। ततस्तस्या मुखवैवर्ण्यं प्रेक्ष्य शङ्कमान-मानसया भट्टिन्या अश्वकशाप्रहारैश्चिरकालं मन्दारिका संपीडिता।]

मञ्जरिका—अचाहिदं आचहिदम्। [अत्याहितमत्याहितम्।]

चम्पकलता—तदो अविरदप्पहारपरंपरं असहंती पुव्वदिणवुत्तंतं मूअंबिआणअरवुत्तंतं अ सव्वं कहिदवदी। तदणंतरं तं विसज्जिअ भट्टिणो वि एदं वुत्तंतं साविअ अंतेवुरे चिंताउळा चिट्ठइ। [ततः अविरतप्रहारपरंपरामसहमाना पूर्वदिनवृत्तान्तं मूकाम्बिकानगरवृत्तान्तं च सर्वं कथितवती। तदनन्तरं तां विसृज्य भर्तुरपीमं वृत्तान्तं श्रावयित्वा अन्तःपुरे चिन्ताकुला तिष्ठति।]

मञ्जरिका—दाणिं किं भट्टा मण्णेदि। [इदानीं किं भर्ता मन्यते।]

चम्पकलता—रज्जप्पडिट्ठावएण चित्तवम्मणा बळिओ विरोहो समावदिदो। माणरक्खिणो महापुरुसस्स तस्स सअं एव्व ण

---

[1] अस्सकसाहिं—अश्वकशाभिः (क). [2] पहिदा—प्रहृता (क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिण्णा कण्णएत्ति तत्थ वि पमादो [1]आअदो त्ति[1] कंचि अणेहसं चिंतिअ देव्वविळसिदं केण ळंघीअदि त्ति दिढसंकप्पो महाराअसमीवं पत्तं पहिदवंतो। [राज्यप्रतिष्ठापकेन चित्रवर्मणा बलीयान्विरोधः समापतितः। मानरक्षिणो महापुरुषस्य तस्य स्वयमेव न दत्ता कन्यकेति तत्रापि प्रमाद आगत इति कंचिदनेहसं चिन्तयित्वा दैवदुर्विलसितं केन लङ्घ्यत इति दृढसंकल्पो महाराजसमीपं पत्रं प्रहितवान्।]

मञ्जरिका—किं तत्थ वाचिअम्। [किं तत्र वाचिकम्।]

चम्पकलता—णिअकण्णआणुराअवुत्तंतं अजाणंतेण मए अण्णहा [2]चिंतिदम्[2]। संपदं उण परिण्णादसअळवुत्तंतो पडिट्ठिदमाणसो पंचसेसु दिणेसु समीवं समागदुअ रअणाकरो कमळक्खस्स कमळं विअ, पव्वदसव्वभोमो सव्वस्स पव्वदिं विअ तत्तहोदो पअच्छेमि णिअकण्णअं सेवंदिअम्। दअं करोदु मइ महाराओ त्ति। [निजकन्यकानुरागवृत्तान्तमजानता मया अन्यथा चिन्तितम्। साम्प्रतं पुनः परिज्ञातसकलवृत्तान्तः प्रतिष्ठितमानसः पञ्चषेषु दिनेषु समीपं समागत्य रत्नाकरः कमलाक्षस्य कमलामिव, पर्वतसार्वभौमः शर्वस्य पार्वतीमिव तत्रभवतः प्रयच्छामि निजकन्यकां सेवन्तिकाम्। दयां करोतु मयि महाराज इति।]

मञ्जरिका—साहु चिंतिदं भट्टिणा। (विहस्य) सहि चित्तवम्मा दाणिं किं करेदि। [साधु चिन्तितं भर्त्रा। सखि! चित्रवर्मेदानीं किं करोति।]

---

[1] जादो त्ति—जात इति (ख, ग). [2] चिंतिअ सुहमदी पेसिदो—चिन्त्य शुभमतिः प्रेषितः (ख, ग).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चम्पकलता—इदो वरं अत्थ अवट्ठाणं ळज्जाकरं त्ति चिंतिअ णिअणअरं गदो। [इतः परमत्रावस्थानं लज्जाकरमिति चिन्तयित्वा निजनगरं गतः।]

मञ्जरिका—सहि गोदवम्मा विअ चित्तवम्मा वि रण्णो पावं ण चिंतेदि खु। [सखि! गोदवर्मेव चित्रवर्मापि राज्ञः पापं न चिन्तयति खलु।]

चम्पकलता—संपत्तमहाराआवट्टंभं अम्हाणं भट्टिणं सहस्सक्खो वि पेक्खिदुं बिहेइ। [सम्प्राप्तमहाराजावष्टम्भमस्माकं भर्तारं सहस्राक्षोऽपि प्रेक्षितुं बिभेति।]

मञ्जरिका—होदु, तुमं कहिं पत्थिदासि। [भवतु, त्वं कुत्र प्रस्थितासि।]

चम्पकलता—पत्तवेअणं मन्दारिअं विआरेदुं गच्छेमि। [प्राप्तवेदनां मन्दारिकां विचारयितुं गच्छामि।]

मञ्जरिका—अहं वि आअच्छम्हि। [अहमप्यागच्छामि।] (इति निष्क्रान्ते)

(प्रवेशकः)

(ततः प्रविशति निष्कुटगतः कामयमानावस्थो राजा)

राजा—

कान्याया मयि चन्द्रकान्तशिशिरैर्दोर्वल्लरीविभ्रमैः
आश्लिष्टे कुचकुम्भकुङ्कुमरजःपुञ्जाङ्कितोरस्थले।
योऽसावाचरदानुकूल्यमधुना निष्कारणं निर्घृणं
सोऽयं चन्दनशैलमन्दपवनः प्रत्यङ्गमास्कन्दति॥ १॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किं च—

विलिप्तः प्रत्यङ्गं हिमजलयुतश्चन्दनरसः
गृहीतः पर्यङ्कः सरसिजदलैरेव रचितः।
श्रिता हर्म्याग्रेषु प्रतिनिशमघर्मांशुकिरणाः
न शान्तः सन्तापस्तदपि बत वृद्धिं च भजते ॥ २ ॥

अपि च—

प्रतिपदमिदं पादद्वन्द्वं समेऽपि विसंस्थुलं
प्रसरति न चेदानीं चक्षुः पुरोविषयेऽपि मे।
सततजनितश्वासावेगैर्विशुष्यति चाधरो
[1]हत[1] विधिरहो कष्टावस्थामुपक्रमते मयि ॥ ३ ॥

(सविषादम्)

नीता [2]सरोजवदना[2] नियतेऽतिदूरं
कान्तं च चित्रफलकं करटच्छलेन।
देवीसमीपमुपनीतमिदं त्वयाद्य
किं ते मयापकृतमीदृशचिन्तनाय ॥ ४ ॥

(ततः प्रविशति ससखीजना देवी)

देवी—सहि ळीळावदि कोसघरआहिआरिणीए तारावळीए किं कहिदम्। [सखि लीलावति! कोशगृहाधिकारिण्या तारावल्या किं कथितम्।]

---

[1] बत (क). [2] पुरा शशिमुखी (क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लीलावती—अय्यकोसीदओ देवीए अंगुळीमुद्दिअं पदंसिअ चित्त-फळअं गण्हिअ गदो त्ति। [आर्यकौषीतको देव्या अङ्गुली-मुद्रिकां प्रदर्श्य चित्रफलकं गृहीत्वा गत इति।]

देवी—(सरोषम्) एआरिसं विप्पळंभं किदवंतो किं किं ण करेदि, होदु, घरआरामे अय्यकोसीदओ अय्यउत्तसमीवं आणिस्सदि। तत्थ गच्छम्हो। [एतादृशं विप्रलम्भं कृतवान् किं किं न करोति। भवतु, गृहारामे आर्यकौषीतकः आर्यपुत्रसमीप-मानेष्यति। तत्र गच्छावः] (इति निष्कुटवनप्रवेशं नाटयतः)

देवी—(पुरो विलोक्य) सहि अय्यउत्तो ळदामंडवे एक्को एव्व दूरावट्ठाविदपरिअणो किं वि सअं एव्व संळवंतो चिट्ठइ। होदु, अय्यकोसीदआअमणपेरंतं ळदंदरिदा चिट्ठेमो। [सखि! आर्यपुत्रो लतामण्डपे एक एव दूरावस्थापितपरिजनः किमपि स्वयमेव संलपन् तिष्ठति। भवतु, आर्यकौषीतकागमनपर्यन्तं लतान्तरिते तिष्ठावः।] (इति तथा कुरुतः)

(राजा "नीता पुरा" इति श्लोकं पुनः पुनः पठति)

देवी—देसंदरगदं असंभावणिज्जसमाअमं सेवंदिअं सन्ततं एव्वं चिंतअंतो अदिमेत्तं उत्तम्मइ अय्यउत्तो। किं करेमि दाणिम्। [देशान्तरगतामसंभावनीयसमागमां सेवन्तिकां सन्ततमेवं चिन्तयन्नतिमात्रमुत्ताम्यत्यार्यपुत्रः। किं करोमीदानीम्।]

राजा—निष्कुटवने सत्वरमायाहीति संकेतितो वयस्यः किमेतावन्त-मनेहसं विलम्बते।]

(ततः प्रविशत्यपटाक्षेपेण विदूषकः)

विदूषकः—एत्तिअं काळं मं अणुद्दवंती तुमं दाणिं कहिं पळाएसि। [एतावन्तं कालं मामनुद्रवन्ती त्वमिदानीं कुत्र पलायसे।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लीलावती—(पुरो विलोक्य) देवि तारावळिआ किदवंचणं अय्यको-सीदअं अणुद्दविअ भट्टा एत्थ चिट्ठइ त्ति पुणोवि घरअं गच्छइ। [देवि! तारावलिका कृतवञ्चनमार्यकौषीतकमनुद्राव्य भर्तात्र तिष्ठतीति पुनरपि गृहं गच्छति।]

राजा—सखे! कामुद्दिश्य किं व्याहरसि। श्रुणुमस्तावत्, उपविष्टो विस्पष्टमभिधेहि।

विदूषकः—अज्ज चाडुवअणेहिं विविहेहिं देविं बहुप्पआरं संदोसिअ दुऊळजुअळं मए याचिदम्। तदो ताए महाणुहावाए णिअं अंगुळीमुद्दिअं दादूण तारावळिआए समीवं पेसिदोम्हि। तदणंतरं तं [1]पदंसिअ चित्त[1]फळअं घत्तूण आअच्छंतो मग्गमज्झम्मि परिण्णाद[2]मामअवंचणाए[2] ताए अणुद्दुदो धाविअ धाविअ तुह सविहं आअदोम्हि। [अद्य चाटुवचनैर्विविधै-र्देवीं बहुप्रकारं संतोष्य दुकूलयुगलं मया याचितम्। ततस्तया महानुभावया निजामङ्गुलीमुद्रिकां दत्वा तारावलिकायाः समीपं प्रेषितोऽस्मि। तदनन्तरं तां प्रदर्श्य चित्रफलकं गृहीत्वा आगच्छन् मार्गमध्ये परिज्ञातमामकवञ्चनया तया अनुद्रुतः धाव्य धाव्य तव समीपमागतोऽस्मि।]

राजा—प्रमादबहुलैव प्रतिभा भवदीया।

देवी—तत्तहोदा किदो उवदेसो तारिसो। [तत्रभवता कृत उपदेशस्तादृशः।]

---

[1] पदंसिआङ्गुळीमुद्दिअं चित्त—[प्रदर्श्याङ्गुलीमुद्रिकां चित्र] (ख, ग).
[2] माआवंचणाए [परिज्ञातमायावञ्चनया]—(क).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—उक्कंठावणोदअं चित्तफळअं दंतिभएण मए गमिदं त्ति तं गहिदुं एत्तिअं साहसं किदवंतो म्हि। [उत्कण्ठापनोदकं चित्रफलकं दन्तिभयेन मया गमितमिति तद्गृहीतुमेतावन्तं साहसं कृतवानस्मि।]

राजा—यत्किंचिदेतदास्ताम्, उत्कण्ठाविनोदनाय समये समानीतमत्र चित्रफलम्।

(इति चित्रफलकं गृहीत्वा निर्निमेषं पश्यति)

लीलावती—पेक्ख, चित्तफळअविळिहिदसेवंदिआमुहचंदसंदंसणमेत्तेण अय्यउत्तस्स वअणं दिणमणिघिणिप्फरिसमेत्तेण सरसिअं विअ विअसेदि। [पश्य, चित्रफलकविलिखितसेवन्तिकामुखचन्द्रसंदर्शनमात्रेणार्यपुत्रस्य वदनं दिनमणिघृणिस्पर्शमात्रेण सरसिजमिव विकसति।]

देवी—सेवंदिआमुहचंदसंदंसणसमअविसेसो तारिसो। [सेवन्तिकामुखचन्द्रसंदर्शनसमयविशेषस्तादृशः।]

राजा—

लतानिवेशे ललना यथापुरा
समीक्षिता सा समुदञ्चितस्मिता।
तथात्र पश्यामि तलो[1]दरीमहं[1]
सुधासमं भाषितमेव दुर्लभम् ॥५॥

(निपुणं निर्वर्ण्य)

---

[1] दरीमिमाम्-ख.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन्दस्मिताङ्कुरमनोहरगण्डभागा
वक्षोजभारवहनासहनभ्रमध्या।
तत्तादृशेन कुटिलेन दृगञ्चलेन
चित्रस्थितापि सुदती हरते मनो मे ॥ ६ ॥

देवी—सहि ळीळावदि अय्यउत्तस्स सेवंदिआइं अणुराअं पेक्ख। [सखि लीलावति! आर्यपुत्रस्य सेवन्तिकायामनुरागं पश्य।]

विदूषकः—तारावळिआमुहादो देवी मह विप्पळंभं सोदूण अत्थ आगदुअ मं कुप्पिस्सदि। ता घरअं गच्छेमि। [तारावलिकामुखाद्देवी मम विप्रलम्भं श्रुत्वा अत्रागत्य मां कोपिष्यति। तस्माद्गृहं गच्छामि।]

देवी—एआरिससाअसआरिणो तुह घरअं गदस्स वि कहं विप्पमोक्खो। [एतादृशसाहसकारिणस्तव गृहं गतस्यापि कथं विप्रमोक्षः।]

राजा—वृक्षमूलाश्रयणेन वृष्टिपरिहारं मन्यसे। निश्चित एष प्रमादः।

देवी—चित्तफळअप्पमादो विअ एआरिसप्पमादसहस्सं वि उव्वेळं उव्वेअं किं जणइस्सदि। [चित्रफलकप्रमाद इवैतादृशप्रमादसहस्रमपि उद्वेलमुद्वेगं किं जनयिष्यति।]

विदूषकः—दाणिं एव्व देवी आअमिस्सदि ण संदेहो, ता एदं चित्तफळअं अण्णदो [1] अवट्ठावेमि [1]। [इदानीमेव देव्यागमिष्यति न सन्देहः, तस्मादिदं चित्रफलकमन्यतोऽवस्थापयामि।]

---

[1] अवट्ठावेहि [अवस्थापय]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लीलावती—देवि ईरिसेसु कज्जेसु कोसीदअस्स अवहिदत्तणं पेक्ख। [देवि! ईदृशेषु कार्येषु कौषीतकस्यावहितत्वं पश्य।]

देवी—अदो एव्व अय्यउत्तो दिणम्मि दिणम्मि भूसणाइ वसणाइ अ विदरेदि एदस्स। [अत एवार्यपुत्रो दिने दिने भूषणानि वसनानि च वितरत्येतस्य।]

राजा—

चित्रस्थितामपि विलोकितुमानताङ्गीं
वित्रस्तखिन्नहृदयोऽहमभूवमेवम्।
देशान्तरं प्रतिगतां मम जीवनाडीं
सेवन्तिकां कथमुपेत्य कृती भवेयम्॥ ७॥

देवी—अरे बम्भबंन्धो दाणिं वि अय्यउत्तेण सेवंदिए त्ति कुसुमविसेसो किं कहिदो। [अरे ब्रह्मबन्धो! इदानीमप्यार्यपुत्रेण सेवन्तिकेति कुसुमविशेषः किं कथितः।]

राजा—उत्कण्ठामात्रफलक एव सेवन्तिकायामनुराग उत्पादितो दैवेन।

(इत्युच्छ्वसिति)

विदूषकः—वअस्स होदा विसादो ण कादव्वो। पुव्वदिणपुच्छिदेण मोहुत्तिअमहामदिणा इदो णवमदिणे सेवंदिआपरिणओ महाराअस्स भविस्सदि त्ति ससवहं मह सविहं पडिण्णादम्। [वयस्य! भवता विषादो न कर्तव्यः। पूर्वदिनपृष्टेन मौहूर्तिकमहामतिना इतो नवमदिने सेवन्तिकापरिणयो महाराजस्य भविष्यतीति सशपथं मम सविधं प्रतिज्ञातम्।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—असंभावितं कथं भाषितं साहसिकेन।

विदूषकः—पुव्वं सेवंदिआए एत्थ आअमणं किं संभाविदं आसि। ता अदक्किदं देव्वसंगडणं केण जाणीअदि। [पूर्वं सेवन्तिकाया अत्रागमनं किं संभावितमासीत्। तस्मादतर्कितं दैवसंघटनं केन ज्ञायते।]

(प्रविश्य प्रतीहारी)

प्रतीहारी—जेदु भट्टा। केरळदेसादो मित्तवम्मामच्चतणओ मंजूसाधारीहिं पुरुसेहिं समागदुअ बहि चिट्ठइ। किं पवेसिज्जदु सो। [जयतु भर्ता। केरलदेशात् मित्रवर्मामात्यतनयो मञ्जूषाधारिभिः पुरुषैः समागत्य बहिस्तिष्ठति। किं प्रवेशयिष्यतु सः।]

राजा—(सोत्कण्ठाशङ्कम्) प्रवेश्यतामविलम्बेन।

देवी—सहि ळीळावदि ळदंदरिदे अम्हे केत्तिआइ विचित्ताइ पेक्खामो। [सखि लीलावति! लतान्तरिते आवां कियन्ति विचित्राणि पश्यावः।]

विदूषकः—सेवंदिआ[1]सहअरी[1] सारंगिआ अदिचदुरा जं किंचि अण्णारिसं संविहाणं करिस्सदि। [सेवन्तिकासहचरी सारङ्गिका अतिचतुरा यत्किंचिदन्यादृशं संविधानं करिष्यति।]

प्रतीहारी—तह। [तथा।] (इति निष्क्रान्ता)

(ततः प्रविशति मञ्जूषाधारिभिः पुरुषैः सह शुभमतिः)

शुभमतिः—(उपसृत्य) विजयतां देवः।

---

[1] सही [सखी]—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—उपविश्यताम्। (इत्यासनं निर्दिशति)

(शुभमतिरुपविशति)

राजा—अपि कुशलं सापत्यस्य सराष्ट्रस्य मित्रवर्मणो मित्रस्य।

शुभमतिः—महाराजकटाक्षेण सर्वत्र कुशलमस्मदुर्वीशस्य।

राजा—आगमनप्रयोजनमाभाष्यताम्।

शुभमतिः—

सेवन्तिकां स्वकन्यां
याचित्रे चित्रवर्मणे राज्ञे।
दित्सन् भवतः सविधं
प्रेषितवान्मां प्रियोक्तिकथनाय ॥ ८ ॥

राजा—(वैमनस्यं नाटयन् स्वगतम्) किं वर्णयामि दुर्विलसितं दैवहतकस्य, येन चिरकालानुसृता समापिता सेवन्तिकानुरागकथा। (सोच्छ्वासम्)

इतो दूरं याता सरसिजमुखीति प्रथमतः
कृशासीत्प्रत्याशा शरदि तटिनीवाम्बुजदृशी।
इदानीं घर्मादौ खरतरविवस्वद्द्युतिततिप्रपीतान्तस्तोया [1] कृतकसरसीव [1] प्रतिहता ॥ ९ ॥

(सवितर्कम्)

मयि सा कृतानुरागा मन्वीत कथं नु चित्रवर्माणम्।
अथ वा जनकाधीना दीना कुर्वीत मानिनी किं वा ॥

---

[1] विपिनतटिनीव—क.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(विमृश्य)

विशुद्धवंशस्य विलासवत्यां ममोचिता नैव मनःप्रवृत्तिः।
इतीव मे चिन्तयतोऽपि चेतो विकारमभ्येति विचित्रमेतत् ॥

लीलावती—देवि इदो वरं णिवुत्तप्पचासो भविस्सदि अज्जउत्तो।
[देवि! इतः परं निवृत्तप्रत्याशो भविष्यत्यार्यपुत्रः।]

देवी—सत्थहिअअम्हि दाणिम्। [स्वस्थहृदयास्मीदानीम्।]

विदूषकः—(स्वगतम्) विप्पळंभेण चित्तफळअं गण्हिअ देवीए वेमणसिअं विहा संपादिदम्। किं अ दाणिं एव्व गदुअ मोहुत्तिअमहामदिणो जीहं समूळं उम्मूळिस्सम्। [विप्रलम्भेन चित्रफलकं गृहीत्वा देव्या वैमनस्यं वृथा सम्पादितम्। किं च—इदानीमेव गत्वा मौहूर्तिकमहामतेर्जिह्वां समूलमुन्मूलयिष्यामि।]

राजा—(सधैर्यावष्टम्भम्) उद्घाट्यतामेकैका मञ्जूषा।

शुभमतिः—(एकामुद्घाट्य) द्वीपान्तरानीतानि कनकवसनान्येतानि।
(इति पुरतो निक्षिपति)

राजा—(स्वगतम्) प्रहितविचित्रकनकवसनमपि मित्रवर्माणं सेवन्तिकां चित्रवर्मसात्करोतीति नतमपि न तमभिनन्दयामि।

शुभमतिः—(अन्यामुद्घाट्य) वैडूर्यादिविचित्रचिरत्नरत्ननिर्मितानि ग्रैवेयकाङ्गुलीयकमुखानि भूषणानि। (इति समीपे निदधाति)

राजा—(स्वगतम्)

रत्नैरेतैरद्भुतैरम्बुजाक्षी
भूषायोग्या भूतले सैव नूनम्।
लोकातीतैः पारिजातादिवृक्षै-
र्नानारूपैर्नन्दनाख्या वनीव ॥ १२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभमतिः--(अन्यामुद्घाटयन्) अद्भुतं वस्तु किंचिदाहितमस्याम् ।

राजा—(स्वगतम्) अमात्यपुत्र! किमसत्यमभिधत्से । सेवन्तिका-मन्तरेण किमद्भुतमस्ति वस्तु जगत्याम् ।

(शुभमतिरुद्घाटयति) ततः प्रविशति मञ्जूषाया उद्गच्छन्ती सेवन्तिका)

(सर्वे साद्भुतं पश्यन्ति)

राजा---(स्वगतम्)

स्वप्नः किमेष साम्प्रत-
मथवा सङ्कल्पकल्पनैवेयम् ।
किं वा मनसो मोहः
शम्बरमथनस्य शाम्बरी किं वा ॥ १३ ॥

अथवा—

भित्वोत्थिता धरित्रीं
भीरुरियं नागकन्यका नूनम् ।
अनुनेतुमनुसरन्ती
साक्षाद्भुजगी समीक्ष्यते पश्चात् ॥ १४ ॥

(निपुणं निध्याय सहर्षरोमाञ्चम्)

तद्वक्त्रं शशिबिम्बडम्बरहरं ते चायते लोचने
वक्षोजौ तपनीयशैलममताधिक्षेपदक्षौ च तौ ।
वेणी सैव मरन्दद्दप्तमधुपश्रेणीमदोत्सारिणी
विद्युत्पुञ्जनिभं वपुश्च तदिदं पश्यामि नैवान्यथा ॥

([1] निर्निमेषतां [1] पश्यन्)

---

[1] निर्निमेषं तां–ख.ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेणीराहुफणायित-
कचमूलग्रस्तमास्यविधुमस्याः ।
दृष्ट्वा मज्जति नाभी-
सरसि मनस्ताप[1]पाप[1]धुतये मे ॥ १६ ॥

(सेवन्तिका लज्जा[2]नत[2]मुखी सबाष्पनयना राजानं पश्यति)

लीलावती—गदा [3]दुट्ठविट्ठी[3] वि अ पुणोवि समाअदा एसा । [गता दुष्टवृष्टिरिव पुनरपि समागतैषा ।]

देवी—(सेवन्तिकां विलोक्य) मुद्धसिणिद्धकुडिळचंचळेहिं दिअंचळेहिं हरिणसिसू विअ पेक्खंती एसा दिणमेत्तेण कीणिस्सदि अय्यउत्तम् । [मुग्धस्निग्धकुटिलचञ्चलैर्दृगञ्चलैर्हरिणशिशुरिव पश्यन्त्येषा दिनमात्रेण क्रीणिष्यत्यार्यपुत्रम् ।]

लीलावती—देवि! कुळरुव्वसीळेसु तत्तहोदीए वि किं अदिसैदं [4]एदाए[4], अय्यउत्तो उण विहा कामेइ। [देवि! कुलरूपशीलेषु तत्रभवत्या अपि किमतिशयितमेतस्याः, आर्यपुत्रः पुनर्वृथा कामयते ।]

देवी—सदंतचित्ताणं राआणं मणं को णिअच्छेदि । बालिआ अ अपुव्वा एसेत्ति दिणजुअळं सादरं पेक्खिइ एणं। तदो वरं अहं विअ एसावि । [स्वतंत्रचित्तानां राज्ञां मनः को नियच्छति। बालिका चापूर्वैषेति दिनयुगलं सादरं प्रेक्षत एनाम् । ततः परमहमिवैषापि ।]

---

[1] दुरित—ख, ग. [2] नम्र—ख, ग. [3] महाविट्ठी [महावृष्टिः] (क).
[4] एदाइं [एतस्याम्] ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—(स्वगतम्) साहु महामदे साहु २, अण्णा देव्वण्णा दे परिअरं कादुं वि ण जोग्गा एव्व। [साधु महामते साधु २ अन्या दैवज्ञास्ते परिचर्यां कर्तुमपि न योग्या एव।]

प्रतीहारी—वअस्स जोदिसकोसलं [1]मामअं [1]पेक्ख, अत्थ चिट्ठइ सारङ्गिआ। [वयस्य! ज्यौतषकौशलं मामकं पश्य, अत्र तिष्ठति सारङ्गिका।] (इत्यन्यां मञ्जूषामुद्घाटयन्) पेक्खह २ [पश्यथ २]

(ततः प्रविशति मञ्जूषाया उद्गच्छन्ती सारङ्गिका)

सारङ्गिका—(सबाष्पगद्गदम् (जेदु महाराओ। [जयतु महाराजः]

राजा—दिष्ट्या कुशलिनीमिह भवतीं पश्यामि सवयस्याम्।

शुभमतिः—(ससखीं सेवन्तिकां साश्रुतं पश्यन्) अयि सारङ्गिके! राजाननुमतमिदं कथमाचरितं भवत्या।

राजा—मित्रवर्मानुमतिमन्तरेण सर्वथैव साहसमिदमाचरितवती भवती।

देवी—मित्तवम्माणणुमदं वि [2]तुह [2] अणुमदं खु एदम्। [मित्रवर्माननुमतमपि तवानुमतं खल्वेतत्।]

(सारङ्गिका यथाचरितं कथयति)

लीलावती—देवि सारंगिआ अण्णारिसं संविहाणं करिस्सदि त्ति मए कहिदं खु। [देवि! सारङ्गिका अन्यादृशं संविधानं करिष्यतीति मया कथितं खलु।]

देवी—अदिनिवुणा साहसिआ अ। [अतिनिपुणा साहसिका च।]

---

[1] मह [मम] क. [2] तत्तहोदो [तत्र भवतः] ख, ग.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(स्वगतम्) [1]कृतसाहसिकयापि किमद्य साधितं सारङ्गिकया। यदद्य[1] मित्रवर्मानुमतिमन्तरेण सेवन्तिका कथमन्तःपुरं नेतव्येति चिन्तासन्ततिभरितं ताम्यति मे चेतः।

शुभमतिः—अयि सारङ्गिके! त्वामवस्थाप्य शुध्दान्ते राज्ञा नो मित्रवर्मणा साधिता महती कीर्तिः। साधुकर्म त्वया कृतम्।

सारङ्गिका—अमच्चमणे काउस्सरमंतरेण एदं वअणं भणाहि। जदो विसभक्खणेण वा [2]वेणिउग्गेहण[2] वा मरिस्संदीए एदाए जीविदं अवट्ठाविअ जीवावच्चो किदो भट्टा। किंअ महाराअकिदाणुराअं णिअकण्णअं अजाणंतेण भट्टिणा अण्णहाकिदं। दाणिं उण एदं वुत्तंतं सोदूण सअं एव्व समागदुअ महाराअस्स पअच्छेइ सेवंदिअं पेक्ख। [अमात्यमणे! काकुस्वरमन्तरेणेदं वचनं भणसि। यतो विषभक्षणेन वा वेण्युद्ग्रहेण वा मरिष्यन्त्या एतस्या जीवितमवस्थाप्य जीवापत्यः कृतो भर्ता। किं च महाराज-कृतानुरागां निजकन्यकामजानता भर्त्रा अन्यथाकृतम्। इदानीं पुनरेतं वृत्तान्तं श्रुत्वा स्वयमेव समागत्य महाराजस्य प्रयच्छति सेवन्तिकां पश्य।]

राजा—(स्वगतम्) दैवानुगुणं यत्किंचिद्भ[3]वतु[3] भवितव्यम्। सम्प्रति सेवन्तिकावलोकनेन दुरपनेयापि समुपनीता ममोत्कण्ठेति नन्दति मे हृदयम्।

---

[1] कृतसाहसिकया सारङ्गिकया किमद्य मे साध्येत, यदद्य–ख, ग.
[2] वेणि उग्गहणेण. [वेण्युद्ग्रथनेन] (ख) [3] वति (क.ग.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतीहारी—(प्रविश्य) जेदु भट्टा, मित्तवम्मसंपेसिदो को वि चारिओ बहीं चिट्ठइ। [जयतु भर्ता, मित्रवर्मसम्प्रेषितः कोऽपि चारिको बहिस्तिष्ठति।]

विदूषकः—[1] ईरिसेसु अत्थेसु [1] किं णिदेसं पडिक्खेसि। [ईदृशेष्वर्थेषु किं निदेशं प्रतीक्षसे।]

राजा—प्रवेशय, किं विलम्बसे।

प्रतीहारी—तह। [तथा] (इति सत्वरं निष्क्रान्ता)

(ततः प्रविशति चारिकः)

चारिकः—एस पणमामि। [एष प्रणमामि] (इति प्रणिपत्य शुभमतिहस्ते पत्रं ददाति)

राजा—

किमिति त्वरसे चित्त![2] वाचक[2]श्रवणेऽधुना।
स्पन्दमानामिदं चक्षुराख्याति तव मङ्गलम् ॥ १७ ॥

(शुभमतिः पत्रमुन्मुच्य वाचयति)

लीलावती—देवि किदसाहसा सेवंदिआ णिअणअरं पेसणिज्जेत्ति किं एत्थ वाचिअं हवे। [देवि! कृतसाहसा सेवन्तिका निजनगरं प्रेषणीयेति किमत्र वाचिकं भवेत्।]

देवी—जइ एव्वं तइ देव्वं किं त्ति एत्तिअं करिस्सदि। तहवि आकण्णेमो। [यद्येवं तर्हि दैवं किमित्येतावत्करिष्यति। तथाप्यकर्णयावः।]

---

[1] ईरिसे वि अत्थे [इदृशेऽप्यर्थे] (क) [2] वाचिक (क)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभमतिः—

करुणाभूम्ना भवतः कुशली निवसामि पालयन् राज्यम्।
[1] भावत्को[1]ऽयमुदन्तः प्रथते भानुप्रकाश इव ॥ १८॥

देवी—ळोअरीदी खु एसा। [लोकरीतिः खल्वेषा।]

शुभमतिः—

मैत्री सुलभा तस्याः परिपालनमेव दुष्करं लोके।

देवी—साहारणं एदं। [साधारणमेतत्।]

शुभमतिः—

अपराधिनि रचिता या सैव क्षान्तिः समीरिता सद्भिः॥

देवी—अज्जउत्तपक्खपादि एदं पडिभाइ। [आर्यपुत्रपक्षपात्येतत्प्रतिभाति।]

शुभमतिः—

निजकन्यकानुरागं
जानन्नपि नैवमन्यथाकरवम्।
मन्दारिकामुखेन
ज्ञात्वा सकलं ततोऽभ्यनन्दयमहम् ॥ २० ॥

देवी—अम्हाणं मणरहं सिहिळेइ वाचिअं एदम्। [आवयोर्मनोरथं शिथिलयति वाचिकमेतत्।]

---

[1] तावत्को–(ख. ग.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभमतिः—

पञ्चषदिवसेषु विभो
तत्रैवागत्य भव्यसङ्कल्पाम् ।
शर्वाय पार्वतीमिव
भवते कन्यां प्रदास्यामि ॥ २१ ॥

राजा—(स्वगतम्) एतद्वाचिकनिशमनसमनन्तरं सुप्रतिष्ठितं मे हृदयम् ।

देवी—सहि ळीळावदि सहळो अय्यउत्तस्य मणरहो। [सखि लीलावति ! सफल आर्यपुत्रस्य मनोरथः ।]

सारङ्गिका—अमच्चमणे दाणिं किं मं बहुमण्णोसि । [अमात्यमणे ! इदानीं किं मां बहुमन्यसे ।]

[1] सेवन्तिका—(स्वगतम्) पाणिमेत्तसाहारणी वच्चाणुकंपा सव्वभूददआपरस्स किं ण भवे। परंतु जणणीमुहादो तस्स मह वुत्तंतं अणिवेदिअ एत्तिअं मए अणुहूदम् ।

[प्राणिमात्रसाधारणी वत्सानुकम्पा सर्वभूतदयापरस्य किं न भवेत् । परं तु जननीमुखात्तस्य मम वृत्तान्तमनिवेद्यैतावन्मयानुभूतम् । [1]]

शुभमतिः—भर्तृदारिका बहुमन्यते भवतीम् । (राजानं विलोक्य) महाराज ! मामनुजानीहि, प्रतिपत्रं विलिख्य राजसमीपमेनं प्रेषयामि । (इति चारेण सह निष्क्रान्तः)

---

[1] ख पुस्तके नास्ति.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—वयस्य! यथा देवी नैनामवलोकते तथा कथं संविदध्याम्।

विदूषकः—इमस्सिं ळदामंडवे ससारंगिअं एणं अवट्ठाविअ देवीसमीवावट्ठिदेण तत्तहोदा सा वा ताए परिअणो वा जह अत्थ णाअच्छइ तह संविहादव्वम्। [अस्मिन्लतामण्डपे ससारङ्गिकामेनामवस्थाप्य देवीसमीपावस्थितेन तत्रभवता सा वा तस्याः परिजनो वा यथात्र नागच्छति तथा संविधातव्यम्।]

राजा—क्लिष्टमिदं प्रतिभाति।

विदूषकः—एदाइ भूसणाइ इमाइ अ वसणाइ दादूण देविं समासासेहि। [एतानि भूषणानीमानि च वसनानि दत्वा देवीं समाश्वासय।]

लीलावती—दरिद्दबम्हणबंधू एसो इदं वाहरइ। [दरिद्रब्राह्मण-बन्धुरेष इदं व्याहरति।]

राजा—(विहस्य) भर्तृगृहे पितृगृहे च निरवधिकश्रियमुपभुञ्जानाया देव्या भूषणवसनादिभिः अमृतप्राशिनामुदकशीकरैरिव व्याहृतमावर्जनम्।

विदूषकः—तळिहि सुवो मित्तवम्मसमाअमणाणंतरं किं करणिज्जं त्ति मण्णेसि। [तर्हि श्वो मित्रवर्मसमागमनानन्तरं किं करणीय-मिति मन्यसे।]

राजा—बहुप्रकारं विमृशतापि मया न किंचिदपि निर्णीतम्।

विदूषकः—तळिहि अणादरिअ देविं एदं उवक्कमिदव्वम्। [तर्ह्यनादृत्य देवीमेतदुपक्रमितव्यम्।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिका, देवी—किं से उत्तरं णिग्गच्छइ, ओहिदा सुणोमि। [किमस्योत्तरं निर्गच्छति, अवहिता श्रुणोमि।]

राजा—(स्वगतम्) यदीदमपि प्रतिषेधामि तदैषा नैराश्येन परिक्लिश्येत। (इत्यनुत्तरयन्नेव तूष्णीं तिष्ठति)

सेवन्तिका, देवी—अप्पडिसिद्धं एदं अणुमदं एव्व। [अप्रतिषिद्धमिदमनुमतमेव।] (इति वैमनस्यं नाटयतः)

देवी—(सरोषमुपसृत्य) अरे बम्हबंधो किं पळविदं तुए दाणिम्। [अरे ब्रह्मबन्धो किं प्रलपितं त्वयेदानीम्।]

(विदूषकः पलायनं नाटयति, सर्वे सभयं पश्यन्ति)

राजा—(स्वगतम्) प्रत्युत्पन्नमतिरपि वयस्यो न कस्याप्ययं समय इति हरिणप्लुतेन पलाय्य निलीयते क्वापि।

देवी—अय्यउत्तस्स विकत्थणं कहं तुह अहिमदं आसी। अइ सारंगिए एत्तिअं साहसं किदवदी तुमं देव्वादो मह मुहे पदिदासि। अइ सेवंदिए अकिदुव्वाहाए तुए जणणीपराहीणाए भविअ अंतेउरे एव्व अवट्ठादव्वम्। तं विसज्जिअ ळज्जासज्झसहीणा कामुई गणिआ विअ कहं संचरेसि देसंदरेसु। [आर्यपुत्रस्य विकत्थनं तव कथमभिमतमासीत्। अयि सारङ्गिके! एतावन्तं साहसं कृतवती त्वं दैवान्मम मुखे पतिताऽसि। अयि सेवन्तिके! अकृतोद्वाहया त्वया जननीपराधीनया भूत्वा अन्तःपुर एवावस्थातव्यम्। तद्विसृज्य लज्जासाध्वसहीना कामुकी गणिकेव कथं संचरसि देशान्तरेषु।]

सेवन्तिका—(स्वगतम्) अणत्थपरंपरं अणुहविदुं परमेट्ठिणा सिट्ठम्हि। [अनर्थपरम्परामनुभवितुं परमेष्ठिना सृष्टास्मि।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारङ्गिका—(स्वगतम्) सद्दूळमुहादो पिअसहिं परित्तादवदीए भअवदीए केत्तिअं एदम्। [शार्दूलमुखात्प्रियसखीं परित्रातवत्या भगवत्याः कियदेतत्।]

देवी—अय्यउत्त दाणिं णीहेदुएण कोवेण किं परवसा जादम्हि। अरे बम्हबंधो अय्यउत्तेण सेवंदिएत्ति कुसुमविसेसो कहिदो त्ति कहं सोहग्गे कहिदवंतो सि। (सकोपाटोपम्)[1] कोसीदआ-[1] अमणादो पुव्वं एव्व एत्थ समागदुअ पेक्खिदव्वं सव्वं वि पेक्खिदम्, सोदव्वं सव्वं वि सुदम्, इदोवरं तुह वअणं ण पेक्खामि। तुह वअणं ण सुणोमि। जं किंचि कहेदु तत्तभवम्। [आर्यपुत्र! इदानीं निर्हेतुकेन कोपेन किं परवशा जातास्मि। अरे ब्रह्मबन्धो! आर्यपुत्रेण सेवन्तिकेति कुसुमविशेषः कथित इति कथं सौघाग्रे कथितवानसि। कौषीतकागमनात्पूर्वमेवात्र समागत्य प्रेक्षितव्यं सर्वमपि प्रेक्षितं, श्रोतव्यं सर्वमपि श्रुतम्। इतः परं तव वदनं न पश्यामि। तव वचनं न श्रुणोमि, यत्किंचित्कथयतु तत्रभवान्।] (इति सेवन्तिकां हस्ते गृहीत्वा) सहि ळीळावदि सारंगिअं दिढं गण्हिअ पुरो याहि। [सखि लीलावति! सारङ्गिकां दृढं गृहीत्वा पुरो याहि।] (इति सत्वरं गच्छति)

राजा—(पुरत आगत्य हस्ताभ्यां मार्गं निरुन्धन्)

अनुसर मतिमेतां मामिकां तावता न
क्षतिरयि तव मुग्धे मा भजेथा विषादम्।
शपथमिह करोमि त्वं तथाप्यद्य कोपं
पदयुगपरिचर्याकिङ्करे किं करोषि ॥ २२ ॥

(देवी पदनतमपि राजानं विधूय ससारङ्गिकया लीलावत्या ससेवन्तिका निष्क्रान्ता)

---

[1] अय्यउत्तकोसीदअ [आर्यपुत्रकौषीतक]—(ख. ग.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा (सकरुणम्)—

प्रमदां प्रदर्श्य पुरतो
झटिति प्रत्यूहमाचरन् भूयः ।
व्यथयसि वृथा कतिदिना-
न्येवं त्वं मां दयादरिद्र विधे ॥ २३ ॥

विदूषकः— (लतान्तर्हितो देवीमन्तःप्रस्थितां दृष्ट्वा राजसमीपमुपसृत्य) इदो वरं किं कादव्वम् । तुह समाअमणप्पच्चासाए मंजूसाबंधणजणिदं वि किळेसं सहंती एत्तिअं दूरं आगदुअ देवीए बंदिग्गाहं गहिदात्ति महवि खिज्जइ हिअअम् । [इतः परं किं कर्तव्यम् । तव समागमनप्रत्याशया मञ्जूषाबन्धनजनितमपि क्लेशं सहन्ती एतावन्तं दूरमागत्य देव्या बन्दिग्राहं गृहीतेति ममापि खिद्यते हृदयम् ।]

राजा— (निःश्वस्य)

अक्षिद्वन्द्वमशीतदीधितिकरस्पृष्टासिताब्जोपमं
तस्या वामदृशो मुखाम्बुजमपि प्रातःशशाङ्कप्रभम् ।
गात्रं चातपतप्तचम्पकनिभं देव्या हृताया मुहुः
स्मारं स्मारमिदं विषीदति मनः संमोहमभ्येति च ॥

किंच—चिरकालानुसृतमञ्जूषान्तःस्थितिजनितश्रमापनयनावसरे—

सारङ्गिकाकरधृतव्यजनानिलेन
चेलाञ्चले विगलिते विशदे कुचाग्रे ।
तत्रैव मां निहितदृष्टिमुदीक्ष्य कान्ता
मन्दस्मितं व्यधित यद्वलते तदन्तः ॥ २५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपिच—

देव्या तया समाकृष्टा गच्छन्त्यन्तःपुरान्तरम् ।
मामेव सा यदैक्षिष्ट तन्मे मर्मणि घूर्णते ॥ २६ ॥

अन्यच्च—

मित्रवर्मणि समागते मया
किं विधेयमिति चिन्तयानया ।
तप्यते मम मनो मुहुर्मुहुः
[1] किं करोमि बत साम्प्रतं सखे[1] ॥ २७ ॥

विदूषकः—सेवंदिआकाळिआपूअणमाहप्पादो सव्वं वि सिज्झिस्सदि, किं त्ति चिन्तेसि । [सेवन्तिकाकालिकापूजनमाहात्म्यात्सर्वमपि सेत्स्यति, किमिति चिन्तयसि ।]

राजा—

इष्टं सिद्ध्यतु मा वा कष्टं कारगृहं गता सेति ।
चिन्ताकुलं मम मनो हन्त व्यामोहमभ्येति ॥ २८ ॥

(प्रविश्य)

प्रतीहारी—जेदु भट्टा, अमच्चो विण्णवेदि, केरळदेसाहिवई मित्तवम्मा अब्भुग्गमणादिपुरोसरं एत्थ आणीअ पडिमुहे पच्चग्गणिम्मिदे भवणे अवट्ठाविदो एव्वं कहेदि—"मोहुत्तिअमुहादो मुहुत्तं विआरिअ परिणअमहूसवाय सज्जीहोदु महाराओ । अहं उण वेवाहिअभूसणभूसिदाए सेवंदिआए समं कळ्ळाणवेदिअं

---

[1] संकटं महदिदं दुरुद्धरम्–(ख. ग).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अळंकरंतं तत्तभवंतं कण्णअप्पदाणसमए एव्व पेक्खिदुं इच्छेम्हि" त्ति। ता तस्स रण्णो किं उत्तरं कहिदव्वं त्ति। [जयतु भर्ता, अमात्यो विज्ञापयति, "केरलदेशाधिपतिर्मित्रवर्मा अभ्युद्गमनादिपुरःसरमत्रानीय प्रतिमुखे प्रत्यग्रनिर्मिते भवनेऽवस्थापित एवं कथयति—मौहूर्तिकमुखान्मुहूर्तं विचार्य परिणयमहोत्सवाय सज्जीभवतु महाराजः। अहं पुनर्वैवाहिकभूषणभूषितया सेवन्तिकया समं कल्याणवेदिकामलङ्कुर्वाणं तत्रभवन्तं कन्याप्रदानसमय एव प्रेक्षितुमिच्छामीति। तस्मात्तस्य राज्ञः किमुत्तरं कथितव्यमिति।]

राजा—यदभिरुचितं तत्रभवत इति विज्ञापनीयो मित्रवर्मेति प्रेषयित्वा तदन्तिकममात्यशुभमतिं, मौहूर्तिकमहामतिमत्र प्रवेशय।

प्रतीहारी—तह [तथा] (इति निष्क्रान्तः)

(प्रविश्य)

महामतिः—

तृतीयषष्ठरिष्फेषु शन्यर्काङ्गारकाः स्थिताः।
सप्तमे वर्तते चन्द्रः तिष्ठत्येकादशे गुरुः ॥ २९ ॥

किं च—

दिवाकरश्चैव निशाकरश्च
भूमीसुतः सोमसुतो गुरुश्च।
कविः स्थिरस्तावपि राहुकेतू
कुर्वन्तु सर्वे तव मङ्गलानि ॥ ३० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—महामदिं मुहुत्तं पुच्छदु पिअवअस्सो। [महामतिं मुहूर्तं पृच्छतु प्रियवयस्यः।]

राजा—

कारागृहे वसति सा
कन्या, देवी च दृश्यते कुपिता।
कथमिव मुहूर्तमेनं
पृच्छामि, सखे मनो मम त्रपते ॥३१॥

किं च—

कन्यां प्रेममहिम्ना
दातुं दूरादिहागतस्याद्य।
कथमिव पश्येयमहं
तस्य मुखं मित्रवर्मणो राज्ञः ॥३२॥

(इत्युद्विग्नमनास्तिष्ठति)

विदूषकः—महामदे केरळराअकण्णआपिरणअं देवी णाणुमण्णेदि त्ति मए कहिदं सोदूण किं कहिदवंतोऽसि, कहेहि। [महामते। केरलराजकन्यकापरिणयं देवी नानुमन्यत इति मया कथितं श्रुत्वा किं कथितवानसि, कथय।]

महामतिः—

घटयति परिणयमेषा
देवी स्वयमेव दृश्यतां चित्रम्।
न कदाचिदपि वचो मे
मिथ्येति भवन्तमचकथं पूर्वम् ॥३३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विदूषकः—तं दाणिं विवरीदं दीसइ खु। [तदिदानीं विपरीतं दृश्यते खलु।]

महामतिः—([1]अभिध्यानं[1] नाटयित्वा) पश्य महाराज! वैवाहिकभूषण-भूषितया सेवन्तिकया सह देवी भवदन्तिकमायास्यति।

(ततः प्रविशति वैवाहिकभूषणभूषितां सेवन्तिकां हस्ते गृहीत्वा सारङ्गिकादत्तहस्तावलम्बना देवी)

देवी—जेदु अय्यउत्तो। [जयत्वार्यपुत्रः]

राजा—(उत्थायाभ्युद्गच्छन् स्वगतम्)

सेवन्तिकामिदानीं
प्रेमातिशयेन लालयन्तीयम्।
नलिनीं विकासयन्ती
ज्योत्स्नेव विभाति मे देवी ॥३४॥

(प्रकाशम्) स्वागतं देव्यै!

(देवी हसति)

राजा—देवि! किमद्भुतमुद्युक्तासि वक्तुम्, अभिधेहि।

देवी—दाणिं ळीळावदिइं सण्णिहिदाए काळिआभअवदीए एव्वं अणुगहिदम्हि—"सेवंदिआमहाराआणं परिणअमहूसवं तुमं णिव्वट्टेहि। तदो तुह अट्ठ उत्ता जणिस्संदि, महाराअस्स चक्कवत्तित्तणं अ भविस्सदि। इमस्सिं अत्थे संकं मा करेहि, साविदासि मह चळणेहिं" त्ति। ता दाणिं एव मित्तवम्माणं

[1] पुनर्ध्यानं—(ख, ग).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आहूअ महूसवो णिव्वट्टज्जदु। [इदानीं लीलावत्यां सान्निहितया कालिकाभगवत्या एवमनुगृहीतास्मि "सेवन्तिकामहाराजयोः परिणयमहोत्सवं त्वं निर्वर्तय। ततस्तवाष्ट पुत्रा जनिष्यन्ति। महाराजस्य चक्रवर्तित्वं च भविष्यति। अस्मिन्नर्थे शङ्कां मा कुरु। शापितासि मम चरणाभ्याम्" इति। तस्मादिदानीमेव मित्रवर्माणमाहूय महोत्सवो निर्वर्तयतु।]

राजा—(सहर्षम्) देवि कालिके!

कीर्तयति नाम यस्ते
कीर्तिं प्राप्नोति स जगति समस्ते।
शरचापाङ्कुशहस्ते
शरणं भव मेऽद्य भगवति नमस्ते ॥ ३५॥

सेवन्तिकापरिणय-
स्तन्मूलमिदं च चक्रवर्तित्वम्।
देव्याश्च बहुसुतत्वं
यदि मे किमतोऽपि भागधेयं स्यात् ॥ ३६॥

देवी—अय्यकोसीदअ किं विळंबेसि। "सेवंदिआए समं कळ्ळाणवेदिं अळंकरेदि अज्जवुत्तो" त्ति कहिअ मित्तवम्माणं सिग्घं आणेहि। [आर्यकौषीतक! किं विलम्बयसि, "सेवन्तिकया समं कल्याणवेदिमलङ्करोत्यार्यपुत्रः" इति कथयित्वा मित्रवर्माणं शीघ्रमानय।]

विदूषकः—जं देवी आणवेदि। [यद्देव्याज्ञापयति।] (इति निष्क्रम्य मित्रवर्मणा सह पुनः प्रविशति)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजा—(उत्थायाभिगच्छति)

मित्रवर्मा—मयि किमेतावानुपचारः। (इत्युभौ परस्परमाश्लिष्यतः)

विदूषकः—पुव्वपच्चिमसमुद्दाणं वि अ तुम्हाणं समाअमो दीसइ। [पूर्वपश्चिमसमुद्रयोरिव युवयोः समागमो दृश्यते।]

देवी—(सेवन्तिकां हस्ते गृहीत्वा उपसृत्य) ताद दुवे वि कण्णए अम्हे पणमामो। [तात द्वे अपि कन्यके आवां प्रणमावः।]

मित्रवर्मा—चिरं जीवितं वत्से। देवि!—

भवत्या भाग्यभूम्नैव भद्रमेतत्प्रतिष्ठितम्।
भगवत्याः प्रसादेन भद्रमन्यदवाप्स्यसि॥ ३७॥

महामातिः—(मित्रवर्माणं विलोक्य) अस्मिन्नेव कन्यालग्ने परिणयं प्रशंसन्ति मौहूर्तिकाः।

मित्रवर्मा—अनुगृहीतोऽस्मि। (राजानं विलोक्य)

वसवेन्द्रमहीपाल भवद्वंशाभिवृद्धये।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना॥ ३८॥

(इति सेवन्तिकाहस्तं राज्ञो हस्ते जलप्रदानपूर्वकं निक्षिपति)

देवी—अम्हो परिगहीदा एसा। [अहो परिगृहीतैषा।]

सारङ्गिका—(सेवन्तिकां दृष्ट्वा) जेदु भट्टिणी। [जयतु भट्टिनी।]

विदूषकः—(मित्रवर्माणं विलोक्य) तत्तहोदो वअस्सस्स देवीए अणुऊळत्तणं पेक्खदु भवम्। [तत्र भवतो वयस्यस्य देव्या आनुकूल्यं पश्यतु भवान्।]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मित्रवर्मा—किमेतच्चित्रमस्यां, साध्वीनामेष स्वभावः—

जाह्नवी सह्यकन्या च ताम्रपर्णी च भूयसीः।
आपगा यमुनामुख्याः प्रापयन्ति महार्णवम् ॥ ३९॥

देवी—अय्यउत्तो आणवेदु, किं भूओ पिअं अणुचिट्ठेमि। [आर्यपुत्र आज्ञापयतु, किं भूयः प्रियमनुतिष्ठामि।]

राजा—देवि!

कान्ते! त्वमनुकूलासि काली मय्यनुकम्पते।
ऊढा सेवन्तिका चेयं किमतः [1]प्रियमस्ति[1] मे ॥ ४०॥

तथापीदमस्तु भरतवाक्यम्—

कविं सर्वे चैनं सततमनुगृह्णन्तु सुधियः
दयालुस्तानेतानवतु बसवक्ष्मापतिरसौ।
तमेनं सर्वस्याः परिवृढमवन्या भगवती
विधत्तामश्रान्तं वसतु कृतिरेषा हृदि सताम् ॥ ४१॥

(निष्क्रान्ताः सर्वे)

(इति पञ्चमोऽङ्कः)

इति श्रीचोक्कनाथकृतं सेवन्तिकापरिणयं नाम नाटकं
सम्पूर्णम्

श्रीः

---

[1] परमस्ति—क,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेवन्तिकापरिणयनाटकगतश्लोकानां
अकारादिक्रमेण सूचनी

श्लोकाः			अङ्कसंख्या	श्लोकसंख्या	पुटम्
अदिसुकिद	...	....	4	7	111
अद्य क्षिप्रप्रधावत्	....	....	1	21	10
अधरं मधुरस	....	....	3	34	83
अधिके दशौ	....	....	2	21	44
अनुसरमतिं	....	....	5	22	149
अन्यो वा तनयो वा	....	....	1	13	5
अपरिग्रहेण	....	....	3	32	82
अभ्यर्णतः संचरतां	....	....	1	33	14
अमृतविषविमिश्रितैः	....	....	1	55	22
अम्बरमणिरयं	....	....	1	57	26
अम्भोजानि	....	....	1	20	10
अइ वेणिए	....	....	4	11	115
अलिकुललस	....	....	1	32	14
अक्षिद्वन्द्वमशीत	....	....	5	24	150
आच्छादयति	....	....	1	41	17
आनितम्बतटं	....	....	3	17	69
आपार्ष्णिवेणिकेयं	....	....	3	22	73
आश्वास्यमानमधुना	....	....	3	38	86
आलापो मधुरो	...	....	3	8	63
इतो दूरं याता	....	....	5	9	138
इष्टं सिद्ध्यतु मा वा	....	....	5	28	151

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अङ्कसंख्या	श्लोकसंख्या	पृष्ठम्
उडुपस्य तिरोधानात्	....	....	1	37	15
उत्तुङ्गे सौधशृङ्गे	....	....	4	16	118
उद्वीक्ष्य राजानं	....	....	2	30	48
उन्मील्याक्षि	....	....	2	4	32
ऊहापोहविचार	....	....	3	27	75
एकं नितम्ब	....	....	3	13	67
एतादृशानामुदरंभराणां	....	....	1	16	8
एवं पलायमानं	....	....	2	33	49
एषा मद्दलधिङ्कृति	....	....	1	26	11
ऐन्द्रीकेलिकृतापराध	....	....	4	23	122
कथय वयस्य	....	....	1	29	12
कन्यां प्रेममहिम्ना	....	....	5	32	153
कविं सर्वे चैनं	....	...	5	41	157
करुणा भूम्ना भवतः	....	....	5	18	145
कर्णौ शीतलयति	....	....	3	8	64
काञ्चीमहितश्रोणीं	....	....	3	1	61
कान्ताया मयि	....	....	5	1	130
कान्ते त्वमनुकूलासि	....	...	5	40	157
कारागृहे निपतितः	....	....	2	37	52
कारागृहे वसति	....	....	5	31	153
कालिकायामविस्रम्भः	...	....	4	14	117
कालीपदाम्बुरुह	....	....	2	10	36
कालीपदाम्भोरुह	....	....	2	10 (पाठ)	36
किमिति त्वरसे	...	....	5	17	144
किंचिद्विश्लथ	....	....	3	28	75
कीर्तयति नाम यस्ते	....	....	5	35	155
कीस पुरा लवणोदे	....	....	4	1	98

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अङ्कसंख्या	श्लोकसंख्या	पुटम्
कुप्यतु ह्यतु वा सा	....	....	2	27	47
कुम्भोन्नतस्तनभरा	....	....	1	56	23
कुसुमश्रियः पुरस्तात्	....	....	3	12	67
कूजत्कोकिल	....	....	3	3	63
कूजन्तो निजकोटरैक	....	....	1	19	9
केरलदेशाधिपतेः	....	....	1	40	16
क्रमशः सरोरुहाक्षी	....	....	3	30	80
खलीनाधीनसंचारः	...	....	2	31	49
गताभीतिर्भीरु	....	....	2	1	30
गमणेण वि	....	....	2	26	46
गाङ्गेयं सिद्धगेयं	....	....	4	22	122
गुरुद्रोही चन्द्रः	....	....	2	29	47
गृहद्वारं सर्वं	....	....	1	25	11
गृह्णाति पुत्रो मम	....	....	1	10	4
घटयति परिणयमेषा	....	....	5	33	153
घ्राणं जिघ्रति	....	....	3	41	87
चन्द्रः स्फुलिङ्ग	....	....	2	19	43
चम्पकदामस्थगिता	....	....	3	23	73
चाम्पेयप्रतिमं	....	....	2	18	42
चित्रस्थितामपि	....	....	5	7	136
चित्रं निर्भरमर्भकाः	....	....	1	3	2
जह वणप्पिआ	....	....	4	3	100
जाह्नवी सह्यकन्या च	....	....	5	39	157
छायां विधाय	....	....	2	22	44
ज्येष्ठः कुप्याध्वरीन्द्रः	....	....	1	14	5
णिपतंतभमर	....	....	3	7	65
तत्तत्पार्थिवदत्त	....	....	1	4	2

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः	अङ्कसंख्या	श्लोकसंख्या	पुटम्
तत्तन्मन्त्रोच्चारण	2	9 (पाठ)	36
तदनन्तरं तुरङ्ग	2	32	49
तद्वक्त्रं शशिबिम्ब	5	15	140
तन्त्रीवादन	2	13	38
तं एव्व मन्दहसिदं	4	4	104
ताराकारैर्मौक्तिकैः	3	25	74
तिप्पाध्वरीन्द्रतनयः	1	7	3
तुहिणज्जहिपज्जङ्के	3	36	84
तुहिणद्दवाळुएहिं	1	15	6
तृतीयषष्ठरिष्फेषु	5	29	152
थवअजुअळसोहि	3	9	65
दरविकसदधर	2	7	35
दिवाकरश्चैव	5	30	152
दीहळोअणणिसङ्ग	1	47	19
दृष्टा सा प्रथमं	3	51	90
दृष्टैषा वरवर्णिनी	3	15	68
देव्या तया समाकृष्टाः	5	26	151
देशः समृद्धसस्यः	3	44	88
ध्यायन् भृशं	1	22	10
नानादेशसमागत	1	9	4
नानामणिद्युति	1	24	11
नानारूपकलाकलाप	1	5	3
निजकन्यकानुरागं	5	20	145
नितम्बभारातिशयेन	3	10	66
निद्राविराम	3	14	67
निर्गत्य त्वं वल्लरी	3	39	86
निशिक्रीडन्तीनां	1	23	11

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अङ्कसंख्या	श्लोकसंख्या	पुटम्
निःश्वसन्नभिपतन्	....	....	2	5	33
निःश्वसितशुष्यदधरा	....	....	3	19	71
निषादकुलवित्रस्तां	....	....	2	3	31
नीता सरोजवदना	....	....	5	4	131
न्यासीकृतामितर	....	....	1	53	21
पञ्चषदिवसेषु	....	....	5	22	146
पञ्चषदिवसैरेतत्	....	....	1	8	3
पञ्चषाणि विरचय्य	....	....	1	6	3
पञ्चेषुमोषक	....	....	2	23	45
पणमामि पाअकमळं	....	....	4	9	114
पत्या केलिगृहं	....	....	1	1	1
पदनतजनव्राते	....	....	4	21	121
पद्मिन्या निद्रिताया	....	....	1	36 (पाठ)	15
पमदं कंवि विचित्तं	....	....	1	44	17
परिगहिदभट्टिदारिआ	....	....	2	2	31
परिजनकृतालम्बा	....	....	1	49	19
परिष्वङ्गविधावाच्च	....	....	3	16	68
पश्यामि तां	....	....	2	24	45
पश्येयं वदनं	....	....	3	4	63
पाकारातिसरस्वती	....	....	4	25	123
पाटीरपङ्क	....	....	3	2	62
पाणी वीणागुणा	....	....	1	13 (पाठ)	38
पादद्वन्द्वमिदं	....	....	2	25	46
पार्ष्णिप्रान्तविलम्बि	....	....	1	34	14
पृथुतरनितम्बलम्बि	....	....	2	8	35
प्रतिकलचलत्कर्णं	....	...	4	19	120
प्रतिपदमिदं	...	....	5	3	131

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अङ्कसंख्या	श्लोकसंख्या	पृष्ठम्
प्रतिसौधाग्रमारुह्य	....	....	1	35	14
प्रदर्शयामि प्रतिभा	....	....	4	17	119
प्रमदां प्रदर्श्य पुरतो	....	....	5	23	150
प्रेम्णापत्यकलत्रादि	....	....	3	49	89
फंदइ वामं णयणं	....	....	4	12	116
बन्धनी रज्जुरेकैव	....	....	2	34	50
बन्धूकवारिरुह	....	....	2	20	43
बसवेन्द्रमहीपाल	....	....	5	38	156
भअवदि देवि	....	....	2	12	37
भवत्या भाग्यभूम्नैव	....	....	5	37	156
भास्वान् कलावान्	....	....	2	38	54
भित्वोत्थिता धरित्रीं	....	....	5	14	140
भूम्ना कृपायाः	....	....	3	47	89
भ्रातश्चेतः	....	....	1	46	18
भ्राम्यच्चक्राक्रान्त	....	....	1	45	8
भ्रूमध्ये परिलिखितः	....	....	3	24	74
मअणसरणिअर	....	....	4	8	111
मग्नः किं नु	....	....	3	37	84
मग्गे दट्ठतुरंगो	....	....	1	30	13
मथितदुरितसङ्घे	....	....	4	24	122
मदनचोरविनिर्गम	....	....	2	23 (पाठ)	45
मन्त्रोच्चारणकाल	....	....	2	9	36
मन्दस्मिताङ्कुर	....	....	5	6	135
मन्दं गच्छति	....	....	2	17	42
ममान्तिके सम्प्रति	....	....	3	31	81
मयि सा कृतानुरागा	....	....	5	10	138
मयीयमनुरक्ता	....	....	2	16	41

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अंकसंख्या	श्लोकसंख्या	पुटम्
महाराजकटाक्षेण	....	....	1	18	9
महुअरपरिसोहि	....	....	3	9	65
मित्रवर्मणि समागते	....	....	5	27	151
मीलिदणअणा	....	....	3	6	64
मुहुर्मुहुः कम्पित	....	....	1	42	17
मूअंबिए महसुदं	....	....	1	52	21
मूकाम्बिकानगरं	....	....	2	39	54
मूकाम्बिकापुरं	....	....	1	17	8
मूकाम्बिकापुरस्थस्य	....	....	4	18	119
मृदुलानामङ्गानां	...	...	3	20	72
मैत्री सुलभा तस्याः	....	....	5	19	145
यत्तदाशंकितं	....	....	3	48	89
यदि तनुरियं तारा	....	....	1	48	19
यदि तवास्ति कृपा	....	....	2	40	56
यस्यौदार्यममर्त्यं	....	....	1	11	4
वञ्चयित्वा त्वगादीनि	....	....	3	42	87
वनभुवि पदचारं	....	....	2	14	38
वंशागतं हि	....	....	3	45	88
वस्तिदेशगलित	....	....	3	17 (पाठ)	69
वामं मे नयनं	....	....	3	43	87
विज्यं विधेहि	....	....	4	6	109
वितरणमुखाः	....	....	1	12	5
विलिप्तःप्रत्यङ्गं	....	....	5	2	131
विशुद्धवंशस्य	...	....	5	11	139
वृत्तं मूकाम्बिकापुर्यां	....	....	4	13	117
वेणी राहुफणायित	....	....	5	16	141
वेणीलताविलसितापर	....	....	1	50	20

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अङ्कसंख्या	श्लोकसंख्या	पृष्ठम्
वेल्लच्चामरवेणिकं	....	....	1	31	13
वेष्टिताङ्गुलि	....	....	3	18	70
रत्नैरेतैरद्भुतैः	....	....	5	12	139
रम्भा तुष्यति सा	....	....	2	41	57
रहस्यं च प्रकाशं च	...	....	4	15	117
राज्ञः परिग्रहो वा	....	....	1	51	20
रूपविलोकनसफले	....	....	2	11	37
लज्जासरसि निमग्नं	....	....	3	33	82
लज्जावरणान्तस्था	....	....	3	29	77
लतानिवेशे ललना	....	....	5	5	134
लोकातिशायिनिज	....	....	1	43	17
शय्योत्थायमगात्मजा	....	....	1	2	1
शशाङ्कः प्रसङ्गं	....	....	4	5	108
शीतो न मन्दपवनः	....	....	4	2	99
श्रियं मुषित्वा	....	....	1	36	15
श्रुणोमि मणिकिङ्किणी	....	....	3	40	86
सङ्घीभूय निषादानां	....	....	2	35	51
सचकितमुत्तिष्ठन्त्या	....	....	3	35	83
संजातभङ्गचरणः	....	....	1	28	12
संत्यज्य साध्वसं	....	....	2	36	51
सहस्रारसाहिसिहरे	....	....	3	5	64
सामन्तभूमिपालेन	....	....	3	46	89
सारङ्गिकाकरधृत	....	....	5	25	150
सुकृतसमधिगम्य	....	...	3	26	74
सुकृतेन येन भवता	....	....	3	11	66
सुदृशो मय्यनुरागं	....	....	2	15	39
सेवन्तिकापरिणयः	....	....	5	36	155

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्लोकाः			अंकसंख्या	श्लोकसंख्या	पुटम्
सेवन्तिका मय्यनुरागिणीति		....	3	50	90
सेवन्तिकामिदानीं	....	....	5	34	154
सेवन्तिकां स्वकन्यां	....	....	5	8	138
सेवंदिअं णिसादा	....	....	2	6	33
सौधाग्रमधिरूढायाः	....	....	2	28	47
सौन्दर्यसारसदनं	....	....	1	27	12
सौरभलोभादधुना	....	....	3	21	73
स्फटिकोपरिपरिकलिताः	....	....	1	39	16
स्तुत्वा पदनमन्मौनि	....	....	4	20	121
स्वप्नदुर्लभमिदं	....	....	1	54	21
स्वप्नः किमेषः	...	....	5	13	140
स्वप्नेऽपि दुर्लभतरं	....	....	1	58	26
हारोल्लसत्कुचभरां	....	....	1	38	15
ळोअंदरं गदं मं	....	....	4	10	114

SRI JA... ...OHYA
JNANA SIMHAS ...AMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 1204

WD 3999—GBPM—2,000—20-5-58.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri